सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

२५ वर्षे २ अङ्कः

वै० संवत् २०२७

प्रकाशनतिथिः

भाद्रपदपूर्णिमा, वै० सं० २०२७
(सितम्बर, १९७० ई०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

प्रधानसम्पादकः

सञ्चालकः

सहायकसम्पादकः

उमाशङ्करत्रिपाठी

२५ वर्षे २ अङ्कः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणिका

१. उपनिषत्स्वद्वैतब्रह्मवादः (प्रथमं प्रवचनम्) श्री एस० सुब्रह्मण्यशास्त्री,
प्राचार्यः, भारतीयविद्याभवनम्, बम्बई–७। ९५–११४

२. ब्रह्मसूत्राणामद्वैतानुगुण्यम् (द्वितीयं प्रवचनम्) " ११५–१३२

३. पूर्वमीमांसान्यायानां वेदान्तार्थनिर्णयोपयोगः (तृतीयं प्रवचनम्) " १३३–१४७

४. शब्दार्थसम्बन्धविमर्शः – श्रीशिवसागरत्रिपाठी, साहित्याचार्यः, एम० ए,
प्राध्यापकः, राजस्थानविश्वविद्यालयः जयपुरम्। १४८–१६५

५. मधुरभक्तिपरम्परापर्यालोचनम्—श्रीकृष्णमणित्रिपाठी, व्याख्याता, पुराणेतिहास-
विभागः, वा० स० वि० वि० वाराणसी १६६–१७४

६. आधुनिकविज्ञानदृष्ट्या पराया वाचस्तत्त्वम्—श्रीरामनारायणदासः, अनुसन्धाता,
वा० सं० वि० वि० वाराणसी १७५–१८०

७. ग्रन्थसमालोचनम्—डा० भागीरथप्रसादत्रिपाठी (वागीशः शास्त्री) १८१–१९०

—:❀:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

२५ वर्षः } भाद्रपदपूर्णिमा, संवत् २०२७ { २ अङ्कः

उपनिषत्स्वद्वैतब्रह्मवादः*

श्री एस्० सुब्रह्मण्यशास्त्री

प्राचार्यः, भारतीयविद्याभवनम्, बम्बई—७.

षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥

निखिलशास्त्रपारदृश्वान उपकुलपतिमहोदयाः, पण्डितवरेण्याश्च ! तत्रादौ सर्वतन्त्रस्वतन्त्राः प्राच्यप्रतीच्योभयविद्यानदीष्णाः संस्कृते, आङ्गलभाषायां च शास्त्रग्रन्थनिर्माणेन परिकर्मितवाङ्मया विश्वविख्यातयशोराशयः श्रीमन्तो महामहोपाध्यायगङ्गानाथझामहोदया इदानीमस्मत्स्मृतिपथमवतरन्ति; प्रातःस्मरणीयानां येषां नाम्नेयं व्याख्यानमाला विश्वविद्यालयव्यवस्थापकैरायुज्यत । अतस्तान् वाङ्मनःकायैरादौ प्रणमामि । तत ऐषमस्तनानामद्वैतवेदान्तमधिकृत्य कर्तव्यायां व्याखयानमालायां ममावकाशं दत्तवत्या विश्वविद्यालयनिर्वाहकसमितेः, श्रीमतामुपकुलपतिमहोदयानां च कृतज्ञतामाविष्कृत्य प्रस्तुतकार्येऽवतरामि ।

अस्यां व्याख्यानमालायां क्रमेणोपनिषत्स्वद्वैतब्रह्मवादः, ब्रह्मसूत्रेष्वद्वैतब्रह्मवादः, मीमांसान्यायानां वेदान्तार्थनिर्णयाय महोपकारकत्वमित्येतान् विषयानधिकृत्य यथामति व्याख्यास्यामि ।

* वाराणसेयसंस्कृतविश्वविद्यालयस्यैकादश (११) दीक्षान्तमहोत्सवावसरे विश्वविद्यालयेनायोजितायां गङ्गानाथझा-प्रवचनमालायां मुम्बईनगरस्थ–भारतीयविद्याभवनविद्यालयस्य प्राचार्येण पण्डित एस्. सुब्रह्मण्यशास्त्रिमहोदयेन प्रदत्तमिदं विशिष्टव्याख्यानम्— सम्पादकः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र प्रथममुपनिषत्स्वद्वैतवादः प्रारभ्यते। ये विरक्ता अद्वैतविद्यामुपगम्य निश्चयेन शीलयन्ति, तेषां समूलस्य संसारबन्धस्य विशरणात्, अत्यन्तावसादनाद् वा, तेषां ब्रह्मगमयितृत्वाद् वा 'ब्रह्मविद्या उपनिषत्' इति सङ्कीर्त्यते। उपनिषद्ग्रन्थस्तु तादर्थ्याद् गौण्या वृत्त्या 'उपनिषत्' इत्यभिधीयते। तत्र च मन्त्रब्राह्मणारण्यकसमुदायात्मकत्वाद् वेदस्यैकैकस्या वेदशाखाया एका उपनिषद् आरण्यकान्तर्गता नियमेन भवति; क्वचित्तु काण्वमाध्यन्दिनशाखयोर्मन्त्रकाण्डेऽप्येका उपनिषद् आधिक्येन वर्तत इति विशेषः। ततश्च—

एकविंशत्यध्वयुक्तम् ऋग्वेदं कवयो विदुः।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम्।
नवाध्वाऽऽथर्वणः प्राहुः...... ....॥

इति स्मृत्युक्तरीत्यैकत्रिंशदुत्तरशताधिकसहस्रशाखानां तावत्सङ्ख्याका उपनिषद आसन्निति सभाव्यते, परन्त्वध्येत्रभावाद् नष्टा बह्वय इदानीमदर्शनं गताः, अष्टोत्तरशतोपनिषदस्तु प्रामाणिकाः समुपलभ्यन्ते। तत्रापि ईशादिदशोपनिषदः श्वेताश्वतरकौषीतकादयश्च सर्वैर्भाष्यकारैः परिगृहीता इत्यतस्ता एवाधिकृत्य विचारः प्रस्तूयते।

वेदव्याख्यानेऽनुसर्तव्या नियमाः

शास्त्रतात्पर्यविद्भिः सहस्रशाखादर्शिभिराचार्यशबरस्वामिभिर्वेदव्याख्याने केचन नियमा उपदिष्टाः, ते चाविरोधादुपनिषद्व्याख्यातृभिरप्यनुसरणीयाः, अन्यथा तत्त्वाव्यवस्थापत्तेः। तथा हि "य एव लौकिकाः शब्दास्त एव वैदिकाः, त एव च तेषामर्था इति न विधौ परः शब्दार्थः" इति च न्यायविदः। अज्ञातज्ञापनपरे वाक्ये न लक्षणादिरिति तदर्थः। यत्र च सर्वथाऽनुपपत्तिः तत्रैव तत्सिद्ध्यधिकरणोक्तरीत्या गौणीपरिग्रहः 'यजमानः प्रस्तरः' इत्यादौ। यद्यपि निरूढलक्षणा साम्प्रतिकी लक्षणा च परिगृहीते भट्टपादैः,

तथापि—

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैवाप्रयोगतः॥

इत्युक्तरीत्या अप्रयुक्तलक्षणा न स्वीकार्या। एतेन तर्कमाश्रित्य तत्त्वान्वेषणे क्रियमाणे तर्काप्रतिष्ठानात् तत्त्वनिर्णयो दुर्लभ इति भीत्या तर्कं परित्यज्य वेदमेव शरणीकुर्वतामप्यध्याहा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रादिभिर्वेदव्याख्याने क्रियमाणे तत्त्वनिर्णयदौर्लभ्यतादवस्थ्यमिति शङ्का परिहृता भवति, वेदव्याख्यानस्य मीमांसकरीत्यैव कर्तव्यतानियमात्। तत्र च तत्त्वव्यवस्थानोपपत्तेः।

उपनिषदो भिन्नभिन्नकर्तृकाः, भिन्नभिन्नप्रस्थाना इति पाश्चात्त्यानां मतं तु न भारतीयानां कर्णे पतति, वेदानां सर्वेषामपौरुषेयत्वस्यान्यत्र साधितत्वात्, "सर्वे वेदा यत्पदमामनन्ति" इति सर्वोपनिषदामेकवाक्यत्वस्य श्रुत्यैव प्रतिपादनाच्च।

अद्वैतपदार्थः

'अद्वैतम्' इत्यस्य द्विधा इतं द्वीतम्, तदेव द्वैतम्; न विद्यते द्वैतं यत्रेति व्युत्पत्त्या द्वितीयाभावोपलक्षितं ब्रह्मेत्यर्थः। द्वितीयाभावविशिष्टं ब्रह्मेत्यर्थे विशिष्टशुद्धयोर्भेदाभेदाद् द्वैतसद्भावावसरः स्यात्, अत उपलक्षितमित्युक्तम्। तत्र च द्वितीयस्य प्रत्यक्षादिसिद्धस्य नात्यन्तासत्त्वं युज्यत इति द्वैतस्य मिथ्यात्वमुच्यते। मिथ्यात्वं च सदसद्विलक्षणत्वम्, चेतनानां जीवानां ब्रह्मभिन्नत्वेऽद्वैतं न सिद्ध्येदित्यतो जीवब्रह्मैक्यं चार्थसिद्धमेव। ब्रह्मणः सगुणत्वे गुणगुणिनोर्भेदाभेदस्वीकारात् पुनर्द्वैतापत्तिरेव स्यात्, अतो निर्गुणत्वमप्यद्वैतपदेन सिद्ध्यति। एवमनेकार्थानां सूचकमद्वैतपदम् "सलिल एको द्रष्टा अद्वैतो भवति", "अद्वैतं चतुर्थं मन्यन्ते स आत्मा" इत्यादिश्रुतौ प्रयुक्तं दृश्यते।

अद्वैतश्रुतयः

तत्राद्वैतबोधकाः काश्चन श्रुतयो विविच्यन्ते—

बृहदारण्यके तृतीयाध्याये "स होवाचैतद् वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घम्" इत्यादि श्रूयते। तत्र न विद्यते स्थूलं यस्मिन् तदस्थूलम्, न विद्यते अणुर्यस्मिन्नित्येवं व्युत्पत्त्या स्थूलसूक्ष्मादिनिखिलप्रपञ्चशून्यं ब्रह्मेत्यर्थः। न स्थूलमस्थूलमिति नञ्तत्पुरुषस्तु न युक्तः, ब्रह्मणः स्थूलभिन्नत्वे अणुत्वापत्तेः, 'अनणु' इत्यस्यासंगतेः। "सदेवसोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" इत्यपि श्रुतिर्ब्रह्मणि द्वैताभावे प्रमाणम्। अत्र एकमिति सजातीयाभावः प्रतीयते, 'घट एकोऽस्ति' इत्यत्र घटान्तराभावप्रतीतिवत्, अद्वितीयमिति न विद्यते द्वितीयं यस्येति विजातीयाभावः प्रतीयते। एवकारेण स्वगतभेदाभावः प्रतीयत इति सजातीयविजातीयस्वगतभेदरहितं ब्रह्मेत्यर्थः। यत्तु केचित् "चिदचिच्छरीरको विशिष्टः परमात्मा एक एव सजातीयविजातीयद्वितीयरहितः" इति व्याचक्रुः, तेषामपि स्वगतजीवजडभेदसत्त्वात् स्वगतभेदराहित्यं दुरुपपादम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नेह नानाश्रुतिः

"नेह नानास्ति किञ्चन" इति श्रुतिरपि प्रपञ्चमिथ्यात्वे प्रमाणम्। तत्र चेह प्रपञ्चवति ब्रह्मणि नाना द्वैतं किञ्चन नास्तीत्यर्थात् प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपं मिथ्यात्वं कण्ठत एवोच्यते। यत्तु इह प्रपञ्चे लोकदृष्टप्रकारेण नानाभूतं स्वनिष्ठतया भिन्नं किञ्चिदपि नास्तीत्यर्थं वदन्ति, तत्रेदं चिन्तनीयम्—'मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन' इत्यस्मिन् वाक्ये 'इदं' शब्दनिर्दिष्टब्रह्मण एव 'इह' शब्देनात्र ग्राह्यतया तेन प्रपञ्चस्य ग्रहणायोगात्। इदंशब्दरहिते बृहदारण्यकवाक्येऽपि पूर्वत्र 'ते निचिक्युर्ब्रह्मपुराणमग्र्यम्' इत्यस्मिन् पूर्ववाक्ये ब्रह्मण एव प्रकृतत्वात्। लोकदृष्टप्रकारेण' 'स्वनिष्ठतया' भिन्नमित्यध्याहारस्याशास्त्रीयत्वात्। एवं "मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यत्र द्वैतदर्शनस्य मृत्युप्रापकत्वम्, 'इव' शब्देन तस्य मिथ्यात्वं चोच्यते। स्वनिष्ठत्वदर्शनस्य मृत्युप्रापकत्वम्, मृत्युशब्दस्याज्ञानपरत्वं परैरुच्यमानं शब्दबहिर्भूतमेव।

यत्र हि द्वैतमिव भवति

"यत्र हि द्वैतमिव भवति" इत्यत्रापीवशब्देन प्रपञ्चमिथ्यात्वमेव दृढीक्रियते। अनुपदमेव यत्र त्वस्य सर्वमात्मैवाभूत्, 'तत्केन कं पश्येत्' इत्येकत्वदर्शनेन तदुपोद्बलनात्। यत्तु "तत् कृत्स्नजगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेन तत्प्रत्यनीकं नानात्वं निषिध्यते, न नानात्वमात्रम्" इत्युक्तम्; तत्र केवलस्य ब्रह्मणस्तन्मते निमित्तमात्रत्वात्—तद्रूपेणान्तर्यामित्वेन चैक्यायोगः, अध्याहारश्च। तत्र "को मोहः कः शोक एकत्वमनुपश्यतः" इति मन्त्रोक्तमेकत्वं ह्यस्मिन् ब्राह्मणे सृष्ट्यादिवाक्यैर्दृढीक्रियते। यत्तु प्रत्यक्षानवगतानां बहूनां भावानां नानात्वं सृष्टिवाक्ये प्रतीयमानं कथं श्रुतिरेव निषेधेदिति, तत् सृष्टिवाक्यानां निषेधवाक्यावगतनिषेध्यसमर्पकत्वेन सार्थक्यात् प्रत्युक्तम्। सृष्टिवाक्याभावे ब्रह्मणि निषिद्धः प्रपञ्चोऽन्यत्र सन्नित्यभ्युपेयं स्यात्। न च सृष्टिवाक्यानां प्रकारान्तरेण प्रयोजनवत्त्वं प्रतिपादयितुं शक्यते; प्रत्यक्षेणानुमानेन शास्त्रेण वा तज्ज्ञानस्य प्रयोजनानवगमात्। सकलद्वैताभावप्रतिपादने तु परमपुरुषार्थः श्रूयते— "यत्र त्वस्य सर्वमात्मैवाभूत्, तत्केन कं पश्येत्", "विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इत्यादौ।

श्रुतेः प्रत्यक्षविरोधपरिहारः

यत्तु प्रत्यक्षादिना प्रपञ्चसत्यत्वग्रहात् तद्विरुद्धं मिथ्यात्वं शास्त्रेण कथं बोधयितुं शक्यते ? प्रत्यक्षस्य ज्येष्ठत्वेनोपजीव्यत्वेन च प्राबल्यादिति। तत्रेदं समाधानम्—प्रत्यक्षस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'घटः सन्' इत्याद्याकारस्य न कालत्रयाबाध्यं सत्त्वं विषयः, भूतभाविकालयोरिन्द्रियासम्बन्धात्। अपि तु प्रत्यक्षग्राह्यं सत्त्वं वर्तमानत्वं वा सत्ताजातिर्वेति वक्तव्यम्। तच्च मिथ्यात्वेन न विरुध्यते, प्रत्यक्षस्य ज्येष्ठत्वं बाध्यत्व एवानुकूलं प्राथमिकस्य रजतभ्रमस्य पाश्चात्त्येन शुक्तिज्ञानेन बाधात्। उपजीव्यत्वं तु प्रत्यक्षस्वरूपस्य वर्तत एव। तत्तु शास्त्रेण न बाध्यते, प्रत्यक्षगतं पारमार्थिकत्वं तु बाध्यते। तच्च नोपजीव्यम्, अपारमार्थिकैरपि रेखाक्षरादिभिः सत्यवर्णप्रतिपत्तिदर्शनात्। अपारमार्थिकस्यार्थक्रियाकारित्वं पत्रात्मकरूप्यकादिभिः सत्यरूप्यव्यवहारदर्शनाच्च।

केचित्तु "प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्" इति स्मृतिमनुरुध्य प्रत्यक्षस्य श्रुत्या बाध्यत्वमेवोरीचक्रुः। तन्मते च मिथ्यात्वश्रुतिर्निरङ्कुशं सत्त्वग्राहि प्रत्यक्षं बाधत एव। न चैतस्मिन् मते "यजमानः प्रस्तरः" इत्यादौ मीमांसकोक्तं गौणत्वं विरुध्यते, प्रत्यक्षावग्राह्यं यजमानप्रस्तरभेदमुपमृद्य तयोरभेदं श्रुतिर्वक्तीत्युपगमापत्तेरिति शङ्कनीयम्। यतस्तात्पर्यवती श्रुतिः प्रत्यक्षापेक्षया प्रबलेत्युपगम्यते। 'यजमानः प्रस्तरः' इत्यादिकं त्वर्थवादः। अतो न तस्य स्वशक्यार्थे तात्पर्यम्, अपि तु विधिस्तुतौ। अद्वैतश्रुतेस्तु षड्विधतात्पर्यलिङ्गोपपन्नाया अद्वैत एव तात्पर्यम्। अतस्तत्प्रत्यक्षापेक्षया प्रबलमेवेति प्रत्यक्षं बाधितुं शक्नोति। अथवा सर्वत्रापि प्रत्यक्षापेक्षया श्रुतिः प्रबलैव। परन्तु बाधितस्यापि प्रत्यक्षस्य स्वोचितविषयसमर्पणमावश्यकम्, निर्विषयप्रत्यक्षायोगात्। अत एवाद्वैतश्रुतिबाधितं प्रत्यक्षं तत्त्वावेदनात् प्रच्यावितं सदर्थक्रियासमर्थव्यावहारिकविषयसमर्पणेनोपपाद्यते। एवं च प्रस्तरे यजमानभेदग्राहिणोऽर्थक्रियासंवादिनः प्रत्यक्षस्य प्रातिभासिकविषयसमर्पणेनोपपादनायोगाद् "यजमानः प्रस्तरः" इति श्रुतिबाध्यत्वे सर्वथा निर्विषयत्वं स्यात्। अत उत्सर्गमपोद्य श्रुतिरेव गौण्या व्याख्यायते। न च प्रस्तरयजमानाभेदस्तात्त्विक इति वक्तुं शक्यम्, षड्विधतात्पर्योपेतसकलप्रपञ्चमिथ्यात्वश्रुतिविरोधादिति।

वाचारम्भणश्रुतिः

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति छान्दोग्यश्रुतिरपि मृत्कार्यमिथ्यात्वोपपादनमुखेन ब्रह्मकार्यजगन्मात्रस्य मिथ्यात्वं ब्रूते। तथाहि "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतम्" इति गुरुणा एकविज्ञानेन सर्वविज्ञानमुपक्षिप्तम्। "तत्कथमुपपद्यते" इति शिष्येण पृष्टे सति गुरुराह—"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति। अनेन वाक्येन ब्रह्मविज्ञानेन सर्वविज्ञानमुपपादनीयम्, ब्रह्म च सर्वस्य जगत उपादानकारणम्,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"यतो वा इमानि भूतानि" इति पञ्चम्योपादानत्वश्रवणात्, उत्पत्तिलयाधारत्वस्य श्रुतिसिद्धस्यान्यथानुपपत्तेश्च, 'तदात्मानं स्वयमकुरुत' इति कार्यस्य ब्रह्मात्मत्वश्रवणाच्च।

उपादानज्ञानेन वा कार्यविज्ञानं कथं स्यात्? मृद्विज्ञानेन तत्कार्याणां घटशरावादीनां ज्ञानादर्शनादिति, यथा "सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्" इति प्रसिद्धवत् श्रुतिः कथं ब्रूयादिति शङ्कायाम्—"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतिः प्रवर्तते। वाचाया आरम्भणं वाचारम्भणं वागित्यर्थे 'वाचा' शब्दः प्रसिद्धः, यथा "वाचा दिशा निशा" इत्यादौ। आरम्भणम् आलम्बनमित्यर्थः। तर्हि वाक् तदालम्बनं च घटादि वस्त्वस्ति, कथं मृद्विज्ञानेन तज्ज्ञानमिति शङ्कायाम् 'नामधेयम्' इत्युक्तम्। नामैव नामधेयम्, घटः शराव इति नाममात्रम्, न तु वस्तुसत्ताऽस्तीति द्योत्यते नामधेयपदेन। दृष्टं च नामपदस्याभासद्योतकत्वम् "यजन्ते नामयज्ञैस्ते" इति गीतासु। लोकेऽपि "पुत्राभासे पुत्रः" इति नामधेयमिति वदन्ति। घटस्सन्निति व्यवहारः तर्हि कथमुपपाद्य इत्यत आह—"मृत्तिकेत्येव सत्यम्" इति। 'इति' शब्दः प्रकारार्थः। मृत्तिकात्वेनैव रूपेण घटादिकं सत्यम्, न तु घटत्वेनेत्यर्थः। अथवा 'इति'पदस्याद्यर्थत्वाद् मृत्तिकादिः सत्यं घटमपेक्ष्य मृत्सत्या, तदपेक्ष्य तत्कारणं जलं सत्यम्, तदपेक्ष्य तत्कारणं तेजः सत्यम्। इत्येवं मूलकारणं ब्रह्मैव सत्यमित्यर्थः। अत एव 'इति' पदं सार्थक्यम्, आवश्यकं च। मृदो ज्ञानेन घटज्ञानं कथं सम्पन्नमिति चेत्, मृदा विज्ञानेन घटस्तत्त्वतो विज्ञातो भवति, घटतत्त्वं ज्ञातं भवतीत्यर्थः। मृत्तिकेत्येव सत्यमित्युक्त्या हि कार्यस्यासत्यत्वमवगतम्, अत एवोपादानज्ञानेन कार्यस्य तत्त्वमेव ज्ञातं भवति, न स्वरूपम्; कार्यस्वरूपस्यासत्यत्वेनासत्यज्ञानस्य च शुक्तिरजतज्ञानवदज्ञानोपादेयतया अज्ञानत्वात्। अज्ञानवन्तं विपरीतज्ञानवन्तं वा अधिकृत्य लोके 'ज्ञानवान्' इत्यव्यवहारात्। अत एव "आत्मनो वा अरे विज्ञानेन सर्वं विज्ञातं भवति" इति बृहदारण्यकवाक्ये तृतीयाया अभेदोऽर्थं आत्मविज्ञानाभिन्नं सर्वस्य वस्तुनः स्वरूपतत्त्वविज्ञानमित्यर्थः।

"ननु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्" इति बृहदारण्यकश्रुतिरपि ब्रह्मव्यतिरेकेण प्रपञ्चाभावबोधकतया प्रपञ्चमिथ्यात्वे प्रमाणम्। दृष्टान्तभूतां सुषुप्त्यवस्थां दार्ष्टान्तिकभूतमोक्षावस्थां चाधिकृत्य प्रवृत्तमिदं वाक्यं प्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावं बोधयति। एवं "विद्वान् नामरूपाद्विमुक्तः" "तरति शोकमात्मवित्" इत्यादौ ज्ञानप्रयोज्यत्वं द्वैतनिवृत्तौ प्रतीयते, उद्देश्यविधेयभावस्थले चोद्देश्यतावच्छेदकप्रयोज्यत्वं विधेये भासत इत्युत्सर्गः। ततश्च ज्ञानप्रयोज्यनिवृत्तिप्रतियोगित्वेन प्रपञ्चमिथ्यात्वमर्थसिद्धम्, सत्यस्य ज्ञानादनिवृत्तेः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न तदश्नाति किञ्चन

'न तदश्नाति किञ्चन, न तदश्नाति कश्चन" इति श्रुतिरपि तत्र प्रमाणम्; तद् ब्रह्म न किञ्चिदपि व्याप्नोति। एतावता ब्रह्मसम्बन्धो जगति निषिध्यते। तद् ब्रह्म न कश्चन व्याप्नोति। एतावता जगत्सम्बन्धो ब्रह्मणि निषिध्यते। ब्रह्मणोऽसङ्गस्य परमार्थसत्यत्वात्, प्रपञ्चस्य मायाकल्पितत्वेनानृतत्वात्, सत्यानृतयोर्वास्तवसंबन्धाभावात्। तदुक्तं वार्त्तिककारैः—

निस्सङ्गस्य ससङ्गेन कूटस्थस्य विकारिणा।
आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते॥ इति।

ब्रह्मसृष्टस्य जगत उपादानोपादेयसंबन्धमपि निराकुर्वती इयं श्रुतिः प्रपञ्चमिथ्यात्वं सूचयति।

एवं बह्वीभिः श्रुतिभिर्द्वैताभावे सिद्धेऽपि न ब्रह्माद्वैतसिद्धिः; जीवानां सद्भावात्। अत इदानीं जीवब्रह्मणोरैक्यमुपनिषद्वाक्यैः प्रतिपाद्यते।

जीवब्रह्मैक्यविचारः

उपनिषत्सु जीवब्रह्मणोरैक्यमेव तात्पर्येण बोध्यते। तथाहि "तत्सत्यं स आत्मा तत्त्वमसि" इति छान्दोग्यश्रुतिर्जीवब्रह्मैक्यबोधिनी प्रसिद्धा। अस्या जीवब्रह्मैक्यपरत्वं षड्विध-तात्पर्यलिङ्गोपबृंहितम्।

विचार्यवाक्यस्याद्यन्तभागयोरेकार्थपर्यवसानम्=उपक्रमोपसंहारौ, अभ्यासोऽनन्यपरपुनः श्रवणम्, अर्थवादः स्तुतिनिन्दान्यतरबोधकं वाक्यम्। एतत्त्रयं शब्दघटितत्वात् शब्दनिष्ठम्। तत्राद्यस्यैकार्थतात्पर्यनिर्णायकत्वेन लिङ्गत्वम्, तात्पर्यविषयत्वेन सन्दिग्धानां बहूनां मध्ये यस्मिन्नर्थे आद्यन्तभागयोः पर्यवसानम्, तत्रैव तात्पर्यनिर्णयात्। अत एवोपांशुयाजाधिकरणे उपक्रमोपसंहारैकरूप्यादेव 'उपांशुयाजमन्तरा यजति' इत्यत्र लेट्त्वकल्पनेन विधिरङ्गीकृतः। न तु "विष्णुरुपांशु यष्टव्यः" इत्यादौ तव्यप्रत्ययश्रवणे देवताश्रवणे च सत्यपि। "जामि वा एतद्यज्ञस्य यदन्वञ्चौ पुरोडाशौ" इत्युपक्रमे जामितादोषं संकीर्त्य 'अजामित्वाय' इत्युपसंहारे तत्परिहारकीर्तनेनैकवाक्यत्वावगमात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

षड्विधतात्पर्यलिङ्गानि

प्रकृते च "सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्" इत्यद्वितीयं ब्रह्म श्रूयते। तथैवान्ते "ऐतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि" इत्यद्वितीयात्मनोपसंहारः। अभ्यासस्त्व-नन्यपरम्, पुनः श्रवणम्, ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यादेर्नवकृत्वोऽभ्यासात्। यद्यपि 'समिधो यजति' इत्यादौ विधिपरपुनःश्रवणमभ्यासः पूर्वतन्त्रे कर्मभेदक उक्तः, तथाप्यत्र सिद्धार्थविषयकोऽभ्यास एकार्थज्ञापकः, अन्यथा पुनःश्रवणवैयर्थ्यात्। तस्मादादरज्ञापनद्वारा तस्य तात्पर्यज्ञापकत्वम्, तदुक्तं भामत्याम् "अभ्यासे हि भूयस्त्वमर्थस्य भवति, यथा अहो दर्शनीया अहो दर्शनीया" इत्यभ्यासबोध्य आदरोऽर्थान्तरादुत्कृष्टत्वरूपः। अर्थवादेन तु बलवद-निष्टाजनकत्वरूपं प्राशस्त्यं बोध्यते। प्रकृते चार्थवादः "येनाश्रुतं श्रुतं भवति, अनेन जीवेनात्मनाऽनुप्रविश्य" इत्यादिरर्थवादः। अपूर्वत्वं तु ब्रह्मात्मैक्यस्य वर्तत एव, प्रमाणान्त-रानधिगतत्वात्। उपपत्तिरुक्तधीविषयस्यैक्यस्य मृदादिदृष्टान्तैः, तप्तपरशुग्रहणदृष्टान्तेन स्वपिति-नामनिर्वचनेन च समर्थनम्। तेन वाक्यार्थस्याबाधितत्वसिद्धिः। अपूर्वत्वम्, फलम्, उपपत्तिश्चेत्येतत् त्रयमुक्तार्थज्ञानस्य प्रमात्वनिर्वाहकम्। तत्रानधिगतत्वांशोऽपूर्वत्वेन, अबाधि-तत्वांश उपपत्त्या। अनधिगताबाधितफलवदर्थविषयकज्ञानं वेदजन्यं यथार्थं भवति। तदुक्तं जैमिनिना—"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः, तस्य ज्ञानमुपदेशः, अव्यतिरेकश्चार्थेऽनुप-लब्धे तत्प्रमाणम्" इति।

अत्र वेदस्योपदेशरूपत्वाद् निष्प्रयोजने धर्मे ब्रह्मणि वा तात्पर्याभावात् फलवत्त्वमपीष्टम्, अन्यथा अध्ययनविधिविषयत्वानुपपत्तेः। अध्ययनविधिना फलवदर्थावबोधमुद्दिश्य अध्ययनविधेः।

न च "त्वं तदसि" इत्येवान्वयो वक्तव्यः, 'असि' पदानुरोधात्। ततश्च किञ्चिज्ज्ञत्वादि-विशिष्टे जीवे जगत्कर्तृत्वादिविशिष्टब्रह्माभेदे बोधनीये जहदजहल्लक्षणास्वीकारो दोष इति शङ्कनीयम्। मुख्यार्थस्य विशिष्टस्यानन्वये विशेष्यमात्रपरत्वमङ्गीकुर्मः। न चेयं लक्षणा; 'घटोऽनित्यः' इत्यत्र शुद्धघटपरस्य घटपदस्य लक्षणां विना मुख्यवृत्त्यैव प्रयोगदर्शनात्। अनित्यत्वस्य घटत्वेऽनन्वयात्, घटपदस्य घटमात्रपरत्वात्, तत्र घटत्वस्योपलक्षणतयैव भानात्। अन्यथा 'घटोऽनित्यः' इति प्रयोगो लाक्षणिक इति व्यवहारापत्तेः। 'घटोऽनित्यः' इति प्रयोगे तु घटपदस्य घटत्वपरत्वे लक्षणा सर्वसम्मतैव। ततश्च "तत्त्वमसि" इत्यादौ तदादिपदस्य केवलविशेष्यशुद्धचैतन्यपरत्वे शक्तिरेव, प्रयोगश्च मुख्य एव। लक्षणोक्तिस्तु विशिष्टशक्तिज्ञाना-कार्यशाब्दबोधजनकत्वगुणयोगेन।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मतान्तरप्रदर्शनम्

यत्तु पदद्वयलक्षणापेक्षयैकपदे लक्षणामाश्रित्य तदित्यस्य तत्सहचरित इति वा, 'द्वा सुपर्णा' इति श्रुतेः, यद्वा 'सन्मूलाः सोम्येमाः प्रजाः' इत्युक्तेस्तदाश्रितस्त्वमिति वा लक्षणया व्याख्यायताम् अन्यत्र "वसन्तादिभ्यष्ठक्" (पा० ४।२।६३) इति सूत्रे वसन्तपदस्य तत्सहचरिते, "ब्राह्मणोऽस्य मुखमासीत्" इत्यत्र मुखपदस्य मुखजे लक्षणाङ्गीकारादिति व्याख्यानम्, तदपि विचारणीयम्। उपक्रमादिभिरैक्ये तात्पर्येऽवधृते तत्र लक्षणायाश्च निराकृतत्वेनैतादृशव्याख्यानासंगतेः।

शरीरशरीरिभावविचारः

यत्तु शरीरवाचिनां देवमनुष्यादिशब्दानां शरीरिपर्यन्तत्वदर्शनाद् ब्रह्मशरीरभूतजीववाचि 'त्वं'पदस्य जीवशरीरकब्रह्मपरत्वं व्युत्पत्तिसिद्धम् 'यस्य सर्वाणि भूतानि शरीरम्' इति, 'यस्यात्मा शरीरम्' इति च चेतनाचेतनप्रपञ्चस्य ब्रह्मशरीरत्वोक्तेरिति। तत्रेदं विचारणीयम्। एवमपि 'त्वं'पदेन जीवशरीरकः परमात्मोच्येत, तस्य तत्पदार्थाभेदबोधनं न संभवति, 'असि'पदार्थानन्वयात्। तत्पदार्थस्य विशेष्यत्वमङ्गीकृत्य जीवशरीरकत्वविधानाभ्युपगमे तु तत् त्वम् अस्तीत्यापत्तेः।

वस्तुतस्तु देवदत्तादिशब्दानां शरीरविशिष्टात्मवाचित्वे यथा देवदत्तः सुखी, दुःखीत्यादिरात्ममात्रविषयो व्यवहारः, देवदत्तः कृशः, स्थूलः, सुन्दर इत्यादिः शरीरमात्रविषयव्यवहारः शब्दान्तरानपेक्ष एव दृश्यते; यथा वा इन्द्रः सुखी, इन्द्रः सहस्राक्षः, विष्णुः सर्वज्ञः, विष्णुर्नीलमेघश्याम इत्यादौ निष्कृष्टात्मशरीरवाचकशब्दान्तरसामानाधिकरण्याभावेऽप्यात्ममात्रविषयः शरीरमात्रविषयश्च व्यवहारः। तथा पृथिव्यादावदर्शनाद् न पृथिव्यादीनां मुख्यशरीरत्वम्, अवयवविशेषविशिष्टशरीरवाचकानामेव तद्विशिष्टात्मपरत्वव्युत्पत्तेः। अन्यथा 'घटो जगत्कर्ता' इत्यपि विष्णुविषयकोऽनौपचारिको व्यवहारः प्रसज्येत, घटशरीरके जगत्कर्तृत्वाबाधात्। तत्र चेष्टापत्तौ सर्वेषां शब्दानां विष्णुवाचकत्वमेवाङ्गीक्रियताम्। किं प्रपञ्चस्य तच्छरीरत्वमङ्गीकृत्यैतादृशव्युत्पत्तिकल्पना क्लेशेन ?

एवं च यथा उदयनाचार्यैः परमाणूनामीश्वरशरीरत्वमङ्गीक्रियते, साक्षात् तत्प्रयत्नविषयत्वात्। तथा पृथिव्यादीनामीश्वरनियम्यत्वगुणयोगात् तच्छरीरत्वव्यपदेश औपचारिक एव। ततश्चौपचारिकप्रयोगैर्न वेदवाक्यानामुपपादनं युक्तम्।

किञ्च, न शरीरमात्रवाचकपदानां शरीरिपरत्वव्युत्पत्तिः कल्पयितुं शक्या "देह आत्मा, शरीरम् आत्मा" इत्यादेर्मुख्यप्रयोगस्यापत्तेः। वैदिकैस्तत्रेष्टापत्तेः कल्पयितु-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मशक्यत्वात् । साङ्केतिकदेवदत्तादिशब्दानां कथञ्चिदविशिष्टवाचकत्वेऽपि निष्कृष्टदेहवाचकानां शरीरकलेवरादिशब्दानामात्मशब्दसामानाधिकरण्यं वक्तुमशक्यमेव । एवं च प्रपञ्चवाचकशब्दानामपि मुख्यवृत्त्या न ब्रह्मसामानाधिकरण्यं वक्तुं शक्यम् ।

वस्तुतस्तु देवदत्तादिशब्दानामपि शरीरमात्रवाचकत्वमेव व्यवहारबलात् कल्प्यम्, न तु तद्विशिष्टात्मवाचकत्वम्; लक्षणयैव क्वचित् तत्सामानाधिकरण्यव्यवहारोपपत्तौ विशिष्टे शक्तिकल्पनानौचित्यात् । अन्यथा नीलादिशब्दानामपि विशिष्टवाचकत्वापत्तेः । यदि लक्षणयैव तत्प्रयोगोपपत्तौ न शक्तिरादरणीया नीलादिपदानामित्युच्यते, तदा प्रकृतेऽपि तुल्यम् । तस्मात् सर्वं ब्रह्मेत्यादीनां 'मृद्घटः' इतिवत् प्रपञ्चब्रह्मणोरुपादानोपादेयभावात्, तयोश्च तादात्म्यात् सामानाधिकरण्यं समर्थनीयम्, न शरीरशरीरिभावेन ।

वस्तुतस्त्वेतादृशस्थलेषु 'यद् रजतं सा शुक्तिः' इतिवद् बाधायां सामानाधिकरण्यं बोध्यम् । यद् रजतमिति ज्ञातं न तद् रजतम्, अपि च शुक्तिरितिवद् यत् प्रपञ्चरूपेणावगतं न स प्रपञ्चः, अपि तु ब्रह्म इति तदर्थः । एवं च "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतीनां न लक्षणास्वीकारावसर इति ज्ञेयम् ।

किञ्च, शरीरवाचकानां शरीरिपर्यन्तत्वमित्यस्य कोऽर्थः ? न तावच्छरीरिलक्षकत्वम्, तावता मुख्यत्वानुपपादनात् । मुख्ये सम्भवति लक्षणाङ्गीकारस्यायुक्तत्वात् । नापि तत्र शक्तत्वम्, शरीरवाचिनेत्यसाधारण्येन निर्देशानुपपत्तेः, प्रवृत्तिनिमित्तमनुष्यत्वादिजातेः शरीरिण्यवृत्तेः । न च शरीरिणि शक्तिरस्त्विति शङ्क्यम्, तथा सति मनुष्यत्वादेरात्मवृत्तित्वेनाचाक्षुषत्वापत्तेः । अत एव जीवे मनुष्यादिपदप्रयोगः शरीराभेदभ्रमेणोपपाद्यते । यत्तु "आदित्यो ब्रह्म" इतिवद् जीवे ब्रह्मत्वोपासनार्थः "तत्त्वमसि" इति निर्देश इति, तदपि न; अस्योपासनाप्रकरणत्वाभावात्, तत्त्वनिर्णयप्रधानत्वात् । अन्ते "तद्धास्यविजज्ञौ" इत्युपसंहाराच्च । न च "स आत्मा अतत्त्वमसि" इति पदच्छेदो युक्तः, "त्वं ब्रह्मणो भिन्नोऽसि" इत्यस्यानुपदेष्टव्यत्वात् । 'नाहं ब्रह्म' इति प्रत्यक्षेणैव ब्रह्मभेदस्य सिद्धत्वात्, ऐक्यस्याप्रसक्तत्वेन निषेधानुपपत्तेश्च । अपि च यथा "शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा अन्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते" इति दृष्टान्तेन, यथा ज्वरादिरोगग्रस्तस्य तन्निवृत्तौ स्वास्थ्ये सति विश्रान्तिः, तथा जाग्रत्स्वप्नयोः करणव्यापारजनितश्रमापनुत्तये जीवस्य देवतात्मस्वरूपेऽनपायिस्वस्वरूपात्मकेऽवस्थानमित्यर्थस्यैवेह विवक्षितत्वात् ।

अनेन जीवेनात्मनेति श्रुतिः

"अनेन जीवेनात्मनानुप्रविश्य, नामरूपे व्याकरोत्" इति जीवेन आत्मनेति स्वबोधकपदसामानाधिकरण्याच्च जीवब्रह्मणोरभेदः । न च जीवशब्देनेश्वर एवोक्तः, रूढिपरि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्यागापत्तेः। जीवत्वं हि प्राणधारकत्वम्। तज्जीव एव प्रसिद्धम्। न च त्रिवृत्करणपूर्वक-जगत्सृष्टेर्जीवेऽसम्भवान्न तस्य जीवपरत्वमिति शङ्क्यम्, अस्मदादावसंभवेऽपि प्रथमजस्य समष्टिप्राणाभिमानिनो हिरण्यगर्भस्य तत्संभवात्।

एकविज्ञानेन सर्वविज्ञानप्रकारः

किञ्च, एकविज्ञानेन सर्वस्य तत्त्वतो विज्ञानं जीवब्रह्मणोरैक्यं विना नोपपद्यते, विकारस्य ब्रह्मव्यतिरेकेणासत्त्वात्; ब्रह्मज्ञानेन तत्त्वतो विज्ञानं सिद्ध्येत्, जीवस्य तु सर्वान्तर्गतस्य न विकारान्तर्भावः सृष्टिप्रकरणे कुत्रापि जीवसृष्टेरनुक्तेः। अत ऐक्याभिप्रायेणैव तस्य ज्ञातत्व-मुपपादनीयमिति तयोरभेदसिद्धिः।

'अहं ब्रह्मास्मि' इति श्रुत्यर्थः

किञ्च, बृहदारण्यके "ब्रह्म वा इदमग्र आसीत्, तदात्मानमेवावेदहं ब्रह्मास्मि" इति। तस्मात् "तत्सर्वमभवत् तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्" इत्युक्त्वा "य एवं वेदाहं ब्रह्मास्मि" इति, "स इदं सर्वं भवति तस्य ह न देवाश्च ना भूत्या ईशत आत्मा ह्येषां स भवति" इत्यत्र स्पष्टमेव 'अहं ब्रह्माभिन्नोऽस्मि' इति ज्ञानस्य सर्वात्मभावरूपमोक्षहेतुत्व-मुक्तम्। तत्र च 'तद्यो यो देवानां प्रत्यबुध्यत' इति भेदपरवाक्यस्यापि देवादिषु प्रबुद्धं पुरुषं निर्धार्य 'स एव तदभवत्' इति ब्रह्माभेदोक्तेः, न च 'नाम ब्रह्मेत्युपासीत' इत्यादिवत्; अत्रापि 'इति' शब्दशिरस्कत्वाद् न ब्रह्माभेदपरत्वं वाक्यस्येति शङ्क्यम्, अत्राप्युपासनप्रकरणस्थत्वा-भावात्। 'आत्मेत्येवोपासीत' इत्यादाविव 'इति'शब्दस्य स्वाभाविकसकर्मकत्वप्राप्तौ तन्निरा-करणपरत्वेनोपयोगात्। न च 'अहं'शब्दोऽन्तर्यामिपर इति वक्तुमुचितम्, अत्रैव 'अहं मनुरभवं सूर्यश्च' इति वामदेवजीवस्य वस्तुतो ब्रह्माभेदेन सूर्यादिभावस्योक्ततया अन्तर्यामि-परत्वाभावात्। "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्" इति जीवगतज्ञानफलस्य ब्रह्मभावस्य प्रकाशनात् तद्वाक्येऽन्तर्यामिपरत्वस्य शङ्कितुमप्यशक्यत्वात्, 'पश्यन् प्रतिपेदे' इत्यस्यापि बोधनिमित्तसर्वभावस्योक्तत्वेन स्वाभाविकसर्वभाववतो ब्रह्मणः 'पश्यन् प्रतिपेदे' इति वचनस्याश्लिष्टत्वात्।

स एक इति श्रुत्यर्थः

"स यश्चायं पुरुषे यश्चासावादित्ये—स एकः" इति तैत्तिरीयश्रुतिरपि जीवब्रह्माभेदे प्रमाणम्। "ब्रह्मविदाप्नोति परम्" इत्यत्र शुद्धस्य ब्रह्मणः प्रकृतत्वेन तस्मिन्नुपाधिकृत-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भेदस्य तात्त्विकत्वप्रसक्तौ तन्निराकरणार्थत्वेनैक्योपदेशोपपत्तेः। न च "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योहमस्मीति न स वेद यथा पशुः" इति समनन्तरवाक्ये उपासनापदश्रवणात् पूर्वत्रापि "य एवं वेदाहं ब्रह्मास्मि" इत्यत्र 'वेद उपास्ते' इत्येवार्थ इति शङ्कनीयम्। "तद्धैतत्पश्यन् प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति" इति पूर्वतरवाक्ये 'पश्यन्' इत्यनेन दर्शनस्यैवोक्तेः।

काठकोपनिषदर्थविचारः

एवं काठकोपनिषदपि जीवब्रह्मैक्यपरा। तथाहि—

येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः॥

इति देहव्यतिरिक्तमात्मानं निश्चयेन ज्ञातुं नचिकेताः प्रश्नमुत्थापयामास। यमस्तु जीवतत्त्वज्ञानस्य मोक्षसाधनतया तस्य उपदेशार्हतां परीक्षितुं बहुभिरैश्वर्यदीर्घजीवित्वदेवस्पर्शादिभिः प्रलोभयामास। तेषु नचिकेतसो वैराग्यं दृष्ट्वा सन्तुष्टो यमः—ममाप्येतादृशं वैराग्यं नाभूत्। मत्त उत्तमगुणोऽस्ति, त्वादृशः शिष्योऽतीव दुर्लभः, त्वां शिष्यं प्राप्य कृतार्थोहम्, त्वया ज्ञातुमिष्टो जीवो वस्तुतः परमात्मैव तज्ज्ञानं धीरस्य हर्षशोकोपलक्षितसंसारनिवर्तकमिति प्रोवाच। नचिकेताः सन्तुष्टः सन्, यद्येवं तर्हि धर्माधर्माद्यतिक्रान्तस्य तस्य स्वरूपं वदेति पुनरपृच्छत्, अन्यत्र धर्मादित्यादिना यमः प्रणवोपदेशपूर्वकं जीवस्य स्वरूपं विस्तरेणोक्त्वा तमेव पुनः 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्" इत्यनेन प्रत्यगात्मत्वेन परामृश्य,

य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते॥
अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते॥

इति बहुवारं कर्मफलभोक्तारम्, अङ्गुष्ठमात्रं जीवं भूतभव्येशितृपरमात्माभिन्नत्वेनोपदिशति। अन्ते च—

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।
तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतम्॥

इत्यत्राङ्गुष्ठमात्रं जीवमनूद्य तं शरीरादिभ्योऽन्यत्वेन ज्ञातव्यमुपदिश्य विशुद्धं जीवं शुक्रामृतपदबोध्यब्रह्माभिन्नं विद्यादिति समापयति। अनेन स्पष्टमेव ज्ञायतेऽस्या उपनिषद ऐक्ये तात्पर्यमिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रैव मतान्तरम्

केचित्तु "येयं प्रेते विचिकित्सा मनुष्ये" इति मन्त्रं शरीरव्यतिरिक्तजीवप्रश्नपरमिति न मन्यन्ते। हेतुं चाह; नचिकेताः परमास्तिकः पितुर्यागे सर्वस्वदक्षिणासु नीयमानासु वैकल्यं दृष्ट्वा आत्मप्रदानेनापि पितृयागसमृद्धिमकामयत। यागो हि पारलौकिकफलः, शरीरव्यतिरिक्ते आत्मनि जन्मान्तरे फलति। यदि च सः शरीरव्यतिरिक्तात्मनि सन्दिहेत्, तदा पितृकृतयागे समृद्धिं न कामयेत। अपि च नचिकेता द्वितीयवरत्वेन स्वर्गफलामग्निविद्यां मृत्युसकाशे प्रार्थयामास। यदि च स तस्य देहान्तरभोग्यस्वर्गफलं मम भविष्यति, अहं देहातिरिक्त इति न जानीयात्, तदा अग्निविद्यां न प्रार्थयेत्। किञ्च, नचिकेता यमलोकमेव प्राप्तः, तत्र यमेन यात्यमानान् जीवान् दृष्ट्वा देहव्यतिरिक्तमात्मानं कथं न जानीयात्? तस्मात् 'येयं प्रेते' इत्यनेन परमपुरुषार्थरूपब्रह्मप्राप्तिलक्षणमोक्षयाथात्म्यविज्ञानाय तदुपायभूतपरमात्मोपासनपरावरात्मतत्त्वजिज्ञासयाऽयं प्रश्नः क्रियते। एवं च 'येयं प्रेते' इति न शरीरवियोगमात्राभिप्रायम्, अपि तु सर्वसम्बन्धविमोक्षाभिप्रायम्।

अयमर्थः—मोक्षाधिकृते मनुष्ये प्रेते सर्वसम्बन्धविनिर्मुक्ते तत्स्वरूपविषया वादिविप्रतिपत्तिनिमित्ता अस्ति-नास्त्यादिका येयं विचिकित्सा तदपनोदनाय तत्स्वरूपयाथात्म्यं त्वयाऽनुशिष्टोऽहं विद्यामिति।

तथा हि माध्यमिका वित्तिमात्रस्यात्मनः स्वरूपोच्छित्तिं मोक्षमिच्छन्ति। पाषाणकल्पो मोक्ष इति तार्किकाः। शाङ्करास्तत्त्वज्ञानेनोपाध्युच्छित्तौ ब्रह्मभावं मोक्षं वदन्ति। त्रय्यन्तनिष्णातास्तु परब्रह्मशरीरतया प्रकारभूतस्याणोर्जीवस्य परमात्मानुभवो मोक्ष इत्याहुः, तत्र मोक्षस्वरूपं तत्साधनं च विद्यामिति नचिकेतसः प्रश्नार्थ इत्याहुः।

तत्र विमर्शः

तत्रेदं विवेचनीयम्—नचिकेता यमलोकं गतः, यमं तल्लोकस्थान् यात्यमानान् जीवान् पश्यतीत्येतावता शरीरव्यतिरिक्तात्मज्ञानवानिति तावद् वक्तुमयुक्तम्। इदानीन्तनैरमेरिकादिदेशान्तरगमनवत् तस्य यमलोकगमनम्। तत्रस्थजीवानां च यातनाशरीराविष्टानामेव च तस्य दर्शनमभूत्। ततश्च तल्लोके एवमेव जना बाध्यन्त इत्येव स ज्ञातुं प्रभवति। इमे यात्यमाना मनुष्यलोके पापं कृत्वा अत्रागता इति प्रत्यभिज्ञातुं स नैव प्रभवेत्। इत्थं च नानेन शरीरव्यतिरिक्तात्मज्ञानसिद्धिः; नापि पितृयागसमृद्धिकाङ्क्षया आत्मप्रदानेन तस्य शरीरव्यतिरिक्तात्मनिश्चयसद्भावानुमानाच्छरीरव्यतिरिक्तात्मप्रश्नानुपपत्तिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यतः सर्वे वयमास्तिका एव शास्त्रं विश्वस्य विहितानि कर्माणि श्राद्धादीनि कुर्मः, प्रतिषिद्धानि हिंसादीनि परिहरामः। नैतावता अस्माकं सत्त्वानिश्चयरूपो देहव्यतिरेकनिश्चयो जात इति वक्तुं शक्यते। तथा सतीतरैः शरीरादिनिन्दायां क्रियमाणायां दुःखं न स्यात्, प्रशंसायां च हर्षो नोदियात्। शरीरतापेन न तप्येत। किञ्च, मोक्षस्वरूपं तत्साधनं च ज्ञातव्यमिति जिज्ञासाबाधस्य नचिकेतसोऽस्तीति कथं ज्ञातुं शक्यते? वस्तुतस्तु स्वर्गार्थमग्निविद्याप्रार्थनलिङ्गात् स्वर्गार्थी स इति वक्तुं शक्यम्, अन्यथा तत्प्रार्थनायोगात् 'तं दुर्दशम्' इत्यादिमन्त्रेण शरीरव्यतिरिक्तात्मज्ञानवतो मोक्ष इति मृत्युवचनानन्तरं हि सोऽन्यत्र धर्मादित्यादिना परमात्मरूपं पृच्छति न प्राक्; किञ्च, मरणानन्तरं जीवास्तित्वविषये नचिकेतसः प्रश्नो यदि न स्यात् तदा—

हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।
यथा च मरणं प्राप्य आत्मा भवति गौतम॥
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्॥

इति मृत्युवाक्यमनुपपन्नमेव, अपृष्टोत्तरत्वात्। एवमेव स्वर्गभोग्यगफलार्थतया अग्निविद्याप्रार्थनेनापि न तस्य देहान्तरास्तित्वनिर्णयोऽनुमातुं शक्यते, आस्तिकानां महतां प्रवादात् तु आस्तिककुलोत्पन्नस्य तस्य तादृशजीवास्तित्वं विश्वस्यानुष्ठानव्यग्रता अभूत्। परन्तु तादृशास्तित्वे तस्य सम्भावना आसीत्, न तु निश्चयः। अत एव 'अस्तीत्येके, नायमस्तीति चैके' इति संशयात् पृच्छति। प्रश्नस्य मुक्तात्मविषयत्वे ईश्वरविषयप्रतिवचनानुपपत्तिश्च। एवं च श्रुतेर्मुख्यार्थपरित्यागः, विपरीतार्थप्रकल्पनं चास्मिन् मते आपद्येयातामिति संक्षेपः।

ब्रह्मवेद ब्रह्मैव भवति

एवं "ब्रह्मवेद ब्रह्मैव भवति" इति मुण्डकवाक्यमपि जीवब्रह्मैक्ये प्रमाणम्। ज्ञानस्य ह्यज्ञाननिवृत्तावेव सामर्थ्यम्, न त्वपूर्वकार्योत्पत्तौ। ततश्च ब्रह्मज्ञानाद् ब्रह्मज्ञाननिवृत्तौ ब्रह्म भवतीत्यर्थात् पूर्वमेव ब्रह्मणः सतो ज्ञानात् तद्भावाविर्भाव इत्यवगतेरैक्ये तात्पर्यम्। एवं "ब्रह्मैव सन् ब्रह्माप्येति" इति श्रुतिर्जीवस्य संसारावस्थायामेव ब्रह्मभावोऽस्तीति दर्शयति। न च नित्यं ब्रह्मभूतस्य ब्रह्मभावोक्तिरयुक्तेति शङ्क्यम्, यथा कण्ठगतचामीकरादावज्ञानादनाप्तत्वव्यवहारः, ज्ञानात् प्राप्तिश्च; तथा अज्ञानादब्रह्मभूतस्य ज्ञानादज्ञाननिवृत्तौ ब्रह्मभाव इति सामञ्जस्यात्। न चात्रैवोपनिषदि 'तथा विद्वान् पुण्यपापे विधूय निरञ्जनं परमं साम्यमुपैतीति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साम्यमेव मुक्तः प्राप्नोति, न तु तद्भावः" इत्युक्तमिति शङ्कनीयम्, परमसाम्यस्यैक्यरूपत्वात्। अत एव परमपदं सार्थकम्।

परेऽव्यये सर्व एकीभवन्ति।
युक्तात्मानः सर्वमेवाविशन्ति ॥

इति चैक्ये प्रमाणम्। न च "नृपा एकीभूताः" इत्यादिवदत्रैकीभावो युक्तो मुख्ये संभवति, गौणार्थग्रहणायोगात्। अपि च नृपाणामेकीभावोऽभिप्रायैकीभावनिबन्धनः, अभिप्रायश्च प्रत्यन्तःकरणं भिन्नः पूर्वमासीत्। ततश्च भिन्नान्तःकरणोपाधिपरिच्छिन्ना जीवा भिन्ना आसन्, इदानीं त्वभिप्रायरूपान्तःकरणवृत्त्यैक्यादन्तःकरणानामैक्यम्, ततश्च भेदकाभावाद् नृपपद-वाच्या जीवा एकतां प्राप्ता इत्यर्थः स्वरसः। स च अद्वैतानुकूलः, "नान्योऽतोऽस्ति द्रष्टा, नान्यदतोऽस्ति द्रष्टा" इति द्रष्टरि ब्रह्मभेदो नास्तीति ब्रुवती श्रुतिरप्यैक्ये प्रमाणम्।

ननु

य आत्मनि तिष्ठन् आत्मनोऽन्तरो यमात्मा न वेद।
यस्यात्मा शरीरं य आत्मानमन्तरो यमयति ॥

इत्यत्र नियम्यनियामकभेदेन जीवेश्वरभेदः प्रतिपादितः। तत्कथमैक्यं शास्त्रार्थ इति चेत्, न; अस्मिन् वाक्ये जीवस्यौपाधिकभेदमादाय नियम्यत्वोक्तेः, अत एव "एष ते आत्माऽन्तर्याम्यमृतः" इति परस्तादन्तर्यामिणो जीवात्मत्वं ब्रवीति। अनोन्यदार्तमिति च चेतनादन्यस्याचेतनस्य मृत्युग्रस्तत्वं वदति। न च जीवाः 'आर्त'शब्देनाभिधीयेरन्, तेषां नित्यत्वेन, मुक्त्यर्हत्वेन, चार्तत्वेन हेयत्वायोगात्।

द्वितीयाद् वै भयं भवति

किं च द्वितीयाद् वैभयं भवतीति भेदस्य भयहेतुत्वेन निन्दित्वादभेद एवोपनिषदां तात्पर्यम्। न च स्वसमानद्वितीयदर्शनं भयहेतुरित्यपि वक्तुं शक्यम्। उत्तरत्र यन्मदन्यन्नास्ति कस्मान्नु बिभेमि तत एवास्य भयं वीयायेति द्वितीयसामान्याभावेनैव भयनिवृत्तेः प्रतिपादनात्। परमार्थदर्शनरहितस्य द्वितीयदर्शननिमित्तभयसंभवाद् 'एकाकी बिभेति' इत्युक्तम्।

'तस्मादेकाकी न रमते, स द्वितीयमैच्छात्' इत्यत्रैकाकिनोऽस्त्युक्तिः, इष्टसंयोगजन्यरते-रेकाकिन्यभावात्। इदं चातत्त्वज्ञानिविषयम्। अत एव न पूर्वोक्तेन विरोधः "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति" इत्यत्र आत्मन्यल्पमपि भेदं पश्यतो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भयोक्तेरात्माद्वैतज्ञानमेव मोक्षहेतुरिति सिद्ध्यति, "यदा ह्येवैष अभयप्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति" इति तदुपपादनाच्च।

एवं 'ब्रह्मविदाप्नोति परम्' इति ब्रह्मविद्यामुपक्रम्य "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यत्र तस्य ब्रह्मण एतस्मादात्मन इति प्रत्यक्षसिद्धजीवाभेदेन सामानाधिकरण्यादपि जीवब्रह्मणोरभेदः, 'आत्म'शब्दस्य प्रत्यगात्मनि रूढत्वात्। एवं "तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते" इत्यत्र ब्रह्मविद्यामुपक्रम्य 'अहं ब्रह्मास्मि' इति विशेषणादैक्यावगमः। वेद्यं ब्रह्म यदि वेदितुरन्यत् स्यात्, तदा अयं ब्रह्मेति स्यात्, न त्वहं ब्रह्मेति। आत्मानमेवाविदहं ब्रह्मास्मीति चावधारणात्। आत्मैव ब्रह्मेत्यवगमः। न च वाच्यं ब्रह्मणोऽहं ब्रह्मास्मीति ज्ञानं सर्वात्मभावश्च तत्फलम्, न तु जीवानामिति। तथा सति "तद्यो यो देवानां प्रत्यबुध्यत" इत्युपक्रम्य "य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति" इति सर्वेषां ब्रह्मात्मज्ञानात्सर्वभावनिर्धारणं नोपपद्येत। इत्थं चात्मविद्याया ब्रह्मविद्येति व्यपदेशोऽपि जीवब्रह्मैक्यं द्रढयति।

मैत्रेयीब्राह्मणार्थविचारः

एवं मैत्रेयीब्राह्मणमपि जीवब्रह्मैक्यं प्रकाशयति। अत्र हि "येनाहं नामृता स्यां किमहं तेन कुर्याम्, यदेव भगवान् वेद तदेव मे ब्रूहि" इत्यनेनामृतत्वसाधनं ज्ञानं प्रार्थितवत्या मैत्रेय्या मोक्षसाधनमात्मज्ञानं ब्रवीति याज्ञवल्क्य इति सम्प्रतिपन्नम्, आत्मा च क इति तु विवेचनीयम्। न वा "अरे पत्युः कामाय" इत्यारभ्य "आत्मनस्तु कामाय सर्वं प्रियं भवति" इत्युक्त्वा प्रवृत्तस्य "आत्मा वा अरे द्रष्टव्यः" इत्यनन्तरवाक्यस्य यस्य प्रीतये सर्वे प्रिया भवन्ति, स एव ज्ञातव्यः। आत्मप्रीतिस्तु न परार्था, किन्त्वात्मानिरतिशयानन्दरूपत्वात् स्वयमेव प्रियः। ततश्चानन्दरूपः स एव ज्ञातव्यः, अमृतत्वाय न पत्यादिभेदज्ञानेन दुःखबहुलं संसारयोऽनुवर्तितव्य इत्यभिप्रायः। अनन्तरं च "स आत्मा ब्रह्मणोऽनन्यः" इति ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्मवेद इति तस्य सर्वात्मकत्वम्, "अस्य महतो भूतस्य निश्वसितमेतत्" इति तस्य जगत्कारणत्वमेकायनखण्डेन लयाधारत्वमूलकमुपादानत्वं चोक्त्वा तस्यैव यत्र हि 'द्वैतमिव भवति' इत्यादिना द्वैतभाने सुखदुःखादिप्राप्तिः, यत्र त्वस्य 'सर्वमात्मैवाभूत्' इत्यनेन सर्वात्मत्वनिश्चयदशायां द्वैताभानम्, तत्प्रयुक्तदुःखाद्यभावं च सूचयति। आत्मज्ञानेन सर्वं ज्ञानं चोपक्षिपति सर्वादावेव। तदुपयोगितयैव मृद्घटन्यायेनोपादानत्वमपि दर्शयति। तदर्थमेव यथा दुन्दुभेर्हन्यमानस्येत्यादिना दुन्दुभ्यादिदृष्टान्तेन सामान्यविशेषन्यायेन प्रपञ्चस्य ब्रह्मानन्यत्वं ब्रवीति। अत्र प्रियसंसूचितः, अत्रोपक्षिप्तः, आत्मा जीव एव। तत्प्रियार्थमेव सर्वस्यापि प्रियत्वात्। आत्मनस्तु कामाय सर्वं प्रियं भवति,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'आत्मा वा अरे द्रष्टव्यः' इति वेदानुपूर्वीदर्शनेनोभयत्र 'आत्म'पदस्य एक एवार्थ इति स्वरसतः प्रतीयते। प्रथमात्मपदस्य जीव अर्थः। द्वितीयस्य तु ब्रह्मेति तु न वक्तुं शक्यते, 'आत्म'शब्दस्य प्रत्यगात्मनि मुख्यत्वात्, समभिव्याहारस्योपेक्षितुमशक्यत्वात्; जीवब्रह्मणोरैक्यस्य तत्त्वमसीत्यादौ, अत्रैव च पूर्वं 'अहं ब्रह्मास्मि' इति महावाक्येन प्रतिपादितत्वाच्च। अत एवात्मज्ञानेन सर्वज्ञानम्, तस्यात्मनो जगत्कारणत्वम्, आत्मज्ञानस्यामृतत्वसाधनत्वमित्यादिकमुपरिष्टाद् वक्ष्यमाणं सर्वमुपपन्नं भवति।

अत्रैव केषाञ्चिन्मतम्

केचित्तु—'आत्मनस्तु कामाय सर्वं प्रियं भवति', इत्यन्तं जीवपरमेव, आत्मा वा अरे-द्रष्टव्यः' इति तु परमात्मपरम्। आत्मनस्तु कामाय=आत्मन इष्टसंपत्तय इति यावत्। न च जीवात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्तीत्युक्ते सति जीवस्य स्वरूपमन्वेष्टव्यं भवति। प्रियमेव ह्यन्वेष्टव्यम्, न तु प्रियं प्रति शेषिणः प्रियवियुक्तं स्वरूपम्। यस्मादात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्ति, तस्मात् पत्यादिप्रियं परित्यज्य तद्वियुक्तमात्मस्वरूपमन्वेष्टव्यमित्यसङ्गतं भवति, प्रत्युत न पत्यादिशेषतया पत्यादीनां प्रियत्वम्, अपि त्वात्मशेषतया तेषां प्रियत्वे त एवोपादेयाः स्युः, न त्वात्मा। ततश्च तस्य 'आत्मा वा अरे द्रष्टव्यः' इत्यनेनानन्वये वाक्यभेदः स्यात्, पूर्ववाक्यस्य प्रकृतानुपयोगश्च।

अयमर्थः—वित्तपुत्रपतिजायादीनां सातिशयदुःखमिश्रकादाचित्कप्रियत्वमनुभूयमानं न पत्यादिस्वरूपप्रयुक्तम्, अपि तु निरतिशयानन्दस्वरूपपरमात्मप्रयुक्तम्। अतो योऽन्येषां प्रियत्वमापादयति, स परमात्मैव द्रष्टव्य इत्युपदिश्यते।

अयमर्थः—न हि पतिजायापुत्रादयो मत्प्रयोजनाय, 'अहमस्य प्रियः स्याम्' इति स्वसंकल्पात् प्रिया भवन्ति, अपि त्वात्मनः कामाय। परमात्मनः स्वाराधकप्रियप्रतिलम्भरूपेष्टनिर्वृत्तये। परमात्मा हि कर्म्मभिराराधितः सन् तत्तत्कर्मानुगुणमाराधकानां तत्तद्वस्तुगतं प्रियत्वमापादयति, एष ह्येवानन्दयाति इत्युक्तेः, न तु तत्तद्वस्तुस्वरूपेण प्रियमप्रियं वा। ततश्च 'आत्मनस्तु कामाय' इत्यत्रात्मा जीवः। 'आत्मा वा अरे द्रष्टव्यः' इत्यत्र आत्मा परमात्मा ग्राह्यः। यस्मात् पत्यादीनामिष्टसंपत्तये तत्परवशेन पत्यादयः प्रियत्वेन नोपादीयन्ते, अपि त्वात्मेष्टसंपत्तये स्वतन्त्रेण स्वप्रियत्वेनोपादीयन्ते। तस्माद् य एवात्मनो निरवधिकनिर्दोषप्रियः परमात्मा स एव द्रष्टव्यः, न पत्यादय इति व्याचक्रुः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मतान्तरविमर्शः

अत्रेदं विवेचनीयम्—इदं लोके प्रसिद्धं यत् पत्यादयो जायादीनां पत्यादिप्रयोजनाय प्रिया न भवन्ति किन्तु जायादीनामेव प्रयोजनायेति। सर्वेषामपि स्वात्मा प्रियः पतिजायादयोऽपि प्रिया इत्यनुभवसिद्धम्। तत्र पत्यादीनां स्वात्मव्यतिरिक्तानां प्रियत्वं पतित्वादिप्रयुक्तं न भवति। तथा सति पत्यादीनां स्वप्रतिकूलतादशायामपि प्रियत्वापत्तेः, अपि तु स्वात्मनो हितकरणप्रयुक्तम्। अतः पतिजायादीनामिष्टसंपादनदशायामनिष्टसंपादनदशायां चाविशेषेण स्वात्मनः प्रियत्वं प्रसिद्धम्। अतः पत्याद्यपेक्षया अतिशयितप्रियत्वमात्मनो लभ्यते। तस्मात् पत्यादीन् परित्यज्य मुख्यप्रियमात्मानमेव दर्शनादिना समाश्रयेदित्यर्थे संभवति, अध्याहारादिकल्पना न शोभते, उक्तं च सुरेश्वराचार्यैः—

दृष्ट्वानुभवतस्तत्त्वमात्मानात्मपदार्थयोः।
उपादित्सा जिहासा च तत्कृतेवानुपाल्यताम्॥
स्वत एवाप्रियोऽनात्मा आत्मप्रीत्यर्थसाधनात्।
जायादिः स्यात् प्रियो भक्त्या बन्धक्याः कामुको यथा॥
निर्हेतुका स्वतः प्रीतिरात्मन्येव यतस्ततः।
भाक्तं प्रियं परित्यज्य मुख्यं प्रियमुपाश्रयेत्॥ इति।

अत एव प्रसिद्धिद्योतको वैशब्दोऽपि संगच्छते। यत्तु जीवात्मन इष्टसंपत्तये पत्यादयः प्रिया भवन्तीत्युक्ते जीवस्वरूपमन्वेष्टव्यमिति न लभ्येत, अपि तु प्रियं यत् पत्यादिकं तदेवान्वेष्टव्यं स्यादित्युक्तम्। तत्र वक्तव्यम्, स्वस्य शेषत्वेनैव ते प्रिया इत्युक्ते स्वशेषत्वाभावदशायां न प्रिया इत्यर्थस्यापि सिद्धत्वेन आत्मा सर्वदा प्रियः, पत्याद्यपेक्षया प्रियतमः स एव द्रष्टव्य इति ज्ञायत एव, यथा लोके पितुः पुत्रे प्रीतिर्वर्तते पुत्रहितकारिणि, पुत्राध्यापके च प्रीतिर्वर्तत एव। अपि तु पुत्राध्यापकापेक्षया पुत्रेऽधिका प्रीतिः। अत एव यदि सोऽध्यापकः पुत्रं सम्यग् नाध्यापयति, तदा तं न पुरस्करोति। अतश्चाध्यापकापेक्षया पुत्रे प्रीतिरधिका, पुत्रापेक्षया चात्मनि प्रीतिरधिकतरा, हिरण्यकशिपोः स्वद्वेषिणि पुत्रे प्रीत्यदर्शनात्। ततश्च यदर्थतया लौकिकपदार्थाः सर्वे प्रीतिविषयाः, स एव निरतिप्रीतिविषय आनन्दरूपो द्रष्टव्यः श्रोतव्यश्च, नतु पत्यादिविषये दर्शनश्रवणादिना कालो नेतव्य इति अमृतत्वार्थिन्यै मैत्रेय्यै निवेदयति याज्ञवल्क्यः, न हि सातिशयकादाचित्कदुःखमिश्रप्रियत्वं पत्यादावनुभूयमानं परमात्मप्रयुक्तमिति प्रसिद्धिरस्ति मैत्रेय्याः। यतः प्रसिद्धिद्योतको वै 'शब्दः समञ्जसः' स्यात्। श्रुतिसिद्धत्वं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वप्रयोजकं मैत्रेय्याः, वेदानधिकृतायास्तदर्थापरिज्ञानात्। तस्मात् सर्वोऽयं प्रपञ्चो जीवविषय एव, तस्य यत्परमार्थरूपं ब्रह्म, तदेवात्रोपदिष्टम्, तस्यैव स्वरूपज्ञानं मोक्षसाधनमिति च सिद्धम्।

ज्योतिर्ब्राह्मणार्थविचारः

एवं बृहदारण्यकषष्ठगतं ज्योतिर्ब्राह्मणमपि जीवब्रह्मणोरैक्यं विस्पष्टं प्रकाशयति। तथाहि "आत्मैवास्य ज्योतिर्भवति" इत्युपक्रमस्य जीवविषयत्वं सिद्धम्, तस्यैव स्वप्नाद्यवस्थान्तरोपवर्णनेन विद्यया कर्मणा च सह परलोकगमनवर्णनेन तस्य शरीरादिव्यतिरेकं प्रतिपाद्य "स वा अयमात्मा ब्रह्म" इति तस्य ब्रह्मरूपत्वं वक्ति। अन्ते च "स वा एष महानज आत्मा विज्ञानमयः प्राणेषु एषोन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः" इत्यादिना तस्य ब्रह्मरूपत्वं बोधयति। "इमाः प्रजा अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दन्ति, अनृतेन प्रत्यूढाः" इति श्रुतिरप्यज्ञानावृतत्वात् स्वीयब्रह्मरूपानवभास इति ब्रूते। एवमुपनिषत्प्रसिद्धमैक्यं स्मृतिपुराणादिभिरुपबृंहितं दृश्यते—

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥

(इति विष्णुपुराणे)

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।

(इति भगवद्गीतासु)

आत्मनो निर्गुणत्वम्

आत्मनो निर्गुणत्वं च "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्, अशब्दमस्पर्शमरूपमव्ययम्, असंगो ह्ययं पुरुषः" इत्यादिश्रुत्या सिद्धम्। स्मृतिश्च, निर्गुणं गुणभोक्तृ चेत्याद्या तदेवोपबृंहयति। सर्वज्ञत्वादिगुणबोधकश्रुतिः सगुणब्रह्मविषया उपासनार्था। उपास्तिविषयगुणसमर्पणपरा। न चापूर्वत्वात् सत्यकामादौ तात्पर्यम् अपूर्वत्वेप्यन्यशेषतया तत्र तात्पर्याभावात्। यथा "जर्तिलयवाग्वा वा जुहुयात्, इत्यादेः "अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च" इत्यादेश्च, अजक्षीरेण जुहोति" इत्यनेनैकवाक्यत्वात् तच्छेषत्वं स्वार्थेऽतात्पर्यं चेति। निर्गुणप्रकरणस्थगुणवाक्यानामद्वितीयब्रह्मप्रतिपत्त्यनुकूलनिषेधापेक्षितनिषेध्यसमर्पकत्वम्, ब्रह्मणः प्राशस्त्यपरत्वं चेति न स्वार्थे तात्पर्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भेदज्ञानस्य मोक्षहेतुत्वविचारः,

यत्तु भेदश्रुतेर्भेदज्ञानस्यैव मोक्षहेतुत्वमिति, तथाहि "पृथगात्मानं प्रेरितारं च मत्वा जुष्टः ततस्तेनामृतत्वमेति" इति पृथक्त्वज्ञानस्य मोक्षहेतुत्वं श्रुत्योच्यत इति, तन्न, तत्र तत्रात्मेति तूपगच्छन्ति ग्राहयन्ति च अविभागेन दृष्टत्वादिति सूत्रयता श्रीबादरायणाचार्येण निखिल-वेदान्तानां तात्पर्यं विवृण्वता तस्याः श्रुतेर्भेदज्ञानस्य मोक्षहेतुत्वतात्पर्याभावादेव पृथक्त्व-ज्ञानस्य मोक्षहेतुत्वानुक्तिरिति सूचितं भवति।

अयमर्थः—सर्वाजीवे सर्वसंस्थे बृहन्तेऽस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारं च मत्वा, जुष्टस्ततस्तेनामृतत्वमेति॥

इति मन्त्रस्य संपूर्णं स्वरूपम्। तत्र सर्वेषां जीवानामुपजीव्ये सर्वप्रलयाधारे बृहति ब्रह्माख्ये चक्रे जीवो भ्राम्यति। भ्रमहेतुमाह—पृथगात्मानमिति। जीवब्रह्मभेदज्ञानं भ्रमहेतु-रित्यर्थः। तस्मात् परमेश्वरेण जुष्टोऽनुगृहीत एवामृतत्वं प्राप्नोतीत्यर्थः।

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते।

इति श्रुतिर्नाद्वैतस्य प्रतिकूला। अनन्तरमेव—

"समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशम्।"

इति मन्त्रेण देहेऽहंममाभिमानाद् जीवोऽनीशया स्वस्येशभिन्नत्वज्ञानेन शोचति। यदा त्वन्यं देहादिविलक्षणमृषिसंघजुष्टमात्मानम् 'अहमस्मि' इति पश्यति, तदा वीतशोको भवतीत्यद्वैतस्यैवोपपादनात्।

तदयं निष्कर्षः—उपनिषद्व्याख्यातारः, द्वैतिनो वा, विशिष्टाद्वैतिनो वा, अद्वैतिनो वा भवन्तु, सर्वेऽपि जीवस्येश्वराभेदेनैवोपासनमिच्छन्ति, "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि" इति श्रुतेः "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इति सूत्राच्च। परं तूपासना-विषयोऽभेदस्तात्त्विकः, अद्वैतिनामितरेषां तु काल्पनिकः। व्यवहारविषयः प्रपञ्चः काल्पनिकोऽ-द्वैतिनाम्, पारमार्थिक इतरेषामिति। जीवब्रह्माभेदस्य तात्त्विकत्वं तु बहुश्रुतिसूत्रस्वारस्यानु-गुणमिति संक्षेपः।

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मसूत्राणामद्वैतानुगुण्यम् ।

द्वितीयं प्रवचनम्

ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥

उपोद्घातः

ब्रह्मणः प्रमाणगतदविरोधज्ञानसाधनफलादीनां श्रुत्युक्तानां निर्णयार्थानि सूत्राणि ब्रह्मसूत्राणि 'अथातो ब्रह्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिश्शब्दादनावृत्तिः शब्दात्' इत्यन्तानि श्रीबादरायणाचार्यैः प्रणीतानि । तानीमानि 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४-३-११०) इति पाणिनिसूत्रेऽभिधानात् 'भिक्षुसूत्राणि' इत्यपि नामान्तरेण प्रसिद्धानि, सन्यासिभिः साधनचतुष्टयसंपन्नैः प्राधान्येन सेवनीयत्वात् । तानि च 'वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणां नानुमानोपन्यासार्थानि' इति भगवत्पादोक्तरीत्योपनिषदां तात्पर्यनिर्णयार्थानि । अतएवादावेव 'अथातो ब्रह्मजिज्ञासा,' 'जन्माद्यस्य यतः' इति सूत्रयोः 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व, तद् ब्रह्मेति' इति वाक्येषु श्रुतान्येव ब्रह्मजिज्ञासपदे इदं पद-यतःपदे च श्रूयेते । तेषां कुत्र तात्पर्यमिति जिज्ञासायां यत्रोपनिषदां तात्पर्यं तत्रैव सूत्राणां तात्पर्यमिति निश्शङ्कं वक्तव्यम् । एवं सति डा० तीबो-नामकेन प्राचार्येण यत् स्वकृतशङ्करभाष्यानुवादे—उपनिषदां बहुभिर्महर्षिभिर्भिन्नभिन्नकाले प्रणीतत्वाद् एकवाक्यतोपपादनमशक्यमनावश्यकं च; यद्येकवाक्यता संपादनीयेत्याग्रहः, तदा शङ्कराचार्योक्तरीतिरेव समीचीना, ब्रह्मसूत्राणि तु रामानुजमतस्यैवानुकूलानि दृश्यन्त इति जल्पितं तदविचाररमणीयम् ।

ब्रह्मसूत्रार्थनिर्णयेऽपि मीमांसाभाष्यकारैः शबरस्वामिभिरुक्तो न्यायोऽनुसरणीयः, तथा हि—

"लोके येष्वर्थेषु यानि पदानि प्रयुज्यन्ते तानि पदानि तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम्, नाध्याहारादिभिरेषामर्थः परिकल्पनीयः परिभाषितव्यो वा" इत्युक्तं शास्त्रारम्भे । एतन्नियमानादरे हि सूत्रार्थाव्यवस्थैव स्यात् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जिज्ञासासूत्रम्

अथातो ब्रह्मजिज्ञासेत्यत्र, ब्रह्मपदस्य "ब्रह्मचर्यम्" इत्यत्र वेदे "ब्रह्म स्वयंभु" इत्यत्र, कमलासने "इद ब्रह्म आयाति" इत्यत्र, जीवे "तपो ब्रह्म" इत्यत्र, तपसि "ऋतं सत्यं परं ब्रह्मपुरुषं कृष्णपिङ्गलम्" इत्यत्र, शिवे "नारायणः परं ब्रह्म" इत्यत्र, विष्णौ च रूढत्वाद् रूढयोः कलहे योगस्योन्मेष इति जगद्वाचित्वाधिकरणन्यायात् योगार्थो गृहीतः भगवत्पादैः। तथाहि बृहि वृद्धौ इति धातोर्मनिन् प्रत्यये निष्पन्नः, देशकालाद्यवच्छेदकविशेषाग्रहणाद् अभावाप्रतियोगित्वं बृहत्त्वं बोधयति ब्रह्मशब्दः। अभावश्च प्रागभावः प्रध्वंसोऽत्यन्ताभावोऽन्योन्याभावश्चेति चतुर्विधः। तथा च सकलविधाभावाप्रतियोगि ब्रह्मेत्यर्थः। ब्रह्मव्यतिरिक्तवस्त्वभ्युपगन्तृणां ब्रह्मणोऽन्योन्याभावाप्रतियोगित्वं न संभवति। चिदचितोर्ब्रह्मशरीरत्ववादेऽपि तयोः परस्परं भिन्नतया स्वगतभेदोऽनिवार्य एव। ब्रह्मशब्दो गुणपूर्णवाचक इति मते त्वप्रसिद्धार्थकतया पारिभाषिकत्वापत्तिः। अद्वैताभिप्राये तु नैतौ दोषौ। तच्च सत्यज्ञानानन्दात्मकं ब्रह्म अज्ञातं विषयः, ज्ञातं सत् फलत्वेन पुरुषार्थः। एतादृशं निष्प्रपञ्चं जीवाभिन्नं च ब्रह्मेति प्रथमसूत्रस्याद्वैतपरता।

शारीरकसूत्रनाम्न आनुगुण्यम्

अपि च ब्रह्मसूत्राणां शारीरकसूत्राणीति नामान्तरं विद्यते। सर्वैर्भाष्यकारैरनुमन्यते च। शारीरकपदं च 'अनुपपत्तेस्तु न शारीरः' 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते', 'प्रतिषेधादिति चेन्न, शारीरात्' इति सूत्रेषु सर्वमतेनैव जीवपरमितीयं जीवमीमांसैव सती जीवस्वरूपस्य शोधनेन ब्रह्मत्वं निरूपयन्ती ब्रह्ममीमांसापदेनापि व्यवह्रियते। इत्थं च ब्रह्ममीमांसाशारीरकमीमांसापदयोः पर्यायत्वाद् जीवब्रह्मणोरभेदोऽस्य शास्त्रस्य विषय इति स्पष्टं प्रतीयते। चिदचिच्छरीरकः परमात्मा शारीरकस्तस्य मीमांसा शारीरकमीमांसेति व्याख्याने शारीरकपदं पारिभाषिकं प्राप्नोति सूत्रेषु जीवस्यैव शारीरकपदेन व्यवहारात्। कुत्सितं शरीरं शरीरकं तत्र भवः शारीरक इति व्युत्पत्तेर्जीवः शारीरकः, तस्य मीमांसा नाम तत्स्वरूपशोधनपूर्वकम्, तस्यैव ब्रह्मत्वनिर्णय इति।

अपि च जिज्ञासासूत्रे जिज्ञासायाः फलं मोक्ष इति सर्वसंप्रतिपन्नम्। मोक्षश्च बन्धनिवृत्तिः, तस्य ज्ञानसाध्यत्वोक्त्या ज्ञाननिवर्त्यत्वरूपं मिथ्यात्वं बन्धस्य प्रतीयते। एवं जीवगतबन्धस्य ब्रह्मज्ञाननिवर्त्यत्वोक्त्या जीवब्रह्माभेदोऽपि सिद्ध्यति, अन्यगतबन्धस्यान्यज्ञानेनानिवृत्तेः। तथा हि-जीवो ब्रह्माभिन्नः, तज्ज्ञाननिवर्त्यबन्धाश्रयत्वात्। यो यज्ज्ञाननिवर्त्या-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञानाश्रयः स तदभिन्नः, यथा शुक्त्यभिन्न इदमंश इति प्रयोगः। सत्यज्ञानानन्दात्मकं ब्रह्म निर्गुणं जीवाभिन्नम्, प्रपञ्चस्तु मिथ्येत्यद्वैतराद्धान्तः। तत्र जीवब्रह्माभेदः सूत्रेषु कुत्र प्रतिपाद्यत इति चिन्त्यते।

शास्त्रदृष्टिसूत्रम्

'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति प्रथमाध्यायप्रथमपादगतं सूत्रम्। 'प्राणस्तथानुगमात्, इति सूत्रेण 'स होवाच प्राणोऽस्मि प्रज्ञात्मा तं माम् आयुरमृतमित्युपास्स्व प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयति स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृतः' इत्यस्मिन् कौषीतकवाक्यसन्दर्भे प्राणशब्देन परमात्मोच्यते, स चोपास्यत्वेनाभिमत इति निर्धारितम्। अनन्तरं च 'मामेव विजानीहि' 'मामुपास्व' इति वक्तुः इन्द्रस्यात्मत्वेनोपदेशाद् जीव एवात्रोपास्य इति शङ्का अध्यात्मसम्बन्धिधर्माणामत्र बाहुल्येन कीर्तनात् परमात्मोपासनमेवेदमिति प्रत्युक्ता, 'न वक्तुरात्मोपदेशात्' इति सूत्रेण। पुनश्च 'मामेव विजानीहि' इति अस्मच्छब्दप्रयोगानुपपत्तिपरिहाराय शास्त्रदृष्टिसूत्रमिदं प्रवृत्तम्।

तस्य चायमर्थः—शास्त्राद् दृष्टिः शास्त्रदृष्टिः, शास्त्रजन्यं ज्ञानं शास्त्रं च 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिकमैक्यबोधकमभिप्रेतम्। तज्जन्यं ज्ञानम् अहं ब्रह्मास्मीति। तेन युक्त इन्द्रो मामेव विजानीहीत्युक्तवान्। ततश्च 'अहं ब्रह्मास्मि' तत्त्वमसीत्यादेः शास्त्रगतवाक्यविशेषस्य शास्त्रत्वोक्त्या इदं वाक्यं शास्त्रसारभूतम्, अस्यैवोपकारकमन्यत्, एतद्वाक्यार्थज्ञानमेव परमपुरुषार्थसाधनम्, इत्यादयोऽर्थाः सूचिता भवन्ति। तथा च तत्त्वमसीत्यादेर्योऽर्थः स एव शास्त्रार्थः, तत्रैव शास्त्रतात्पर्यमित्यायातम्। तस्य च जीवब्रह्मैक्य एव स्वारस्यम्। इतरमतप्रोक्ता अर्था लाक्षणिकाः, अध्याहाराद्यपेक्षाश्चेति पूर्वमेव विचार्य निर्णीतम्।

'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति सूत्रमपि जीवब्रह्माभेदे प्रमाणम्। अत्र च शास्त्रोक्तविशेषणः परमात्मा किमहमिति ग्रहीतव्यः, उत मदन्य इति, इति सन्देहे सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरुद्धधर्मवत्त्वात् तत्त्वमसीत्यादौ श्रूयमाणोऽप्यभेदो गौण इति पूर्वपक्षयित्वा 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि', 'तत्त्वमसि' इत्यादिना यस्माद् उपासका अभेदेनैवोपगच्छन्ति तत्त्वजिज्ञासून् श्वेतकेतुप्रभृतीन् उद्दालकादयोऽभेदेनैव बोधयन्ति, तस्माद् उपासन ज्ञानं चेत्युभयमभेदेनैव भवतीति द्रष्टव्यम्। उपासनं यद्यपि भेदे सत्यप्यभेदेन कर्तुं युज्यते, तथापि अभेदस्य इतरसूत्रेषु उपनिषत्सु च व्यवस्थापनाद्वास्तविकोऽभेदः सुवचः। भेदपरत्वे तु वाग्धेनूपास्तिवत् सर्वोपासनानामसदुपासनत्वप्रसक्तिश्च।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संपाद्याविर्भावसूत्रम्

किञ्च मुक्तस्वरूपनिर्णयार्थे चतुर्थाध्यायचतुर्थपादे आदौ 'संपद्याविर्भावः स्वेन शब्दात्' इत्यनेन 'य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति जीवस्य मुक्तिकालीनस्वरूपबोधकवाक्येन मुक्तजीवस्तत्त्वज्ञानात् परं ज्योतिरुपसंपद्य स्वेन रूपेणाविर्भवतीत्युक्तम्। एतेन मुक्तौ तस्यागन्तुकरूपनिषेधः सिद्ध्यति। तथा च स्वरूपाविर्भाव एव मोक्ष इत्युक्तं भवति। स्वशब्दस्य स्वीयं रूपमित्यर्थकथनं तु न युज्यते, व्यर्थत्वाद्, येनैव हि रूपेणाभिनिष्पद्यते तस्यात्मीयत्वात्। आत्मवचनत्वे तु केवलेनैवात्मरूपेणाभिनिष्पद्यते, न त्वागन्तुकेनेत्यर्थविशेषोपपत्तिः। 'परं ज्योतिः' इत्यत्र ज्योतिःपदार्थ आत्मैव, न भौतिकज्योतिरिति निरधारयत् 'आत्मा प्रकरणात्, इत्यनेन। ततो मुक्तः परमात्मनो भेदेनावतिष्ठते, उत अभेदेनेतिशङ्कायाम् 'अविभागेन दृष्टत्वात्, इति सूत्रम्। परं ज्योतीरुपसंपद्य इत्युक्तिमनुसृत्य कर्मकर्तृनिर्देशाद् भेदेनावस्थानमिति न मन्तव्यम्; अविभक्त एव परेणात्मना मुक्तौ जीवोऽवतिष्ठते, कुतः, दृष्टत्वात्। 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिश्रुत्यनुसारेणाभेदेनात्मा दृष्टः। यथादर्शनमेव फलं युक्तं 'यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति' इति तत्क्रतुन्यायादित्युक्तम्। 'यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति' इति श्रुतिरभेदमेव द्रढयति।

यत्तु मुक्तः परमात्मशरीरतया तत्प्रकारभूतोऽवतिष्ठत इति व्याख्यानं तदध्याहारापेक्षं संसारेऽपि प्रकारतयाऽवस्थितेर्विशेषनिर्देशं चापेक्षते।

प्रकृतिश्चेतिसूत्रम्

ब्रह्मणः प्रकृतित्वमुक्तं 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रे। तेनैव च ब्रह्मणो विवर्तोपादानत्वं सिद्ध्यति, विवर्तोपादानत्वे च प्रपञ्चमिथ्यात्वमर्थसिद्धम्। तथा हि— न तावत् प्रकृतित्वं परिणाम्युपादानत्वम्, तस्य 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इति सूत्रेण कृत्स्नपरिणामे प्रपञ्चात् पृथक् ब्रह्मणोऽभावापत्तिः, एकदेशपरिणामे निष्कलं निष्क्रियं शान्तमिति श्रुतिविरोधः, इत्येवं निराकृतत्वात्। नापि नैयायिकपक्षमनुरुध्य आरम्भकत्वम्, तथा सति प्रतिज्ञादृष्टान्तयोरनुपपत्तिः। येनाश्रुतं श्रुतं भवतीति प्रतिज्ञा। यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादिति दृष्टान्तः, तयोरारम्भवादेऽनुपपत्तिः, कारणापेक्षया कार्यस्य तन्मतेऽत्यन्तभिन्नत्वात् कारणज्ञानेन ज्ञातत्वं च नोपपद्येत।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्तूपादानत्वम् अपृथक् सिद्धया विकाराश्रयत्वम्, निर्विकारं तु ब्रह्म। अतस्तदविरोधाय सूक्ष्मचिदचिद्विशिष्टं ब्रह्म जगदुपादानम्, तत्र सूक्ष्मचिदंशो जगदाकारेण परिणमत इति विकारित्वं तस्यैव, न तु ब्रह्मणः केवलस्येति वदन्ति। 'मृदादिभिर्घटाद्युत्पत्तिर्नाम न वस्त्वन्तरम्, अपि तु मृदादेरेवावस्थान्तरं घटः। एवं त्र्यणुकमारभ्यैव कार्याणि अवस्थाभेदा इति च ब्रुवन्ति। तत्रापि विचारणीयं किञ्चित्।

एवं सति प्रकृत्यंशस्यैवोपादानत्वं सिध्यति, न तु ब्रह्मणस्तस्य विशेष्यत्वमात्रेणोपादानत्वे मुख्योपादानत्वानिर्वाहः। किं च सृष्ट्यादिवाक्येष्वात्मब्रह्मादिपदानां प्रकृतिविशिष्टे ब्रह्मणि लक्षणा दुरुद्धरा। किञ्च सत्यं ज्ञानमनन्तं ब्रह्म प्रकृत्य तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यत्रात्मपदस्य प्रकृतग्राहिणो न विशिष्टपरत्वमुपपद्येत। लक्षणायामपि पञ्चम्यर्थ उपादानत्वं विशेष्य एवान्वियात्, न विशेषणे प्रकृतौ। यत्तु प्रकृतिः साक्षाद् जगदाकारेण विक्रियते, ब्रह्म तु विकाराश्रयप्रकृतिसम्बन्धाद् विकारवत्, न तु स्वयमिति। तदपि दुर्वचम्। 'आत्मन आकाशः संभूतः' इत्यादीनां साक्षादात्मनः प्रकृतित्वबोधकानां वाक्यानामानर्थक्यापत्तेः। तत्र साक्षात् सम्बन्धस्यैव प्रतीतेः। मायां तु प्रकृतिं विद्यात्, मायिनं तु महेश्वरमित्यादौ मायायाः प्रकृतित्वस्य ईश्वरस्य तदाश्रयत्वस्य च बोधनेन मायाद्वारकं प्रकृतित्वमीश्वरस्येत्यबोधनात्। कार्यमुपादानस्यावस्थान्तरमिति पक्षेऽपि सांख्यपक्षवद् अवस्थान्तरं पूर्वमासीद्वा अपूर्वं वा ? आद्ये न कार्योत्पत्तिः, द्वितीयेऽसत्कार्यवाद इति प्रश्नोऽवतरति। अतः श्रुतिप्रतिपाद्यस्य ब्रह्मोपादानत्वस्योपपत्तये विवर्तवाद एवाश्रयणीयः, कार्यं तु मिथ्येति ब्रह्माद्वैतसिद्धिः। अत्र सूत्रे प्रतिज्ञापदेनोक्ता एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा सांख्यमतेन उपादानोपादेययोरैक्याद् निर्वोढुं शक्यते। परं तु कृत्स्नप्रसक्त्यादिदोषात् सांख्यमतं परित्यक्तम्। अद्वैत एव तु इयं प्रतिज्ञा सूपपादा ब्रह्मविज्ञानेन सर्वस्य प्रपञ्चस्य तत्त्वतो विज्ञानात्। विकारस्य तत्तद्व्यक्तित्वेनाज्ञानं तु न दोषावहम्, विकारस्य मिथ्यात्वेन तज्ज्ञानस्याज्ञानत्वात्। अत एव वाचारंभणं विकारो नामधेयमित्युक्तम्। येन विज्ञानेन विज्ञातमित्यस्य यद्विज्ञानाभिन्नज्ञानविषय इत्यर्थः पूर्वमेवावेदितः।

यत्तु विवर्तवादोऽस्मिन् दृष्टान्ते विवक्षितश्चेत् शुक्तिरजत दृष्टान्तीकृत्य शुक्तिरित्येव सत्यमिति वक्तव्यं भवेत्, न तु मृद्घटदृष्टान्त इति। तन्न, मृदपि विवर्तोपादानमेव। मृदवच्छिन्नं चैतन्यमिति तु निष्कर्षः, न हि मृदः शरावादयो भिद्यन्ते, मृद्घट इति प्रतीतेः। नाप्यभिन्नाः, अर्थक्रियाभेदात्। नापि भिन्नाभिन्नाः, एकत्र भेदाभेदयोरसंभवात्, अतोऽनिर्वाच्याः। इदमेवोक्तं मृत्तिकेत्येव सत्यमिति। कार्यमिथ्येतीति इतिपदार्थः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मकृतेः परिणामात् ।

'आत्मकृतेः परिणामात्' इत्यत्र सूत्रे मिथ्यापरिणामादित्येवार्थः । अत्र कल्पतरौ ब्रह्मनन्दिना 'परिणामस्तु स्यात्' इति छान्दोग्यवाक्य उक्तत्वात् परिणामवादो वृद्धसम्मत इति, तन्न, ब्रह्मनन्दिना हि—"नासतोऽनिष्पाद्यत्वात्, प्रवृत्त्यानर्थक्यं तु सत्त्वाविशेषात्" इति कार्यस्य सदसत्त्वपक्षौ प्रतिक्षिप्य, न संव्यवहारमात्रत्वात्, इति विवर्तवादोऽनिर्वचनवादापरपर्यायः सिद्धान्तितः इति विवर्तवादे महतां सम्मतिः प्रदर्शिता । ततश्च सूत्रे परिणामपदं दृष्ट्वा सांख्यमतं सूत्रकाराभिमतमिति न भ्रमितव्यम् । इत्थं च मिथ्यापरिणामेऽपि परिणामपदमेव पूर्वकैः प्रयुक्तमिति गम्यते, विवर्तपदं त्वर्वाचीनमिति च ।

तदनन्यत्वसूत्रम् ।

'तदनन्यत्वमारम्भणशब्दादिभ्यः' इति सूत्रात् प्रपञ्चस्य मिथ्यात्वं साक्षादेवावगम्यते । इदं हि सूत्रं 'भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्' इत्यनन्तरं प्रवृत्तम् । तस्यायमर्थः—जगत् तावद् ब्रह्मोपादानकत्वाद् ब्रह्माभिन्नम्, जीवोऽपि तत्त्वमसीति शास्त्राद् ब्रह्माभिन्नः । तथा च एकस्मादभिन्नयोर्जीवजगतोः परस्परमप्यभेदः स्यात्, तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमादिति पूर्वपक्षस्य समाधानार्थमिदं सूत्रम् । न भोग्यस्य भोक्तृभावापत्तिर्भोक्तुर्वा भोग्यभावो लोकवदुपपत्तेः; यथा समुद्रजन्ययोः फेनतरङ्गाद्योः परस्परं भेदेऽपि एकसमुद्रात्मना अभिन्नत्वमिति । इदं च समाधानं भेदग्राहिप्रत्यक्षादेः प्रामाण्यमभ्युपेत्य भेदाभेदयोः संगमनं समुद्रात्मनाऽभेदः फेनतरङ्गात्मना रूपभेदमङ्गीकृत्य भेद इति ।

इदानीं प्रत्यक्षादेः प्रामाण्यं तत्त्वावेदकत्वात् प्रच्याव्य व्यावहारिकत्वे व्यवस्थाप्यते तदनन्यत्वसूत्रेण । सूत्रस्यायमर्थः—आरम्भणशब्दादिभ्य इति सूत्रांशेन वाचारम्भणमित्यादिश्रुतेर्हेतूकरणात् तस्याश्च स्वरसतः प्रपञ्चमिथ्यात्वपरत्वाद् अनन्यत्वपदेन मिथ्यात्वमेव विवक्षितम् । न त्वभेदः, अभेदविवक्षायामविभागो वचनादितिवदविभाग इति प्रयोगापत्तेः । तथा च प्रपञ्चमात्रे तस्माद् ब्रह्मणोऽनन्यत्वम् । तत्र अनन्यत्वं भेदाभाव इत्येकोऽर्थः । तथा च भेदस्य ब्रह्मण्यभावोक्तावपि भिन्नवस्तुनो भावः स्यादिति शङ्का भवति । अतोऽन्यत्वेन कार्यस्याभावोऽपि विवक्षितः, तथा च कार्यस्य मिथ्यात्वम् । एवं जीवस्य ब्रह्माभिन्नतया जीवगतब्रह्मभेदस्यापि निषेधेन मिथ्यात्वसिद्धिरिति ब्रह्मव्यतिरिक्तः सर्वोऽपि प्रपञ्चो मिथ्येति सिद्धम् । तत्र जडांशे स्वरूपं भेदश्चेत्युभयं मिथ्या, चैतन्यांशे भेदमात्रं मिथ्येति विशेषः । अथवा ब्रह्मणोऽनन्यत्वम्, अन्यशून्यत्वम्, अद्वयत्वमिति यावत् । तेन प्रपञ्चमिथ्यात्वसिद्धिः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आरंभणशब्दो वाचारंभणं विकारो नामधेयमित्यादिश्रुतिः। आदिपदाद् दृग्दृश्यसंबन्धानिरूपणादियुक्त्याऽपि मिथ्यात्वसिद्धिः। उक्तश्रुतौ यथा घटादिविकारो वाचा व्यवहार्यं नाममात्रम्, मृदादिकारणेभ्यो भेदाभेदाभ्यां दुर्निरूपत्वात्। तथाहि—भिन्नत्वे सत्कार्यवादहानिः, अभिन्नत्वे कारकव्यापारवैयर्थ्यम्। भेदाभेदौ तु विरुद्धत्वान्न संभवतः। अतो मिथ्यैव कार्यमित्यर्थः।

एवं 'आत्मनि चैवं विचित्राश्च हि' इति सूत्रेणापि प्रपञ्चमिथ्यात्वसिद्धिः। जगतो ब्रह्मकार्यत्वे कृत्स्नस्य ब्रह्मणः परिणामप्रसक्तिः, एकदेशपरिणामे निरवयवत्वशब्दकोपो वा इति दूषणद्वयपरिहारार्थम् श्रुतेस्तु शब्दमूलत्वादिति सूत्रम्। ब्रह्मण उपादानत्वं निरवयवत्वं चोभयं श्रुतिमूलम्। श्रुतिश्च नातिशङ्कनीयेत्यर्थः सूत्रस्य। ननु श्रुतिर्वा सर्वहितैषिणी कथं विरुद्धं ब्रूयादत आह—आत्मनि चेति। आत्मनि स्वप्नदृशि स्वरूपानुपमर्देन नानाप्रपञ्चसृष्टिवद् ब्रह्मणि व्यावहारिकप्रपञ्चसृष्टिरित्यर्थः। निर्वक्तुमशक्योऽपि कार्यस्य कश्चित् तादात्म्याख्य आध्यासिकसंबन्धः कारणेनाभ्युपगम्यते। तथा च तादृशतादात्म्यसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वं विवर्तोपादानत्वमित्यर्थः। न च कार्योत्पत्त्यधिकरणे ब्रह्मणि ब्रह्म न तादात्म्येन संबद्धमिति वाच्यम्, कार्योत्पत्त्यव्यवहितपूर्वक्षणोपहिते ब्रह्मणि शुद्धस्य तादात्म्यात्, विशिष्टशुद्धयोस्तादात्म्याभ्युपगमात्। तथा च स्वप्नदृष्टान्तकरणाद् जाग्रत्सृष्टेरपि मिथ्यात्वम्। विमतं मिथ्या, दृश्यत्वात्, स्वाप्नप्रपञ्चवदित्यनुमानात्।

भावे चोपलब्धेरिति सूत्रस्यापि ब्रह्मान्यभाववस्तुन्युपलब्धेर्भावाद् दृश्यत्वात् प्रपञ्चो मिथ्येत्यर्थः कृतः। तथा च साक्षादेव दृश्यत्वेन मिथ्यात्वानुमानमित्यर्थः। 'मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' इति सूत्रमपि स्वप्नप्रपञ्चस्य मिथ्यात्वं वदत् तद्दृष्टान्तेन जागरितप्रपञ्चस्यापि मिथ्यात्वानुमानसंभवात् दृष्टान्तसमर्थकतया प्रपञ्चमिथ्यात्वे प्रमाणम्।

सूत्रस्यायमर्थः—मायामात्रं प्रतिभासव्याप्यसत्ताकमात्रं स्वाप्नवस्तु कार्त्स्न्येन देशकालादिनाऽनभिव्यक्तमप्रामाणिकं स्वरूपं यस्य तत्त्वात्। यत्तु मायाशब्द आश्चर्यवाची „जनकस्य कुले जाता देवमायेव निर्मिता" इत्यादिप्रयोगाद् जीवस्य सत्यसंकल्पादियुक्तस्यापि संसारदशायां कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादित्यर्थः। ततश्च जीवः स्रष्टुमसमर्थः, ईश्वर एव स्वाप्निकपदार्थस्रष्टेत्यर्थ इति व्याचक्रुः। तत्र मायाशब्दस्यातात्त्विकेष्वेव लौकिकमायाव्यादिनिर्मितपदार्थेषु प्रयुक्तत्वादशब्दार्थत्वम्। आश्चर्यमित्यर्थकरणेऽपि कथमाश्चर्यत्वमिति विवेचनीयम्। यदि यन्नियतकारणैर्न जन्यते तदेवाश्चर्यम्, तदा वैदेह्या अपि लोकोत्तरसौन्दर्याद् अघटितघटनारूपत्वेन मिथ्यात्वशङ्कयैवाश्चर्यरूपत्वोत्प्रेक्षणम्। किं च कार्त्स्न्येनानभिव्यक्तस्वरूपत्वं स्वाप्निक-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पदार्थेऽन्वेति स्वरसतः। तत्परित्यज्य जीवेऽन्वयो न युक्तः, तत्र जीवस्यापक्षत्वात् सन्ध्ये सृष्टेरेव पक्षत्वात्। तत्रोक्तरीत्या हेतोरनन्वयात्। परम्परासंबन्धस्तु न हेतुतानियामक इति बोध्यम्। 'यावद्विकारं तु विभागो लोकवत्' इतिसूत्रं सर्वस्य प्रपञ्चस्योत्पत्तिमत्त्वमभिदधाति। विकारमनतिक्रम्य विभागो विकारव्याप्य इति यावत्। तथा च यत्र यत्र विभक्तत्वं तत्र विकारत्वमिति व्याप्त्या प्रपञ्चसामान्यस्य विकारत्वं ब्रह्मणस्त्वविभागत्वेन भेदशून्यत्वमवगम्यते। भेदशून्यत्वं च दृश्यमानभेदस्य ब्रह्मण उत्पन्नस्य मिथ्यात्वेनैव निर्वहति--इति प्रपञ्चमिथ्यात्वम्। अत्र च विभागपदस्योत्पत्तिपरत्ववर्णनं केषाञ्चिदयुक्तम्, विभागपदस्याविभागो वचनाद-विभागेन दृष्टत्वादित्यादौ भेदपरत्वेन सूत्रकारैरुक्तत्वात्, लोके भेदपरत्वेनैव प्रसिद्धेश्च। अत एव केचिन्नैयायिका भेदेनैवोपपत्तौ विभागगुणं प्रत्याचख्युः।

'असंभवस्तु सतोऽनुपपत्तेः' इति सूत्रमपि ब्रह्मणः सत्पदेन व्यवहारात् तद्भिन्नस्य प्रपञ्चस्यासत्त्वं सूचयति।

इदानीं जीवब्रह्मणोः कीदृशं स्वरूपं सूत्रकाराभिमतमिति विविच्यते—

ईश्वरस्वरूपविचारः।

तथा हि—ईश्वरस्वरूपनिरूपणे 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इति सूत्रम्। अस्यार्थः---परस्य ईश्वरस्य सविशेषश्रुतिसिद्धं, सविशेषत्वं ग्राह्यम्, उत निष्कलं निष्क्रियं शान्तमित्यादिश्रुतिसिद्धं निर्विशेषत्वमिति संशय्य स्वतोऽपि न सविशेषत्वं नाप्युपाधितः, इति निर्णीतम्। 'न भेदादिति चेन्न प्रत्येकमतद्वचनात्' इत्युत्तरसूत्रे प्रत्युपासनं भिन्नाकारयोगो ब्रह्मणः श्रूयत इति चेन्न। यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स इति प्रतिपर्यायम् अध्यात्माधिदैवतयोरभेदावगमात्। तथा च भिन्नाकारयोगो ब्रह्मणि कल्पित इति तात्पर्यम्।

'अपि चैवमेके' इति सूत्रे च 'एव' पदेन 'न भेदादिति चेन्न' इत्यंशमनुकृष्यते, तथा च भेदनिन्दापूर्वकमित्यर्थः, अतद्वचनादित्यस्य अभेदवचनादित्यर्थः। तथा च भेदनिन्दापूर्वकमभेदवचनमित्युक्तं भवति। तच्च "मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिकम्, तथा 'भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्' इति च समस्तस्य भोग्यभोक्तृनियन्तृलक्षणस्य प्रपञ्चस्य ब्रह्मैकस्वभावतामधीयते।

ब्रह्म च निराकारमित्यत्र सूत्रम्—'अरूपवदेव हि तत्प्रधानत्वादिति'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनेन च ब्रह्म अरूपवद् निराकारमेव। यतो निर्गुणत्वप्रतिपादकानि वाक्यानि स्वप्रधानानि सगुणवाक्यानि न तत्प्रधानानि, अपि तूपासनाविध्यर्थानि। ततश्च तेषां ब्रह्मणि गुणप्रतिपादने न तात्पर्यम्, अपि तूपासनाविधावेव तात्पर्यमित्युक्तं भवति। यत्त्वरूपवदित्यस्य रूपरहिततुल्यमित्यर्थः शरीरित्वनिबन्धनं कर्मवश्यत्वं नास्तीति व्याख्यानम्, तल्लक्षणाभ्युपगमात् संभोगप्राप्तिरितिचेन्न, वैशेष्यादिति सूत्रेण समानार्थकेन पौनरुक्त्याच्च न तथा अर्थवत्।

एवमेव "प्रकाशवच्चावैयर्थ्यात्; आह च तन्मात्रम्" इति सूत्राभ्यां यथा प्रकाशोऽङ्गुल्यादिसम्बन्धाद् नानाकारतां भजते औपाधिकीम्। तथा ब्रह्माप्यविद्योपाधिसम्बन्धाद् नानाकारभाक्। अत एवोपासनाविधिपराणां शास्त्राणामवैयर्थ्यमिति। एवं 'प्रज्ञानघन एव' इति श्रुत्या चैतन्यमात्रं ब्रह्मणः स्वरूपमित्यभिप्रायः सूत्रकारस्य लक्ष्यते। ये तु 'प्रकाश' शब्दस्य ज्ञानार्थकत्वमङ्गीकृत्य "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तज्ञानरूपत्ववत् सर्वज्ञत्वसत्यसंकल्पत्वादिकं तत्तद्बोधकश्रुतिवशादङ्गीकार्यम्, न 'सत्यं ज्ञानम्' इति श्रुतज्ञानस्वरूपमात्रं ब्रह्मेत्यर्थे सूत्रं व्याकुर्वन्ति, तेषां प्रकाशपदस्य प्रकाशसामान्यार्थकस्य ज्ञाने लक्षणाङ्गीकारो दोषः। अपि च पूर्वसूत्रे 'ब्रह्म निराकारम्' इत्युक्ते साकारवादिश्रुतीनां गतिप्रदर्शनार्थत्वेन प्रकाशवच्चावैयर्थ्यमित्यस्य सार्थक्ये संभवति, सत्यसंकल्पत्वश्रुत्यवैयर्थ्यप्रदर्शनस्य प्रकृतानुपयोगः। तेषामुभयलिङ्गत्वे सिद्धान्तितेऽन्यतरावैयर्थ्यविधानस्य व्यर्थत्वात्। यदि सगुणलिङ्गश्रुतीनामवैयर्थ्यायेदं सूत्रम्, तर्हि निर्गुणलिङ्गावैयर्थ्याय किमिति सूत्रान्तरं न प्रणीतमिति प्रश्नावतारात्। आह च तन्मात्रमित्यनेन ज्ञानरूपतामात्रत्वबोधने इतरगुणनिषेधोऽर्थसिद्धः, मात्रपदस्वारस्यात्। इतरगुणानामपि पारमार्थिकत्वे ज्ञानमात्रत्वबोधनं सूत्रकारस्यासमञ्जसमेवेति।

"दर्शयति चाथो अपि च स्मर्यते" इति तदुत्तरसूत्रेण तन्मात्रत्वं निर्गुणत्वं दर्शयति, तच्च स्मृतिष्वपि स्मर्यत इत्यर्थः। 'कल्याणगुणाकरत्वं दर्शयति' इति व्याकुर्वतां तु आह च तन्मात्रमित्यव्यवहितसूत्रार्थं परित्यज्यान्यार्थकल्पनं दोषः। अत एव च 'उपमा सूर्यकादिवत्" इत्युत्तरसूत्रेण परमात्मनोऽपारमार्थिकीं विशेषवत्तामभिप्रेत्य—

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥

इत्यादौ जलसूर्यकोपमा प्रदर्शिता शास्त्रेणेत्यर्थकेनापि ब्रह्मण उपाधिमत्त्वादिकमपारमार्थिकमिति स्पष्टम्, यत्तु यथा सूर्यप्रतिबिम्बस्तत्र तत्र स्थितोऽपि निर्दोषः, एवमात्मा तत्र तत्र स्थितोऽपि न तत्तत्स्थानप्रयुक्तदोषवानित्यर्थं इति तदपि 'संभोगप्राप्तिरिति चेन्न वैशेष्यात्' इत्यनेन गतार्थत्वात् सूत्रवैयर्थ्यं प्रसञ्जयति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'अम्बुवदग्रहणात्तु न तथात्वम्' 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्' इति सूत्राभ्यां यथा सूर्यस्य प्रतिबिम्बयोग्यं दूरस्थं जलं गृह्यते तथा आत्मनो विप्रकृष्टदेशा उपाधयो न गृह्यन्ते, सर्वगतत्वात् सर्वानन्यत्वाच्चात्मन इति पूर्वपक्षं कृत्वा वृद्धिह्रासभाक्त्वं यथा जलगतं सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, न तु परमार्थतः सूर्यस्य तथात्वमस्ति तथा पारमार्थिकमविकृतमेकरूपमपि ब्रह्म उपाध्यन्तर्भावादुपाधिधर्मान् भजते न स्वत इति सिद्धान्तितम्।

अत्र चाम्बुनि यथा सूर्यादयोऽपरमार्थतया गृह्यन्ते, न तथा पृथिव्यादिषु, तत्र परमार्थतयैव परमात्मग्रहणात्। ततश्च पृथिव्यादिगतदोषाः परमात्मनि स्युरिति पूर्वपक्षं प्राप्य वृद्धिह्रास-सूत्रेण यथा जलादिप्रतिबिम्बितसूर्यो न तद्गतवृद्धिह्रासादिभाक्, एवं परमात्मनः पृथिव्यादिस्थत्वेऽपि न पृथिव्यादिगतदोषभाक्त्वमिति व्याकुर्वन्ति केचित्।

अत्रेदं वक्तव्यम्—

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥

इति मन्त्रे 'एकधा बहुधा चैव' इत्यनेन दृष्टान्तदार्ष्टान्तिकयोः समानधर्म उपदिष्टः। यथा बहुषु जलेषु प्रतिबिम्बितः सूर्यो बहुधा दृश्यते, परमार्थतस्त्वेक एक नभसि दृश्यते, एवं ब्रह्म प्रतिशरीरं भिन्नत्वेन तत्तत्प्राणिगतैर्गुणैर्भिन्नतया विभाव्यमानमपि वस्तुगत्यैकमेवेति दृष्टान्तदार्ष्टान्तिकभावसंगतिः। अत एव च "उपमा सूर्यकादिवत्" इति सूत्रे चायमेवार्थ उपष्टम्भकतया नेतव्यः। स एव च 'अरूपवदेव हि तत्प्रधानत्वात्' इत्यारभ्य प्रकृतः। एवं सति केषाञ्चिद्व्याख्यानेऽस्य मन्त्रस्य "यथा तत्र तत्र स्थितः सूर्यो निर्दोषः" इत्यंशे साधर्म्योदाहरणं कथं घटेत 'संभोगप्राप्तिरिति चेन्न वैशेष्यादि'त्यनेन समानन्यायतया गतार्थं च। अत एव अम्बुवदग्रहणात्तु न तथात्वं वृद्धिह्रासभाक्त्वमित्यादिसूत्राभ्यां दोषसत्त्वशङ्कातत्समाधाने नातीव समञ्जसे दोषाभावसमर्थनपरत्वे वृद्धिह्रासभाक्त्वसूत्रेण दृष्टान्ते वृद्धिह्रासभाक्त्वसमर्थनपरेण विरोधश्च। किञ्च, "निरवद्यं निरञ्जनं न लिप्यते लोकदुःखेन बाह्य" इत्यादिश्रुतिषु कण्ठत एव ब्रह्मणो दोषाभाववादिषु सत्स्वेतानि सूत्राणि दोषाभावसमर्थनपरत्वेन योजने व्यर्थप्रायाण्येवेति।

'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' इति सूत्रे 'अथात आदेशो नेति नेति न ह्येतस्मादिति नेति अन्यत्परमस्ति' इति बृहदारण्यकश्रुतौ 'नेति, नेति' इत्याभ्यां निषेधाभ्यां किं ब्रह्म प्रपञ्चश्चेत्युभयं निषिध्यते, उत प्रपञ्चमात्रमिति सन्दिह्य प्रकृतं यदेतावत्त्वमेतावदित्यर्थः,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"विशिष्टाद् भावप्रत्ययो विशेषणमभिधत्ते" इति न्यायात् तस्य प्रतिषेधः, न तु ब्रह्मणः; यतः 'अन्यत्परमस्ति' इत्यनेन भूयः परमात्मसत्तां ब्रवीति श्रुतिरित्यर्थः। अनेन च प्रपञ्चनिषेधेन प्रपञ्चमिथ्यात्वं ब्रह्मसत्यत्वं च स्पष्टमेव प्रतीयते।

अत्र मतान्तरम्।

यत्त्वत्र श्रुतिव्याख्यानं यद् मूर्तामूर्तरूपद्वयं विग्रहवत्त्वं चोक्तम्, ईदृशाचेतनमात्रप्रकारकं न ब्रह्म, किन्तु चेतनप्रकारकमपीति भूयोंशकथनाय निषेधद्वयम्। सूत्रस्य चायमर्थः—एतावत्त्वं परिच्छिन्नत्वं प्रकृतमात्रवत्त्वं निषेधति, यतोऽन्यद् गुणजातं वक्तव्यं ब्रवीतीति सगुणपरतया सूत्रार्थवर्णनम्, तत्रापीदं चिन्तनीयम्—इयत्तापरिच्छिन्नमेतावन्मात्रवत्त्वं ब्रह्मणि नास्तीत्युक्ते उपरि यदधिकं वर्तत इत्यभिप्रेतम्, तदेव हि वक्तव्यम्। अत्र तु तादृशं भवदभिप्रेतचेतनप्रपञ्चरूपं वस्तु नोच्यते, ब्रह्मैवोच्यते। अस्मद्व्याख्याने तु ब्रह्मणः प्रतिषेधो नाभिप्रेतः, उपर्यन्यत्परमस्तीत्यनेनाचेतनादुत्कृष्टचेतनप्रतिपादनेन सामञ्जस्यम्। यत्तु न हि अनुन्मत्तः प्रमाणान्तरप्रमितमप्रमितं च ब्रह्मणो विशेषणतया प्रतिज्ञाय तदेव निषेधतीत्यद्वैतखण्डनं तदयुक्तम्, "यथोर्णनाभिः तन्तुनोच्चेरेत् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्तीत्युक्त्वा प्राणा वै सत्यं तेषामेष सत्यम्" इत्यनेन प्राणोपलक्षितप्रपञ्चासत्यत्वोक्तेः, असत्यस्य निषेधावश्यंभावात्। अस्थूलादिवाक्येन ब्रह्मणः प्रपञ्चाभावबोधनस्य दुरपन्हवत्वात्। "द्वे वाव ब्रह्मणो रूपे" इति रूपवत्त्वोपपादनं किमर्थमिति चेत्, ब्रह्मणि प्रतिषिद्धस्य प्रदेशान्तरे सत्ताभ्रमवारणायेत्युक्तत्वात्।

जीवब्रह्मणोरन्यत्वमुपास्योपासकभावादभ्युपेयमित्याशङ्का प्रतिषेधति—"प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्" इति। यथा प्रकाशाकाशादिषूपाधिभेदाद्भेदः स्वाभाविकोऽभेदः। एवमुपाधिनिमित्तः कर्मणि उपासनायाञ्च जीवपरभेदः, अभ्यासादभेदावगमादिति। यत्तु प्रकृतैतावत्त्वमेव प्रतिषेधति, न मूर्तामूर्तादिविशिष्टत्वमित्युक्त्वा ज्ञानानन्दादिवद् मूर्तामूर्तविशिष्टताया अवैशेष्यं ब्रह्मगुणत्वाविशेषत्वं प्रकाशरूपज्ञानवत्त्वं च संराधनकर्मणि वामदेवादिभिरुपलभ्यत इति। अत्रेदं वक्तव्यम्—आत्मनो मूर्तामूर्तविशिष्टत्वं चेद्वक्तव्यं तत् श्रुतिवशादेव ज्ञायते, किमर्थं तत्र वामदेवादीनामनुभवोपन्यासः। किंच, अहं मनुरभवं सूर्यश्चेत्यनेन स्वस्य मनुजीवाद्यभेद एव प्रतिपाद्यते, न तु मूर्तादिविशिष्टत्वमिति। किञ्च, अभ्यस्तसंराधनानां ब्रह्म-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वरूपभूतप्रकाशानन्दावुपलभ्येतां नाम, मूर्तामूर्तादिविशिष्टत्वं कथमुपलभ्यते ? भगवद्ध्यानादौ सर्वज्ञत्वादिगुणवैशिष्ट्यस्यैव तत्तद्गुणविधिपूक्तत्वात्, मूर्तामूर्तवैशिष्ट्यस्याध्येयत्वात्।

'अतोऽनन्तेन तथाहि लिङ्गम्" इति सूत्रं चाभेदस्य स्वाभाविकत्वात्, अविद्याकृतत्वाच्च भेदस्य, विद्ययाऽविद्यां विधूय जीवः परेणैकतां गच्छतीत्युपपन्नम्। तथाहि—"स यो ह वै तत्परं ब्रह्मवेद ब्रह्मैव भवति'' इत्युक्तलिङ्गादित्यर्थकम्।

मतान्तरम्

केचित्तु—अत उक्तहेतुभिर्ब्रह्मणोऽनन्तेनानन्तसंख्याकेन कल्याणगुणगणेन विशिष्टत्वं सिद्धम्। तथाहि—'उभयलिङ्गमुपपन्नं भवति" इति व्याख्यातवन्तः। अत्र चानन्तपदस्य "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिप्रसिद्धब्रह्मस्मारणेन ब्रह्मपरत्वे संभवति, गुणपरत्वं न स्वरसम्। पूर्वप्रकृतत्वं चानन्तगुणानां नोपलभ्यते। लिङ्गमित्यस्य 'आकाशस्तल्लिङ्गात्' इत्यादिषु गमकलिङ्गपरत्वेन प्रसिद्धत्वात्। उभयलिङ्गपरत्वमपि न स्वरसम्। 'उभयव्यपदेशात्त्वहिकुण्डलवत्, प्रकाशाश्रयवद्वा तेजस्त्वात्, पूर्ववद्वा, प्रतिषेधाच्च" इति सूत्रचतुष्टयं जीवब्रह्मणोः संबन्धं वक्ति। संराध्यसंराधकभावेन स्मृतो जीवः, तस्य ब्रह्मणा संबन्धो वक्तव्यः। उच्यते—अहिरित्यभेदः कुण्डलाभोगादयः परस्परं भिन्नाः. यथा अहित्वेनाभेदः प्रांशुत्वविशिष्टात् कुण्डलित्वविशिष्टस्य भेदः। एवं ब्रह्मणोऽपि चैतन्यरूपेणाभेदः, जीवत्वेश्वरत्वरूपेण भेदः पारमार्थिक इति तात्पर्यम्। प्रकाशाश्रयसूत्रं तु यथा सूर्यस्तत्प्रभा च भिन्ने द्रव्ये प्रकाशत्वेन रूपेणाभिन्ने। एवं जीवपरयोर्भेद एव, अभेदस्तु चैतन्यरूपेणेति। एतदुभयं निराकृत्य स्वमतमाह—पूर्ववदिति। "प्रकाशादिवच्चावैशेष्यम्" इति पक्ष एव स्वाभिमतः। एकस्यैव ब्रह्मण औपाधिको भेदः। यथा प्रकाशाकाशादीनामङ्गुलीघटाद्युपाधिभेदाद् भेद इति तात्पर्यम्। प्रतिषेधाच्चेति सूत्रं नेति नेतीति प्रपञ्चप्रतिषेधाच्च चैतन्यमात्रं ब्रह्मेत्यर्थकम्।

अन्ये त्विमां चतुस्सूत्रीं जगद्ब्रह्मणोः संबन्धनिरूपणपरतया व्याचख्युः ब्रह्मैवेदं सर्वम्, आत्मैवेदं सर्वम्' इति तादात्म्यव्यपदेशात्। इमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य इति भेदव्यपदेशाच्च अहेः कुण्डल ऋजुभाववत् तस्यैव ब्रह्मणः संस्थानविशेषा एवाचिद्वस्तूनीत्येकः पक्षः। प्रकाशाश्रयवद्वा तेजस्त्वात्, यथा प्रभातदाश्रययोर्भिन्नयोरपि तादात्म्यम्। एवमचित्प्रपञ्चस्य ब्रह्मरूपत्वमित्यर्थः—पक्षद्वयमिदं व्यावर्त्य 'पूर्ववद्वा'' इति सूत्रेण पूर्वम् 'अंशो नानाव्यपदेशात्' इति यदुक्तं जीववत् पृथक् सिध्यनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वम् इत्यर्थकम्। प्रतिषेधाच्चेति सूत्रं 'स वा एष महानज आत्माजरोऽमरः' "नास्य जरयैतज्जीर्यति" इत्यादिभिर्ब्रह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यत्वेनैवांशांशिभाव इत्यर्थ इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मतान्तरविमर्शः

अत्रेदं वक्तव्यम्—जीवस्य वेदान्तेषूत्पत्तिर्न श्रुता । क्वचिदुपास्योपासकभावेन भेदः सूचितः, क्वचित् तत्त्वमसीत्यादावभेदः प्रतिपाद्यत इति जीवब्रह्मणोः संबन्धस्य निष्कर्षणीयत्वेन तं परित्यज्य जगद्ब्रह्मणोः संबन्धनिष्कर्षार्थत्वं कथं शोभते ? जगतो ब्रह्मणः सकाशादुत्पत्तिर्बहुषु स्थलेषु प्रतिपाद्यते । तथा चोपादानोपादेययोः संबन्ध एव तयोस्संबन्ध इति व्यक्ते को विशेषोऽस्मिन् सूत्रे प्रतिपाद्यते ? यदि प्रकारप्रकारिभावः, स नियम्यनियामकभाव एव, शरीरत्वस्य नियम्यरूपत्वात्। किञ्च 'पूर्ववद्वा' इत्यस्यातिसमीपस्थस्य "प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्" इति सूत्रपरामर्शकत्वे संभवति द्वितीयाध्यायतृतीयपादस्थसूत्रपरामर्शकत्वं नतरां युज्यत इति । पूर्वं तु बादरायणः "हेतुव्यपदेशात्" इति सूत्रे हि पूर्वपदं हि फलम् अत उपपत्तेरिति समीपस्थं सूत्रं परामृशति, न तु दूरस्थं किञ्चिदिति ।

जीवस्वरूपविचारः

इदानीमद्वैतब्रह्मसिद्ध्युपयोगितया जीवविषयाणि सूत्राणि विचार्यन्ते । तथाहि—वाक्यान्वयादित्यधिकरणे "प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः" इत्यादि सूत्राणि जीवस्वरूपप्रतिपादकानि । तत्रात्मनस्तु कामाय सर्वं प्रियं भवतीत्युपक्रमाद् जीवलिङ्गमुपक्रमेऽवगम्यते । तस्यैव चोपरितनेन "आत्मा वा अरे द्रष्टव्यः" इत्यादिवाक्येन द्रष्टव्यत्वमवगम्यते । तत्र यदि जीवो ब्रह्मणो भिन्नः स्यात्, तदा आत्मनि विज्ञाते सर्वं विज्ञातं भवतीति प्रतिज्ञा नोपपद्येत, ब्रह्मणोऽविज्ञातत्वात् । अतः प्रतिज्ञासिद्ध्यर्थं जीवोपक्रम इति आश्मरथ्यस्य मतम् । अस्मिन् मते जीवपरयोर्भेदाभेदौ । मृद्घटयोरिव मृत्त्वेनाभेदः, मृत्त्वघटत्वाभ्यां भेदः । जीवब्रह्मणोस्तु चित्त्वेनाभेदः, जीवत्वेश्वरत्वरूपावच्छेदकभेदाद् भेद इति तात्पर्यम् ।

'उत्क्रमिष्यत एवंभावादित्यौडुलोमिः' अस्मिन् मते जीवः संसारावस्थायामीश्वराद्भिन्न एव । तस्य ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहादुत्क्रमिष्यतोऽभेदो भवति । अतः संसारावस्थायामपि भविष्यन्तमभेदमादाय जीवरूपेणोपक्रम इति, तदुक्तम्—

> आमुक्तेर्भेद एव स्याद् जीवस्य च परस्य च ।
> मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः ॥ इति ।

'अवस्थितेरिति काशकृत्स्नः' अस्य परमात्मनो जीवरूपेणावस्थितेरुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्नाचार्यो मन्यते । तथा च श्रुतिः—"अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति । अत्र च सद् ब्रह्म जीवमात्मशब्देन निर्दिशदभेदं सूचयति, तत्त्वमसीत्यादिश्रुत्यनुसाराच्च । उत्तरत्र चाविभागेन दृष्टत्वादित्यादौ जीवब्रह्मणोरभेदप्रतिपादनाच्च ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र मतान्तरम्

अत्र केचित्। अवस्थितेरिति काशकृत्स्नः—इत्यस्य स्वशरीरभूते जीवात्मन्यात्मतयाऽवस्थितेः 'जीव'शब्देन ब्रह्मप्रतिपादनम्। जीवशब्दश्च जीवशरीरपरमात्मपर्यन्त इति पूर्वमेवोपपादितम्। अद्वैतिरीत्या औपाधिकस्य भेदस्यापारमार्थिकत्वे कस्यायमुत्क्रान्तौ ब्रह्मभाव इति वक्तव्यम्। ब्रह्मण एवाविद्योपाधितिरोहितस्वस्वरूपस्येति चेत्, नित्यमुक्तस्वप्रकाशज्ञानरूपस्य ब्रह्मणोऽविद्यया तिरोधानासम्भवात्। अतो नित्याविर्भूतस्य ब्रह्मभावे न कश्चिद् विशेष इत्याहुः।

अत्रेदं चिन्तनीयम्—अस्मिन् मते जीवात्मन्यवस्थितेरित्याधाराधेयभावो यः श्रूयते स नाभ्युपगन्तुं शक्यते, अणुषु जीवेषु सर्वगतस्य ब्रह्मण आधेयत्वायोगात्। जीवात्मन्यात्मतयावस्थानमित्यस्य शरीरितयेत्यर्थ इति चेत्, तर्हि शरीरगतदुःखादिकं शरीरिणि स्यात्। इदं शरीरत्व न भोगायतनत्वरूपम्, अपि तु नियामकत्वमात्रमिति चेत्, लोके नियामकेषु शरीरित्वाप्रसिद्धेः श्रुतिगतपदानां पारिभाषिकार्थत्वासंप्रतिपत्तेः। तथा नियामकत्वेन गौणव्यपदेशे सर्वो वेदो गौणतया कदर्थितः स्यादिति। नियामकत्वेनावस्थितिश्च घटपटादावपीश्वरस्य चेतनाचेतनशरीरत्वादिति, यत्तु ब्रह्मणः कथमविद्यावरणमिति तन्मते वा जीवस्य कथं कर्मात्मकाविद्यया तिरोहितस्वरूपस्य मुक्तौ आविर्भाव इति साम्यात्। ईश्वरस्य जीवं प्रत्येवावरणत्वम्, न स्वकार्ये। यथा मेघच्छन्न आदित्ये मनुष्याणामेवादित्याप्रकाशः, सूर्यस्तु प्रकाशत एव। सूर्यभिन्नमनुष्याः सन्ति न तु ते ब्रह्मणो भिन्ना जीवास्सन्तीति चेत्, अनादिजीवा अनाद्यविद्यया विभक्ताः सन्त्येवेति साम्यम्।

"नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः" इति सूत्रं जीवस्योत्पत्तिं निषेधति, सृष्टिप्रकरणेषु तस्य सृष्ट्यश्रवणात्। "न जीवो म्रियते न जायते म्रियते वा विपश्चित्" इत्यादिश्रुतिभ्यो जीवस्य नित्यत्वावगमाच्च।

तस्य ज्ञानरूपत्वम् "ज्ञोऽत एव" इति सूत्रेणोक्तम्। अत्र ज्ञः' इति न ज्ञानकर्ताऽभिधीयते, अपि तु ज्ञानमेव, कुतः! अत एव आत्मनो नित्यत्वादेव, नित्यत्वाद्धि तस्य ब्रह्माभिन्नत्वं सिध्यति, अन्यथैकविज्ञानेन सर्वविज्ञानायोगात्। ततश्च ब्रह्मणो ज्ञानरूपत्वाद् जीवोऽपि ज्ञानरूप एव, तस्य ज्ञातृत्वं तु व्यावहारिकं मन उपाधिकृतम्। अत एव 'ध्यायतीव लेलायतीव" इति 'इव'-कारानुबद्धा श्रुतिः। न च सुषुप्तौ ज्ञानाभावात् कथं ज्ञानरूपत्वमिति शङ्क्यम्, अत्रोक्तं समाधानं श्रुत्यैव, नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते, अविनाशित्वात्; न तु तद्द्वितीयमस्ति,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ततोऽन्यद्विभक्तं यत्पश्येदिति । एतदुक्तं भवति—विषयसंबन्धाभावादियमचेतयमानता, न तु स्वयमचेतनत्वादिति । सुषुप्तौ जीवः "स्वमपीतो भवति," "इमाः प्रजा अहरहर्ब्रह्म गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति, अनृतेन प्रत्यूढाः" इति च श्रुतिभ्यामपि जीवब्रह्माभेदः सिद्धः ।

जीवस्य परिमाणविचारार्थानि "उत्क्रान्तिगत्यागतीनाम्" इत्यारभ्य "पृथगुपदेशात्" इत्यन्तानि सूत्राणि पूर्वपक्षसूत्राणि जीवस्याणुत्वविषयाणि । "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" इति सिद्धान्तसूत्रम् । तत्र तु'शब्दस्य सिद्धान्तत्वद्योतकस्य सद्भावात् । अत्र तच्छब्देन मनः परामृश्यते । मनश्चोत्तरसूत्रे यावदात्मभावित्वाच्च न दोषः' इत्यत्र नित्योपलब्ध्यनुपलब्धिप्रसङ्गसूत्रेऽपि मनस आवश्यकत्वसाधनेन प्रकृतमिति नाप्रकृतपरामर्शः । न चोत्तरसूत्रस्थपरामर्शो न युक्तः, तस्य पूर्वप्रकृतपरामर्शित्वनियमादिति युक्तम् । उत्क्रान्तिगत्यागतीनामित्यत्राणुत्वबोधकपदाभावेऽपि नाणुरतच्छ्रुतेरित्युत्तरसूत्रेणाणुत्वनिषेधपरेण पूर्वमणुत्वं साधितमित्यवगन्तव्यत्वात् सर्वमतेऽपि । तदयमर्थः—

तस्य मनसो गुणाः, तद्गुणाः सुखादयः, उत्क्रान्त्यादयश्च,ते सारः प्रधानं यस्य जीवस्य संसारित्वे स जीवस्तद्गुणसारः, तत्त्वात् तस्योत्क्रान्त्यादिव्यपदेशः, स्वतस्तु जीवो ब्रह्मैव, तत्त्वमसीत्यादिश्रुतिभ्यः । तस्योत्क्रान्त्यादिकमुपाध्युत्क्रान्त्यधीनमिति च "कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि स प्राणमसृजत" इति श्रुत्याऽवगम्यते । तथा चात्रापि न जीवब्रह्मणोरभेदे कश्चिद् दोषः ।

जीवस्य कर्मादिकर्तृत्वेनाशुद्धत्वादकर्तृब्रह्माभेदो न संगच्छेत इत्यभिप्रेत्य तस्य कर्तृत्वमप्युपाधिकृतम्, न स्वाभाविकमिति निरूपयितुम् "कर्ता शास्त्रार्थवत्त्वात्" इत्यादीनि सप्त सूत्राणि । तैर्जीवस्य कर्तृत्वं प्रसाध्य, इदं कर्तृत्वं सोपाधिकम्, न स्वाभाविकमिति यथा च तक्षोभयथा" इत्यधिकरणेन प्रासाधि । यथा तक्षा स्वयमक्रिय एव वास्यादिकरणैश्च तस्य कर्तृत्वम्, तथा जीवः स्वभावतो ब्रह्माभिन्नत्वादकर्तापि मनआदिसमायोगात् कर्तेति तदर्थः । तस्योपाधिधर्माध्यासेनैव कर्तृत्वम्, न स्वाभाविकमिति च "ध्यायतीव लेलायतीव" इति श्रुत्या सिद्धम् । ध्यायन्त्यां बुद्धौ ध्यायतीव जीवः, चलन्त्यां बुद्धौ च चलतीव । न स्वभावतो ब्रह्माभिन्नत्वादिति तदर्थः । न च विधिशास्त्रम् 'यजेत दद्यात्' इत्यादिकं जीवस्य कर्तृत्वं प्रतिपादयति, अपि तु स्वाभाविकं कर्तृत्वमनुवदत्यन्यद् यागादिकं विधातुम् ।

अत्र मतान्तरविचारः ।

अत्र मतान्तरीयाः "ज्ञोऽत एव" इति सूत्रस्य ज्ञातृत्वमस्य स्वाभाविकमित्यर्थं ब्रुवते । तत्तु "ध्यायतीव लेलायतीव" इति श्रुतौ 'इव'कारानुबन्धात् तद्विरुद्धं ज्ञातव्यम् । अपि च अत

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवेत्युपष्टंभासङ्गतिः, नित्यत्वाभावेऽपि ज्ञानकर्तृत्वसंभवात् । "उत्क्रान्तिगत्यागतीनाम्" इत्यादिसूत्राणि तस्याणुत्वसाधकतया सिद्धान्तत्वेन च व्याकुर्वन्ति केचित् । तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवदिति सूत्रस्य विज्ञानगुणसारत्वादात्मनो विज्ञानमिति व्यपदेश इति च व्याकुर्वन्ति । विज्ञानस्य यावदात्मभाविधर्मत्वात्, तेन तद्व्यपदेशो न दोषः । ननु सुषुप्त्यादिषु ज्ञानाभावान्न तस्य स्वरूपानुबन्धि धर्मत्वम्, अत आह "पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्" इति । सुषुप्त्यादावपि अहमर्थः प्रकाशते, तस्य विद्यमानस्यैव विषयसंबन्धो जागर्यादौ, सुषुप्तौ च कर्माख्याविद्यया प्रतिबन्धः । तथा च विद्यमानस्यैव कदाचिदभिव्यक्तिः पुंस्त्वादिवदिति व्याचक्षते ।

अत्र च जीवस्याणुत्वे स्वाभाविके "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः" इति गीताविरोधः । एककाले सर्वशरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गः । संकोचविकासशालिज्ञानाश्रयत्वे च सविकारत्वप्रसङ्गेनानित्यत्वप्रसङ्गः, तदुक्तम्—"उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्" इति ।

किञ्च 'तद्गुणसारत्वातु' इत्यत्र 'तु'शब्दप्रयोगादस्य सिद्धान्तसूत्रत्वं गम्यते । विज्ञानपदेन तस्य व्यपदेशः कथमिति शङ्काव्यावृत्यर्थत्वं तु नातीव मुख्यं प्रयोजनम्, यतो ज्ञानमिति व्यपदेशवदेव विज्ञानमिति, विशिष्टं ज्ञानं विज्ञानमित्यर्थे व्यपदेशोपपत्तेः । विज्ञानगुणत्वेन विज्ञानव्यपदेशः । प्राज्ञस्यानन्दगुणत्वेनानन्दव्यपदेशवदित्युक्तिः पक्षसमा । आनन्दरूपत्वेन ह्यानन्दव्यपदेशो ब्रह्मणि, तद्वद् जीवे विज्ञानरूपत्वेन विज्ञानव्यपदेशोपपत्तिः इत्थं सूत्रद्वयं विज्ञानगुणसंबन्धसद्भावे प्रमाणमेतन्मते । अद्वैतिनां मते त्विदं बुद्धिसंबन्धादेवात्मनः संसारित्वप्रदर्शनपरमिति विशेषः ।

कर्ता शास्त्रार्थवत्त्वादित्यधिकरणसिद्धं कर्तृत्वं न स्वाभाविकम्, अपि त्वौपाधिकमिति निरूपयितुं यथा च तक्षोभयथेति सूत्रमद्वैतमते । एतन्मते त्वात्मनः कर्तृत्वेऽभ्युपगम्यमाने सर्वदा कर्तृत्वप्रसङ्गवारणाय यथा च तक्षोभयथेति सूत्रम् । तत्र चायं दोषः—कर्तृत्वं नाम क्रियानुकूलशक्तिः, सा च सर्वदा वर्तत एव । विषयसंभवे कर्तृत्वं प्रकाशते, तदभावे न प्रकाशत इत्युक्तिः सुलभा स्वाभाविककर्तृत्वाभ्युपगन्तुः । अत एव तक्षदृष्टान्तो नापेक्षितः । आत्मनः शुद्धचैतन्यरूपता, कर्तृत्वं चौपाधिकमिति वदतां त्विदं सूत्रं सुतरां संगच्छते । यथा तक्षा स्वशरीरेणाकर्ता वास्यादीनि करणान्यपेक्ष्य कर्ता इत्यर्थाङ्गीकारे आत्मा शुद्धः, तस्य कर्तृशक्तिरपि नास्ति मनआद्युपाधिभिस्तस्य कर्तृशक्तिः कर्तृत्वं चेत्यर्थे सौष्ठवम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" इति सूत्रं जीवब्रह्मणोः संबन्ध प्रतिपादयति । तत्र जीव ईश्वरस्यांशभूतः । इदं चांशत्वम् 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः, तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति'' इति मन्त्रे जीवानामग्निविस्फुलिङ्गदृष्टान्तोक्तेस्तन्न्यायेन नेतव्यम् । तत्र यथा विस्फुलिङ्गो महतोऽग्नेरंशः, एवं जीवो महतो ब्रह्मणोंऽश इत्यर्थः । अत्रांशोऽवयवो दृष्टान्ते, दार्ष्टान्तिके तु तत्तदन्तःकरणावच्छिन्नचैतन्यस्याल्पत्वात्, उपाधिभिर्भिन्नत्वाच्चौपचारिकमंशत्वम्, यथा घटाकाशो महाकाशांश इतिवत् । ब्रह्मैव सन् जीव उपाधिना परिच्छिन्न इत्यर्थः । अत एव तस्य पारमार्थिकं रूपं ब्रह्मैवेति सूचकं श्रुतिवाक्यमाह-"दाशकितवादित्वमधीयत एके, ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवाः" इत्यादि । अनेन च जीवानां ब्रह्मरूपत्वं स्पष्टमेव प्रतीयते ।

सूत्रनिबद्धा अंशत्वे युक्तिरप्यद्वैतानुकूला । नानाव्यपदेशादन्यथा चापीति हि पठ्यते । नानाव्यपदेशो भेदव्यपदेश आत्मा द्रष्टव्यः, आत्मानमन्तरो यमयतीत्यादिः । अन्यथा व्यपदेशोऽनानात्वव्यपदेशस्तत्त्वमसीत्यभेदोक्तिः । आभ्यां व्यपदेशाभ्यामंशत्वं जीवस्येत्यर्थः । अत्र न तावदवयवत्वरूपं मुख्यांशत्वं वक्तुमर्हम्, ब्रह्मणो निरवयवत्वात्, "निष्कलं निष्क्रियं शान्तम्" इति श्रुतेः । अपि त्वेतादृशमेव । अंशत्वे श्रुत्यन्तरं स्मृतिं च प्रदर्श्य सूत्रकारः "आभास एव च" इति सूत्रेणेदृशमेवांशत्वं श्रुत्याऽभिप्रेतमिति दर्शयति । जीवो ब्रह्मण आभास एव, जलसूर्यकादिवत् । अतः कर्मफलासाङ्कर्यादिकमुपपन्नमित्यर्थः । आभासत्वं च "यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन् ;

उपाधिना क्रियते भेदरूपः देवः क्षेत्रेष्वेवमजोऽयमात्मा ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति च श्रुत्योः स्पष्टमुक्तम् ॥

मतान्तरविचारः

अत्र केचिद् जीवस्येश्वरांशत्वं शरीरिभावेन चिदचिद्विशिष्टत्वादीश्वरस्य तद्विशेषणस्य जीवस्येश्वरांशत्वमित्याहुः । यथा विशेषणांश इति । एवं सति शुक्लगुणविशिष्टघटस्य शुक्लगुणोंऽश इति स्यात् । विशेषणस्य विशिष्टांशत्वमौपचारिकम्, न मुख्यम् । अमुख्यांशत्वपरिग्रहे औपाधिकांशत्वस्वीकारे को दोषः ? सृज्यत्वनियम्यत्वादिकं त्वद्वैतरीत्यापि निर्वहत्येव । केवलमद्वैतश्रुतीनामन्यथाकरणमेव दोषः । "आभास एव च" इति सूत्रस्येत्थं तेषां व्याख्या-ननु भ्रान्तब्रह्मजीववादेऽपि सर्वमेतदुपपन्नमित्यत आह-'आभास एव च'' इति । अखण्डैकरसस्य प्रकाशमात्ररूपस्य स्वरूपतिरोधानपूर्वकोपाधिभेदोपपादनहेतुराभास एव । हेत्वाभास एव, न सद्धेतुरित्यर्थः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रेदमालोचनीयम्--अद्वैतिभिः एवं श्रुतिबलेन साध्यते, तत्र हेतवोऽद्वैतिभिरुक्ताः, अभासा इत्युक्तिः कथं घटते ? किञ्च, यदि सूत्रकारोऽद्वैतखण्डनार्थत्वेनेदं सूत्रं प्रणीतवान्, तर्ह्यद्वैतसंप्रदायः सूत्रकारेभ्यः प्राचीन इति श्रुतीनामद्वैतप्रक्रियया व्याख्यानं प्राचीनमिति च सिद्ध्यति । एवं सत्यद्वैतिनः स्वप्रक्रियां बौद्धेभ्य आजह्रुः, प्रच्छन्नबौद्धा इति कथमुच्यते ? श्रुत्यर्थ एव केनचिदंशेन बौद्धैः परिगृहीत इति हि वक्तव्यत्वात् । किञ्च मतान्तरखण्डनं चेदभिप्रेते तस्य तर्कपादेऽवसरः नात्र किञ्च, जीवेशावाभासेन करोति, माया चाविद्या च स्वयमेव भवतीति श्रौ प्रयोगे आभासपदमस्ति, तत्समानार्थत्वे सूत्रस्य श्रुत्यैकार्थ्यं भवति, श्रुत्यर्थनिर्णायकत्वात् सूत्राणाम् । अपि च यत्र विषये सूत्रकारस्य विमतिः, तत्र स्वयं दूषणविशेष एवोच्यते–परं जैमिनिर्मुख्यत्वात् कार्यं बादरिरस्य गत्युपपत्तेरित्यादौ न तु क्वचिदपि हेतुविशेषमनुक्त्वा सूत्रकारो "हेत्वाभास एव च" इति सम्मुग्धाकारेण ब्रवीति । सूत्रकारसंप्रदायो नैतादृशः । 'स्वपक्षदोषाच्च' इति तु ब्रह्मवादिमते परोक्तदोषाणां विशिष्य परमते आपादनम्, न तु सामान्यरूपेणेत्यदृष्टान्तः ।

"अदृष्टानियमात्" इत्यादीनि त्रीणि सूत्राणि बहवो विभवश्चात्मान इति तार्किकपक्ष-निराकरणार्थानीत्यद्वैतसम्प्रदायः ।

केचित् त्वद्वैतवादेऽप्युपाधिहेतुभूताऽनाद्यदृष्टवशात् सुखदुःखव्यवस्था भविष्यतीति शङ्कावारणार्थमिति व्याकुर्वन्ति । परन्त्वद्वैतिभिरनाद्यदृष्टं नोपगम्यते, अदृष्टस्य धर्माधर्मरूपत्वेन जन्यत्वात् । प्रवाहानादित्वेऽपि तस्योपाधिं प्रति हेतुता नोपगम्यते । अन्तःकरणरूपोपाधि-स्त्वनाद्यविद्याप्रयुक्त इति वक्तुमुचितम् ।

ननु यदि जीवब्रह्मणोरभेदः सूत्रकारसम्मतः स्यात्, तदा "भेदव्यपदेशात्" इत्यादीनि जीवब्रह्मभेदप्रतिपादकानि सूत्राणि कथं संगच्छेरन्निति चेत्, उपासनाविषयविचारेषूपास्यस्वरूप-निरूपणार्थानि खलु तानि सूत्राणि । ततश्चोपासनार्थतया काल्पनिकभेदपराणि । अत एव यत्र पारमार्थिकं स्वरूपं प्रतिपिपादयिषति सूत्रकारः, तत्राभेदमेव शास्त्रार्थं मन्यते, यथा शास्त्र-दृष्टिसूत्रे, अत एव "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" इति सूत्रेणाभेदपक्षे दोषं प्रसज्य तद्वारणार्थम्, 'अधिकं तु भेदनिर्देशात्' इति वदन् सूत्रकार ईश्वरस्य जीवाधिकत्वमाह, न त्वन्यत्वम् । अधिकत्वमधिकोपाधिपरिच्छिन्नत्वप्रयुक्तम्, यथा घटाकाशादधिको मठाकाश इति । एवं ब्रह्मसूत्राणि पूर्वापरभावेन विमृश्यमानान्यद्वैतस्यैवानुकूलतराणि दृश्यन्ते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पूर्वमीमांसान्यायानां वेदान्तार्थनिर्णयोपयोगः

तृतीयं प्रवचनम्

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो नमो गुरुभ्यः ।

अद्य वेदान्तार्थनिर्णये पूर्वमीमांसान्यायाः परमोपकारका इतीमं विषयमधिकृत्य यथामति व्याख्यातुमभिलषामि ।

तत्र मीमांसाशब्दो मान पूजायामित्यस्माद्धातोः सन्नन्तान्निष्पन्नो मानेर्जिज्ञासायामिति वार्त्तिकानुरोधाद् जिज्ञासार्थकः, तथा चोभयमेलनेन पूजिता जिज्ञासा पूजितो विचार इत्यर्थः सम्पन्नः । वेदस्य पूजितत्वाद् वेदार्थविचारो मीमांसाशब्दार्थः । अत एव लौकिकधनधान्यादिविचारो न मीमांसापदेन निर्देशमर्हति । वेदगतकर्मकाण्डार्थविचारो महर्षिणा जैमिनिना प्रथमं द्वादशलक्षण्याम्, अनन्तरं चावशिष्टविचारात्मकेऽनेकेषामध्यायानामर्थैः संकीर्णे चतुरध्यायात्मके सङ्कर्षकाण्डे च प्रवर्तितः ।

जैमिनिना च "अथातो धर्मजिज्ञासा" इत्यनेन वेदाध्ययनानन्तरं धर्मविचारस्यैव प्रतिज्ञा कृता । तदनुसारेण च चोदनासूत्रे विधिज्ञाप्यस्यैव धर्मत्वमवधारितम् । "तस्य निमित्तपरीष्टिः" इति तृतीयसूत्रे च धर्मप्रमाणमेव परीक्ष्यत्वेन प्रतिज्ञातं परीक्षितं च । इत्थं च द्वादशाध्याय्यां संकर्षे च केवलं धर्ममेव विममर्श भगवान् जैमिनिः । संकर्षस्य देवताकाण्डमिति नामान्तरं तु कर्माङ्गदेवताविचाराणामत्र बहुलमुपलम्भादिति समादध्युः श्री-अप्पयदीक्षिताः स्वकृते परिमले । उपनिषदर्थविचारश्च न कृतो जैमिनिना । अत एव भट्टाचार्याः "इदत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन" इत्यात्मवादान्ते वदन्तः कर्मविचारमात्रेण न कृतार्थतेति वेदान्तविचारः पृथगावश्यक इति च सूचयामासुः ।

"अथातो ब्रह्मजिज्ञासा" इत्यारभ्य कृतो ब्रह्मविचारः कर्मविचारेण सहैकं शास्त्रमिति केषाञ्चित् पक्षः । पृथक् शास्त्रमिदमिति तु भगवत्पादाः । कुतः ? चोदनाविषयाणामर्थानां विचारस्तत्र संवृत्तः ! ब्रह्म तु न चोदनाविषयः, सिद्धरूपत्वात् । यदि ब्रह्मोपासनमेव मानसक्रियात्मकमुपनिषत्सु विधीयत इत्यास्थीयेत, तदा सर्वस्यापि विधेर्धर्मजिज्ञासया गतार्थत्वाद् "अथातो ब्रह्मजिज्ञासा" इति पृथक् शास्त्रं नारभ्येत । आरभ्यते तु तस्मादिदं पृथक् शास्त्रमेव । किञ्च, तत्र वेदाध्ययनवत एवाधिकारः । अत्र तु साधनचतुष्टयसम्पन्न एवाधिकारी, नाध्ययन-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मात्रवान्। शमदमाद्युपेतः स्यादिति शमदमादीनामावश्यकत्वस्य सूत्रेणैवोपरिष्टान्निर्देशात्। अधिकारो हि फलभोक्तृत्वसमानाधिकरणं कर्तृत्वम्, तादृशं कर्तृत्वं साधनचतुष्टयसम्पन्नानामेव भवेत्। वेदार्थज्ञानवतो मुख्याधिकारस्तु साधनचतुष्टयाभावे पूर्वकाण्डार्थनिर्णयवतोऽपि असंभवि, फलाप्राप्तेः। न च पूर्वकाण्डेन कर्मविचारयतो वैराग्यं संभवतीति नियन्तुं शक्यम्, तत्र कर्मफलानित्यत्वबोधकानां 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेव अमुत्र पुण्यचितो लोकः क्षीयते' इत्यादिवाक्यानामुपनिषद्गतानामविचारणात्। यदि कस्यचिज्जायेत, तदा तद्जन्मान्तरीयनिष्कामकर्मानुष्ठानवशादेव जायत इति वैराग्यमेव कारणमित्युक्तं भवति। तच्च कर्मविचाराद्वा भवतु, अस्मिन् जन्मनि विचाराभावेऽपि जन्मान्तरानुष्ठितकर्मभिरेव भवत्विति कर्मविचारः कुलालपितृवदन्यथासिद्धो ब्रह्मविचारे।

यत्तु नित्यानित्यवस्तुविवेकादिकं नाधिकारो ब्रह्मानित्यत्वप्रपञ्चानित्यत्वादेः "न वियदश्रुतेः", "असंभवस्तु सतोऽनुपपत्तेः" इत्याद्यधिकरणेष्वत्रैव व्यवस्थापनीयतया ब्रह्मविचारपूर्वभावित्वानुपपत्तेरिति दूषणं द्वैतविशिष्टाद्वैतशुद्धाद्वैतभाष्यकारैरुपक्षिप्तम्। तत्रेदं समाधानमाहुः—सुहृद्भिराप्तैरुपदिष्टनित्यानित्यवस्तुविवेकेन ब्रह्मविचारे प्रवर्तते पुरुषः, विचारेण च तस्य निर्णयो भविष्यतीति। अत एव सर्वेषामप्यपशूद्राणां ब्रह्मविचारेऽधिकार इत्याप्तमुखेनावधार्यैव ब्रह्मविचारे स्वयं प्रवृत्तिः। विचारेण च स्वयं स्वाधिकारस्य निर्णयः संपद्यते। अत एव च वेदाध्ययनं नित्यवत् कर्तव्यमित्याप्तमुखाच्छ्रुत्वा अध्ययने प्रवृत्तिः। अध्ययनानन्तरम् "स्वाध्यायोऽध्येतव्यः" इति वाक्येन तत्कर्तव्यतायाः पश्चादवगम उपपद्यत इति संप्रतिपन्नम्। अत एव यद्याप्तवाक्याद् नित्यानित्यवस्तुविवेकादिकं ज्ञायेत, तर्हि सर्वोऽपि ब्रह्ममीमांसार्थ आप्तमुखादेव ज्ञायताम्, मास्तु वेदान्तविचार इत्याक्षेपः प्रत्युक्तः, आप्तमुखादवगमेऽपि निर्णयार्थतया विचारावश्यंभावात्।

यत्तु ये ये वेदान्तार्थविचारात्मकं शास्त्रं पठितुमिच्छन्ति, तेषां सर्वेषामेवाधिकारः 'अथ' शब्दस्यारम्भार्थत्वाङ्गीकारादिति वल्लभाचार्याणां मतं तत्र शमदमादिरहितानां फलाभावात्, फलभोक्तृत्वसहितकर्तृत्वाभावादनधिकारः स्पष्ट एव। उद्दिष्टफलं विगणय्य, ख्यातिलाभार्थं वेदान्तविचारस्तु न केनापि प्रतिषेद्धुं शक्यते। अधिकारस्तु फलप्राप्तिगर्भितः साधनचतुष्टयसम्पन्नानामेवेति भगवत्पादाभिप्रायः।

अत एवेदं पृथक् शास्त्रम्। अस्मिन् शास्त्रे व्युत्पाद्यमानाः सिद्धब्रह्मपरवाक्यार्थनिर्णायकन्यायाः पूर्वतन्त्रव्युत्पादितेभ्यः कर्मपरवाक्यार्थनिर्णायकेभ्यो न्यायेभ्यो विलक्षणाः। अत एव न पूर्वतन्त्रेण गतार्थाः। यत्र तु पूर्वतन्त्रन्याय एव व्युत्पाद्यते, यथा "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" इति पूर्वतन्त्रद्वितीयचतुर्थपादगतशाखान्तरन्यायस्य पुनर्व्युत्पादनम्, तत्राप्यगतार्थत्व-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूचनाय 'भेदान्नेति चेन्नैकस्यामपि' इत्यधिकशङ्कामुपक्षिप्यागतार्थत्वमापादयति। एवं चास्मिन् स्वतन्त्रे वेदान्तशास्त्रे पूर्वमीमांसान्यायाः कया रीत्या वाक्यार्थनिर्णय उपकुर्वन्तीति विचारणीयम्।

तत्र ब्रह्मसूत्रकारा व्यासाचार्यास्तावत् पूर्वमीमांसासूत्राणि बहूनि स्वसूत्रेषु निबध्नन्ति स्वोक्तार्थसम्मतिप्रदर्शनव्याजेन।

व्यासाचार्याणां मीमांसान्यायसंचारः

तथाहि—"हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम्" इत्यस्मिन् तृतीयतृतीयपादगतसूत्रे श्रुत्यन्तरगतं विशेषं श्रुत्यन्तरेऽनभ्युपगच्छतः सर्वत्र विकल्पः प्रसज्येत। विकल्पश्चाष्टदोषदुष्टः, स च सत्यां गतौ नाभ्युपेतव्य इत्ययं विषयो जैमिनेरपि सम्मतः। 'अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात्, प्रतिषेधे विकल्पः स्यात्' इति दशमाध्यायसूत्रे विकल्पस्य दुष्टत्वाभिधानादित्युक्तम्। प्रकृते च यत्र सुकृत-दुष्कृतयोस्त्याग उच्यते "अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य" इत्यादौ (छान्दोग्ये) तत्र परैरुपायनमप्युपतिष्ठते, "प्रिया ज्ञातयः सुकृतमुपयान्ति, अप्रिया दुष्कृतम्" इति शाट्यायनिभिः पठितत्वात्, तस्यास्य चैकवाक्यत्वादिति निर्णीतम्।

एवं तत्रैव "अक्षरधियां त्ववरोधः" इत्यस्मिन् सूत्रे 'गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः' इत्यधिकरणमनुरुध्य अक्षरतन्त्रत्वात् तद्विशेषणानां यत्र क्वापि शाखायां विद्यमानानि विशेषणान्यक्षर उपसंहार्याणीत्युक्तम्। प्रदानवदेव तदुक्तमित्यधिकरणे संकर्षकाण्डीयनाना वा देवता पृथग् ज्ञानादित्यधिकरणं दृष्टान्तीकृत्य 'वायुर्वाव संवर्गः, प्राणो वाव संवर्गः" इत्युभयत्रोपासनाप्रयोगभेदः सिद्धान्तितः। यथा "इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराजे" इत्यत्र त्रिपुरोडाशिन्यामिष्टौ राजादिगुणभेदात्, याज्यापुरोऽनुवाक्याव्यत्यासविधानाच्च यागभेद इत्युक्तम्।

लिङ्गभूयस्त्वाधिकरणे श्रुतिलिङ्गसूत्रेण प्रकरणापेक्षया लिङ्गप्राबल्यात् पूर्वपक्षं कृत्वा विद्यैव तु निर्धारणादिति सिद्धान्त उक्तः।

सन्यासाश्रमोऽस्ति, न वेति सन्देहे "त्रयो धर्मस्कन्धा यज्ञः, अध्ययनम्, दानमिति। प्रथमस्तप एव, द्वितीयो ब्रह्मचार्याचार्यकुलवासी, तृतीयः सर्व एते पुण्यलोका भवन्ति "ब्रह्मसंस्थोऽमृतत्वमेति" इति वाक्ये ब्रह्मसंस्थताया इतराश्रमेष्वसंभवात् सन्यासिनामेव सम्भवादत्रैव सन्यास-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विधिरङ्गीकृतः, धारणवदिति सूत्रांशेन । यथा—"अधस्तात्समिधं धारयन्ननुव्रजेत्, उपरि हि देवेभ्यो धारयति" इत्यत्र दैवाग्निहोत्र उपरिधारणविधिरङ्गीकृत इति दृष्टान्तार्थः । अन्यान्यप्यधिकरणानि वेदान्तार्थनिर्णयायापेक्षितानि, उदाहरिष्यामः ।

शब्दादेव प्रमितः

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य स एवाद्य स उश्वः ॥

इति काठकवाक्येऽङ्गुष्ठमात्रपरिमाणं जीवमुद्दिश्येश्वराभेदो विधेयतया श्रूयमाणो न संगच्छते, विशिष्ट ईश्वराभेदासम्भवात् । विधेयानुसारेणोद्देश्यविशेषणस्याङ्गुष्ठमात्रत्वस्योपमर्दायोगादिति पूर्वपक्षस्याप्यग्निष्टोमाधिकरणन्यायेन समाधानं कृतम् । तथाहि —तात्पर्यविषयविधेयानुरोधेनोद्देश्योपमर्दोऽपि शास्त्रे दृश्यते । यथा—"अप्यग्निष्टोमे राजन्यस्य गृह्णीयात्" इत्यत्र राजन्यकर्तृकत्वे निमित्ते षोडशिग्रहयागाभ्यासविधौ यथाश्रुतेऽग्निष्टोमसंस्थाकक्रतौ षोडशिसंस्थाविधाने विरोधः, क्रतुप्रयोगवृत्तिस्तोत्रोपरमो हि संस्था, ततश्चाग्निष्टोमसंस्थः क्रतुः कथं वा षोडशिसंस्थः स्यात् ? अतोऽयमर्थः—राजन्यो यदा यजमानः, तस्याग्निष्टोमसंस्थो यः क्रतुः प्राप्तः स न तथा कर्तव्यः, अपि तु षोडशिसंस्थः कर्तव्य इति । तथा चात्र यथा तात्पर्यविषयविधेयानुरोधेनोद्देश्यस्वरूपोपमर्दः क्रियते, तथा अंगुष्ठमात्रो यो जीवः स तथा न मन्तव्यः, अपि तु भूतभव्येशितृसर्वव्यापिपरमात्माभिन्न इति । यद्यप्यत्र वाक्यार्थे भूतभव्येशितृत्वमपि त्यक्तव्यमेव शुद्धस्यैवाभेदे तात्पर्यात्, तथापि न दोषः, ब्रह्मलिङ्गानुरोधेन जीवलिङ्गोपमर्दे दृष्टान्तोपपत्तेरिति ।

प्रत्यक्षस्य शास्त्रबाध्यत्वम्

'घटः सन्' इत्यादेर्घटादीनां सत्त्वग्राहिणः प्रत्यक्षस्य "नेह नानास्ति किञ्चन" इति शास्त्रेणोपमर्दमङ्गीकृत्य प्रत्यक्षस्य व्यावहारिकसत्त्वविषयकत्वमङ्गीक्रियते । तत्रोपजीव्योपमर्दापेक्षयोपजीवकस्य शास्त्रस्यैवोपमर्दो लाक्षणिकार्थपरत्वरूपः कर्तुं शक्यते । तथा च नेह नानास्तीत्यादेः प्रपञ्चसत्त्वाविरोध्यर्थो ग्राह्य इति पूर्वपक्षे इतरमन्य इति तार्तीयन्यायाद् हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गादिति दाशमिकन्यायाच्च समाधानमुच्यते । तत्र कुण्डपायिनामयने "यो होता सोऽध्वर्युः" इत्यनेनाध्वर्युकर्मणि होतुः कर्तृत्वेन विधौ यूपपरिव्याणकाले 'परिवीरसि,' 'युवासुवासा' इत्यनयोः क्रियमाणानुवादिकरणमन्त्रयोः यथाक्रममध्वर्युणा होत्रा च प्रयोज्ययोरेककाले च प्रयोज्ययोर्होत्राकर्तुमशक्यत्वात् । अन्यतरबाध आवश्यके सति प्रत्यक्षश्रुतिविधीयमानाध्वर्युकर्मबाधायोगात्, आनुमानिकप्रकृतिवच्छब्दप्राप्तहोतृकर्मबाधः । अत्र यो होता सोऽध्वर्युरिति वचने होतुः प्राप्तिः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रकृतिवच्छब्देन तत्कर्मप्राप्तिरपि तथैव, तथा चाऽस्य वचनस्य प्रत्यक्षवचनत्वमिति कृत्वोपजीव्यं यत् 'प्रकृतिवद्विकृतिः कर्तव्या' इति वचनम्, तस्य बाधो होतृकर्मविषये संकोचरूपोऽङ्गीकृतः। 'हिरण्यगर्भः समवर्तताग्रे' इत्याघारमाघारयतीति वायव्यपशौ अयं मन्त्रः प्रजापतिदेवताके अमन्त्रे प्रथमाघारे प्रयोक्तव्यः, उत मन्त्रवति द्वितीयाघारे इति विचारे हिरण्यगर्भस्य प्रजापत्यभिन्नत्वेन प्रथमाघार औचित्ये सत्यपि द्वितीयाघार मन्त्रनियमादृष्टस्य क्लृप्तत्वात् प्रथमे तदभावात् तद-कल्पनप्रयुक्तलाघवानुरोधाद् द्वितीये मन्त्रनिवेश उक्तः। अत्रापि लाघवानुगृहीतस्योपजीवकस्य प्राबल्याद् उपजीव्यमन्त्रे क्लिष्टलक्षणा स्वीकृता। हिरण्यगर्भमन्त्रस्य इन्द्रपरतया व्याख्येयत्वात्। एवमिहपि षड्विधतात्पर्यलिङ्गोपेताद्वैतश्रुतिप्राबल्यात् प्रत्यक्षस्य व्यावहारिकविषयत्वकल्पनरूपो बाधः सोढव्य इति।

अत्रैव प्रथमप्रवृत्तत्वेन असञ्जातविरोधित्वेनोपक्रमन्यायात् प्रत्यक्षप्राबल्यमिति पक्षोऽप्यपच्छेदन्यायस्यैवात्र प्रवृत्तिमुपपाद्य निराकृतः।

पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम्।
अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥

इति सिद्धान्तात्।

अत्र च प्रत्यक्षशब्दयोः स्वकार्ये निरपेक्षत्वेनापच्छेदन्यायप्रवृत्तिः। किञ्चैकवाक्यस्थ-परस्परसापेक्षपदत्वेनोभयोः साम्ये सत्युपक्रमस्थवेदपदानुरोधेनोपसंहारस्थ-ऋगादिपदानां मन्त्र-वाचिनामत्र वेदपरत्वं निर्णीयते। प्रकृते तु तन्न्यायो न भवति, उभयोः साम्याभावात्। गृहीतप्रामाण्याकश्रुत्यपेक्षया भ्रमविलक्षणत्वेनानिर्णीतस्य प्रत्यक्षस्य दुर्बलत्वात्, अन्यथा 'इदं रजतम्' इति भ्रमोऽपि 'इयं शुक्तिः' इत्याप्तोपदेशापेक्षया प्रबलः स्यात्।

एवं 'यदाहवनीये जुहोति' इति सामान्यवाक्यस्य 'पदे जुहोति' इति विशेषवाक्येन बाधवत् घटसत्त्वग्राहिविशेषप्रत्यक्षेण 'नेह नानास्ति किञ्चन' इति सामान्यतो द्वैतमिथ्यात्व-बोधकश्रुतिबाधो भवत्विति शंका न संभवति, सामान्यविशेषन्यायो हि निश्चितप्रमाणकोभय-स्थले प्रकृते च प्रत्यक्षस्य प्रामाण्यमनिश्चितमिति समाधानम्।

'अथातो ब्रह्मजिज्ञासा' इत्यत्र बन्धस्याध्यासात्मकत्वं प्रदर्श्यते। यद्यपि 'तदनन्यत्वमा-रम्भणशब्दादिभ्यः' इत्यत्र प्रपञ्चसामान्यस्याध्यासात्मकत्वं साधयिष्यते, तत एव च बन्धस्या-प्यध्यासात्मकत्वं सिध्यतीति नेह प्रदर्शनीयमिति शङ्का पूर्वमीमांसान्यायमुपजीव्यैव निराक्रियते। तथाहि—तत्र 'अथातो धर्मजिज्ञासा' इत्यधिकरणे 'कर्म वा विधिलक्षणम्' इति नवमाध्याय-द्वितीयपादाधिकरणसिद्धं यदध्ययनस्यार्थज्ञानार्थत्वं तदेव शास्त्रारम्भोपयोगितया स्मर्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं नवमे 'यज्ञकर्मप्रधानम्' इति नवमप्रथमाधिकरणं सप्तमाध्यायसिद्धस्य धर्माणामपूर्वार्थत्वस्य स्मरणार्थम्। एवमेव ब्रह्मजिज्ञासासूत्रे तदनन्यत्वाधिकरणे व्यवस्थापयिष्यमाणबन्धमिथ्यात्वमेव स्मर्यते शास्त्रारंभोपयोगितयेत्येवं परिहारः ।

'आकाशस्तल्लिङ्गात्' इत्यत्र लिङ्गेन श्रुतिबाधः स्वीकृतः। प्रकृते लिङ्गं जगदुत्पत्तिस्थितिलयाधारत्वम्, तेनाकाशश्रुतिर्भूताकाशे रूढा बाध्यते ब्रह्मपरतया नीयते; तत्कथं ? श्रुतिलिङ्गाधिकरणे हि लिङ्गापेक्षया श्रुतेः प्राबल्यस्य सिद्धान्तितत्वादिति शङ्का। तस्य पूर्वतन्त्ररीत्या समाधानम्। पूर्वतन्त्रे ह्यनन्यथासिद्धं लिङ्गमन्यासिद्धश्रुतिबाधकमङ्गीकृतम्। यथा 'हस्तेनावद्यति, स्रुवेणावद्यति, स्वधितिनावद्यति' इत्यत्र हस्तस्रुवस्वधितीनामवदानसामान्यसाधनत्वश्रवणेऽपि हस्तादिगतसामर्थ्यरूपेणानन्यथासिद्धेन लिङ्गेन संकोचसहिष्णूनामवद्यतिश्रुतीनां पुरोडाशावदान-कठिनद्रव्यावदान–आज्यावदानपरतया संकोचरूपो बाधः स्वीकृतः। यथा वा 'कृष्णलं श्रपयेत्' इत्यत्र कृष्णलेषु स्वर्णखण्डेषु विक्लेदनफलकव्यापारासंभवात्, तत्रत्याधिश्रयणादिव्यापारस्योष्णीकरणमात्रे सामर्थ्यात्, वस्तुसामर्थ्यरूपेणानन्यथासिद्धलिङ्गेन श्रपणश्रुतेरुष्णीकरणे लक्षणा। आकाशवाक्ये चानन्तत्वलिङ्गं तात्पर्यवत्, अन्तवत्त्वदोषपरिहारार्थत्वेन वाक्यप्रवृत्तेः।

अत्रैव ब्रह्मलिङ्गानां बहूनामनुरोधेनैकस्याकाशश्रुतेर्बाधः "विप्रतिषिद्ध- धर्मसमवाये भूयसां स्यात् स्वधर्मत्वम्" इति द्वादशाधिकरणन्यायमनुरुध्य स्वीकार्यः। तत्रैव प्रधानविरोधे बहूनामप्यन्यथाकरणं संभवति "द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात्" इति न्यायात्। तथाहि—यत्र पशुयागे मुख्यः खदिरश्छेदनाद्यसमर्थो नियोजनमात्रसहो लब्धः, कदरस्तु प्रतिनिधितया स्वीकृतो तक्षणछेदनादिसकलसंस्कारसमर्थः, तत्र पशुनियोजनमात्रसमर्थत्वे खदिरस्य स एव ग्राह्यः, प्रधानार्थत्वादङ्गानां लोपेऽपि न क्षतिरिति न्यायः षष्ठे। तेन न्यायेन आकाशश्रुतेः प्राथम्येन बहूनां लिङ्गानां बाधो भवत्विति शङ्का अनन्तत्वलिङ्गस्य तात्पर्यवत्त्वमादायैव निराक्रियते।

एवं "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते" इत्यत्रैवकार इतरव्यवच्छेदार्थकः स्वसजातीयमेव मूलकारणान्तरं व्यवच्छिनत्ति। यथा-'गृहमेधीये आज्यभागौ यजतीत्यनेनावधारणार्थलक्षकेण स्वसजातीयं यागान्तरमेव व्यवच्छिद्यते' इत्युक्तं परिसंख्यापक्षे।

एवमुपक्रमे यत्र कश्चिद् दोषं संकीर्त्य तत्परिहारेणोपसंहारः, तत्र तन्मध्यगतवाक्येषु यथा अर्थाभ्युपगमेन तत्समाधानं भवति, तथा यतितव्यं प्रतिपादनीयस्यान्यशेषत्वाभावे, यथा—"जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ, उपांशुयाजमन्तरा यजति विष्णुरुपांशुयष्टव्योऽजामित्वस्य" इत्यस्मिन् वाक्यसन्दर्भेऽन्तरावाक्ये यागविधान एव दोषपरिहारो भवति, न तु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विष्ण्वादिवाक्ये तद्विधाने, इत्यतस्तत्रैव यागविधिः स्वीकृतः। तस्यान्यशेषत्वे तु नायं निर्बन्धः, यथा "यद्ग्राम्याणां पशूनां पयसा जुहुयात्, ग्राम्यान् पशून् शुचार्पयेत्, यदारण्यानामारण्यान्, जर्तिलयवाग्वा वा जुहुयात्, गवीधुकयवाग्वा वा, न ग्राम्यान् पशून् हिनस्ति नारण्यान्"। अत्र पशुहिंसादोषमापाद्य पयस आहुतिद्रव्यत्वं पराकृत्य जर्तिलादीनां द्रव्यत्वमुपक्षिप्तं तत्तु नाङ्गीक्रियते, यतस्तदनन्तरम् "अथो खल्वाहुः अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेति पयसाग्निहोत्रं जुहुयादिति जर्तिलादीनामहोम्यत्वं प्रतिपाद्य, पयोविधिरेवाङ्गीकृतः। अतः सर्वोऽयं पयोविध्यर्थवादः। तद्वदेवाकाशवाक्ये मध्ये सुवर्गस्याप्रतिष्ठितत्वप्रतिपादनेन सामकारणपरम्पराविश्रान्तिभूमित्वयोग्यं न भवतीति पृथिव्याः प्रतिष्ठितत्वेन तथात्ववर्णनं, न स्वार्थपरम्, अपि तु तस्या अपि दूषणेनानन्ते आकाशाख्ये ब्रह्मणि परिसमाप्तिपरमिति निर्णीयते।

'प्राणस्तथानुगमात्' इत्यधिकरणे 'येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थः" इति न्यायात् "त्वमेव मे ब्रूहि यं त्वं मनुष्याय हिततमं मन्यसे" इत्युपक्रमे "प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृतः" इत्युपसंहारे च ब्रह्मणः प्रतिष्ठितत्वात् प्रबलप्रमेयाश्रितं ब्रह्मवाक्यं दुर्बलप्रमेयाश्रिताद् जीवमुख्यप्राणविषयश्रुत्यादितः प्रबलम्, प्रमाणस्य स्वरूपप्रयुक्तबलादपि प्रमेयाश्रयबलस्याधिक्यात्।

अयं न्यायः पूर्वमीमांसागतशिष्टाकोपाधिकरणमुपजीव्य प्रवृत्तः। तत्र हि 'क्षुते आचामेत्' इति स्मृतेः स्मृतित्वेन दुर्बलाया अपि प्रबलपदार्थाश्रितत्वेन 'वेदं कृत्वा वेदिं करोति' इति पदार्थगुणभूतक्रमाश्रितश्रुत्यपेक्षया प्राबल्यमुक्तम्।

'सर्वत्र प्रसिद्धोपदेशात्' इत्यधिकरणे 'मनोमयः प्राणशरीरो भारूपः' इत्यादौ ब्रह्मण उपस्थितिर्विश्वजिन्न्यायादिति सिद्धान्तितम्। यथा विश्वजिद्विधिना तस्य समान्यत इष्टसाधनत्वविधौ इष्टविशेषाकांक्षायां सर्वाभिलषितः स्वर्ग इष्टविशेषतया बुद्धिसन्निहितो भवति, तथा उपासनाविधिना सामान्यत उपास्यसिद्धौ तद्विशेषाकांक्षायां मनोमयादिवाक्यात् स्वरसतस्सिद्धस्य जीवस्योपास्यत्वानुपपत्तौ सर्वाभिलषितसत्यसङ्कल्पादिगुणविशिष्टतया सर्ववेदान्तप्रसिद्धं ब्रह्मैवोपास्यविशेषतया बुद्धिसन्निहितं भवति। जीवस्य सन्निहितत्वेन रात्रिसत्रन्यायविषयत्वेऽपि तदुपासनस्य निष्फलतया तत्त्यागः।

'अन्तर उपपत्तेः' इत्यधिकरणे "य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद् ब्रह्म" इत्यत्र "य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच" इत्यत्र पुरुषपदसमर्पितचेतनत्वलिङ्गादक्षिण्युपास्यत्वेनाभिमतः पुरुषः परमात्मेति निर्णीतम्। तत्रेयमाशङ्का "चतुरो मुष्टीन्निर्वपति" इत्यत्र बार्हस्पत्यश्चरुः पञ्चदश शरावो भवतीति विकृति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विशेषेऽतिदेशप्राप्तस्य चतुष्ट्वमुष्ट्यन्यतरबाधेऽङ्गीकर्तव्ये प्रथमश्रुतत्वात् चतुष्ट्वप्राबल्यम्, मुष्टिबाधश्चाङ्गीकृतः। तद्वत् 'य एषोऽक्षिणि पुरुषः' इत्यत्र पुरुषापेक्षया प्रथमतरश्रुतम् 'य एषः' इति पदाभ्यां बोधितं प्रसिद्धवस्तु ग्राह्यम्, तच्च प्रतिबिम्ब एव, स एव चात्रोपास्य इति। तत्रेदं समाधानं चतुर इत्यनेन संख्याविशेषाभिधानेन चतुष्ट्वनिर्णयस्य प्रथमं जायमानत्वात् तत्र तन्न्यायः प्रवर्तताम्, अत्र तु य एष इत्यनेन प्रसिद्धवस्तुविशेषो न प्रतिपाद्यते, अतः पाश्चात्यमपि पुरुषपदमेव प्रबलमिति।

दहराधिकरणे "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन् अन्तराकाशः, तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" इत्यत्र 'तस्मिन् यदन्तः' इत्यत्र तच्छब्देन हृदयपुण्डरीकं ग्राह्यम्, न तु दहराकाश इति व्यवहृतं श्रीवाचस्पतिमिश्रैः, तत्र तच्छब्दस्याव्यवहितं दहराकाशमतिलङ्घ्य व्यवहितहृदयपुण्डरीकपरामर्शकत्वं कथं घटत इति शङ्कायां मीमांसान्यायमुदाहरन्ति। तच्छब्दस्याव्यवहितपरामर्शित्वे संभवति तदेव ग्राह्यम्, तदसंभवे व्यवहितपरामर्शित्वमपि। यथा साकमेधे "एतद्ब्राह्मण एककपालः, यद्ब्राह्मण इतरः" इति वाक्ये श्रुतमेतत्पदं सन्निहितं वारुणप्राघासिकमेककपालं परामृशति संभवात् 'गौश्च··· तस्य द्वादशशतं दक्षिणा' इत्यत्राश्वाश्वतरादिव्यवहितां गामेव तच्छब्दः परामृशतीत्यभिप्रायः।

देवताधिकरणे मन्त्रार्थवादानां विध्येकवाक्यतयाऽन्वयेऽपि तेषां स्वस्वार्थेऽपि प्रामाण्यमस्तीति देवताविग्रहादिकम् "अभून्नो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वा," "वज्रहस्तः पुरन्दरः" इत्यादिमन्त्रैः साध्यते। यद्यपि मीमांसका देवताविग्रहादिकं न स्वीकुर्वन्ति, तथापि मीमांसकसिद्धन्यायैरेव वेदान्तिभिर्देवताविग्रहादिकं साध्यते। तथाहि—यत्र मन्त्रवाक्यमपूर्णं तत्र 'याते अग्नेऽयाशया रजाशया' इत्यादौ अनुषङ्गः स्वीकृतः। अविशिष्टस्तु वाक्यार्थः 'अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्' इत्यादिनैकार्थप्रतिपादकमेकं वाक्यमेकं यजुरिति तल्लक्षणं वदन्ति। अर्थवादवाक्यानां यत्राऽर्जवेनार्थवत्त्वं न प्रतीयते 'तस्माद् धूम एवाग्नेर्दिवा ददृशे' इत्यादौ, तत्र शास्त्रदृष्टविरोधादयः परिहृताः, तदर्थप्रतीतये तत्सिद्धिजात्यादयो गौणीनिमित्तभेदाः प्रदर्शिताः, स्वर्गशब्दस्य—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥

इत्यर्थवादादेवार्थो निर्णीतः। किं बहुना, कृत्स्नमपि पूर्वतन्त्रमर्थवादादिकमुपजीव्यैव प्रवृत्तम्, अतो मन्त्रार्थवादप्रतिपादितदेवताविग्रहादेः सद्भावे कानुपपत्तिरिति मीमांसान्यायेनैव साधयामः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'चमसवदविशेषात्' इत्यधिकरणे 'अजा'शब्दस्य "अजामेकां लोहितशुक्लकृष्णाम्" इति मन्त्रगतस्य वृत्तिविचारे न जायत इति योगवृत्तिर्नाङ्गीकार्या, गौण्येव तु स्वीकार्येत्यत्रोद्गातृचमसमेकस्य श्रुतिसंयोगादित्यधिकरणमेवोदाह्रियते। तथाहि—"प्रैतु होतुश्चमसः, प्रब्रह्मणः, प्रोद्गातॄणां प्रयजमानस्य" इत्यत्रोद्गातृशब्देनोच्चैर्गायन्तीत्युद्गातार इति योगेन गानकर्तॄणां चतुर्णामुद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्यानां ग्रहणम्, उत सदःप्रवेशवतामुद्गातृसंबद्धानां त्रयाणां रूढिपूर्वकलक्षणया ग्रहणमिति सन्दिह्य, प्रथमप्रतीता रूढिः, तत्पूर्वकलक्षणा च तत्समनन्तरमेवोपस्थिता भवतीति तस्या एवाङ्गीकारो युक्तः, न तु जघन्यो योग इत्यङ्गीचक्रुर्वेदान्तिनः।

एवं 'न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च' इत्यधिकरणे "यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः" इति मन्त्रे पञ्च पञ्चेति पञ्चविंशतिसंख्याकसांख्यतत्त्वानि नाभिधीयन्ते, अपि तु "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः" इति समनन्तरमन्त्रोक्तप्राणादय एवाभिप्रेता इति वक्तुं सूत्रम् "प्राणादयो वाक्यशेषात्" इति। अत्र पञ्चजनवाक्यस्य प्राणवाक्यं न शेषो विध्यर्थवादन्यायेन, अपि तु आधानदक्षिणाकल्पेषु "एका देया षड् देयाः शतं देयं सहस्रं देयम् अपरिमितं देयम्" इत्यत्र अपरिमितवाक्यस्य प्रतियोगिसमर्पकतया सहस्रवाक्यमिव सन्निधानमात्रेणाकांक्षितमर्थं समर्पयन् शेष इव भवतीति भावेन वाक्यशेषादित्युक्तम्। श्रुतावपि—'पर्यग्निकृतं पात्नीवतमुत्सृजति, आज्येन शेषं संस्थापयति' इत्यत्र आज्ययागः स्वतन्त्रोऽपि पात्नीवतयागस्य शेष इव भवति। तदनन्तरं क्रियमाणत्वादित्यभिप्रेत्य शेषशब्दः प्रयुक्तः। 'त्वाष्ट्रं पात्नीवतमालभेत' इत्यत्र विहितः पशुयागः पत्नीवद्देवताकः, तत्र च पर्यग्निकृतं पात्नीवतमुत्सृजतीत्युक्तम्। अनेन पात्नीवतयागः पर्यग्निकरणान्तान्यङ्गानि कृत्वा समापनीय इत्युक्तं भवति। तत्र च यदि प्रधानयागो न क्रियेत, तदा 'त्वाष्ट्रं पात्नीवतम्' इति विधिवाक्यश्रुतो द्रव्यदेवतासंबन्धो नानुष्ठितः स्यात्, पर्यग्निकरणेन समापने प्रधानयागस्य वपादिभिः क्रियमाणस्याननुष्ठानात्। अत एवमभिप्रायः—पर्यग्निकरणं कृत्वा पशुरुत्स्रष्टव्यः, यागस्तु देवतोद्देशेन द्रव्यत्यागरूपो मनसा वाचा च कर्तव्य एव, त्वष्ट्रे पत्नीवते इदम्, न ममेति। क्षीरनीरविवेचनसमर्था देवता स्वयमेव जीवत्पशुसकाशात् सारं ग्रहीष्यति—इति। तत्र च याग आज्यद्रव्यस्यानुपयोगात् 'आज्येन शेषं संस्थापयति' इत्यत्र श्रुत आज्ययागो यागान्तरमेव, परं तु पशुयागानन्तरं क्रियमाणत्वात् तच्छेष इव भातीत्यभिप्रायेण तत्र शेषपदं प्रयुक्तम्। एवमत्रापि प्राणवाक्यं पञ्चजनवाक्यसमनन्तरं प्रयुक्तं तच्छेषमिव भाति। अतः 'प्राणादयो वाक्यशेषात्' इत्युक्तमिति]।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सांख्यस्मृतीनामनन्यव्यापारतयाऽऽत्मतत्त्वनिरूपणे प्रामाण्यमुपगन्तव्यमिति स्मृत्यधिकरणोक्तविचारे वेदविरुद्धार्थकत्वात् सांख्यस्मृतीनामप्रामाण्यं "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" इति विरोधाधिकरणन्यायेन समाहितम् ।

पूर्वमीमांसान्यायमनुसृत्य पूर्वपक्षश्च 'तेजोऽतस्तथा ह्याह' इत्यत्र कृतः। तथा हि—'वायोरग्निः' इति स्पष्टं तेजसो वायूपादानकत्वश्रवणात् 'तत्तेजोऽसृजत' इति साक्षादुपादानत्वश्रुतिः परम्परया नेतव्या। यथा 'सप्तदशारत्निर्वाजपेयस्य यूपः' इत्यत्र सप्तदशारत्नित्वं वाजपेये सोमयागे बाधितं सत् तदङ्गपशुयागगतयूपे निविशते, आनर्थक्यात्तदङ्गेष्विति न्यायात् साक्षात् संबन्धाभावे परम्पराश्रयणं च चैत्रस्य नप्तेत्यादौ दृष्टमिति पूर्वपक्षे प्राप्ते वाजपेयपशुयागयोरङ्गाङ्गित्वेन विरुद्धत्वाद् भिन्नत्वम्। ततश्च प्रधानेऽसंभवन् धर्मोऽङ्गे निविशत इति युक्तम्। अत्र तु वायोर्ब्रह्मविकारत्वेन ब्रह्माभेदेन वायुजस्यापि ब्रह्मजत्वोक्त्युपपत्तेर्न परम्पराश्रयणमिति वैषम्यमिति।

'तथा प्राणाः' इत्यत्र 'तथा' शब्देन द्वितीयाध्यायचतुर्थपादस्थेन व्यवहितस्य पूर्वपादप्रथमाधिकरणस्थस्य वायुजन्मनः परामर्शोऽङ्गीकृतो भाष्ये, "पानव्यापच्च तद्वत्" इति पूर्वमीमांसाधिकरणसूत्रस्थतच्छब्ददृष्टान्तेन। यथा तत्र सोमपानस्य व्यापत्तिः, वमनमश्वप्रतिग्रहेष्टिनिमित्ताश्वप्रतिग्रहवल्लौकिकवमनरूपम्। ततश्च तन्निमित्ता इष्टिरपि लौकिकवमननिमित्तेति पूर्वपक्षसूत्रार्थः। ततश्च तच्छब्देन दूरस्थस्यापि परामर्शे इदमुदाहरणम्।

'कृतात्ययेऽनुशयवान्' इत्यधिकरणे तीर्थस्नानादिवदाऽऽचारस्य वैदिकस्य क्रतुयुक्तपुरुषधर्मत्वमुक्तम्। तच्च जञ्जभ्यमानाधिकरणसिद्धम्। तत्र हि—तीर्थस्नानादेः क्रतुधर्मत्वम्, उत शुद्धमनुष्यधर्मत्वम्, उत क्रतुयुक्तपुरुषधर्मत्वमिति संशय्य, क्रतुप्रकरणगतानां तीर्थे स्नातीत्यादीनां क्रत्वपूर्वसाधनत्वावगमात् प्रकरणवाक्याभ्यां क्रतुयुक्तपुरुषधर्मत्वमुक्तम्। अहिंसाशास्त्रस्य क्रत्वङ्गपशुसंज्ञपनस्य च शास्त्रविहितस्य विरोधे प्राप्ते सांख्याः क्रत्वङ्गहिंसायामपि दोषं पश्यन्ति। मीमांसकास्तु 'अविशेषेण यच्छास्त्रम्' इति दाशमिकाधिकरणेऽनयोः सामान्यविशेषभावमुपगम्य विशेषशास्त्रस्य सामान्यशास्त्रस्य च भिन्नविषयत्वम्। सामान्यशास्त्रम्=अहिंसाशास्त्रम्, तत्क्रत्वर्थहिंसाभिन्नलौकिकहिंसाविषयम्, अतो भिन्नविषयत्वान्न दोष इति वदन्ति। "अशुद्धमिति चेत् न शब्दात्" इति व्याससूत्रस्यापि स एवार्थ इति भामतीकाराः। भाष्यकारास्तु अत्रोत्सर्गापवादन्यायमूरीकुर्वन्ति। अत्र च सामान्यशास्त्रस्य विशेषोऽपि विषयः, परं तु विशेषशास्त्रं सामान्यशास्त्रेण बाध्यत इति व्याकुर्वन्ति, पशुहिंसायां दोषाभावस्तु मीमांसकसिद्ध एव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'तदभावो नाडीसु तच्छ्रुतेरात्मनि च' इत्यधिकरणे क्वचिद् जीवस्य नाडीषु सुप्तिः श्रूयते, क्वचित् पुरीतति, क्वचिद् ब्रह्मणि इत्येवं सुप्तिस्थानानां विकल्प इति पूर्वपक्षे सर्वेषामेषां समुच्चित्यैव सुप्तिस्थानत्वमित्यत्र विकल्पस्याष्टदोषत्वात् "विकल्पे हि पक्षे शास्त्रबाधः" इति मीमांसकसिद्धान्त उपष्टम्भकतया स्वीकृतः। यदाहुर्भट्टाचार्याः—

एवमेषोऽष्टदोषोऽपि यद्व्रीहियवशास्त्रयोः।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते॥ इति।

"यत्रान्यागतिर्नास्ति तत्रैव विकल्पः" इत्युक्तम्।

भिन्नभिन्नशाखासु पठितानां दहरशाण्डिल्यादिविद्यानाममभेदः, यथा पूर्वतन्त्रे "भिन्नभिन्नशाखापठितानामग्निहोत्रादिकर्मणामभेदः" इत्युक्तम्, तस्य फलं च "उपसंहारोऽर्थाभेदाद् विधिशेषवत्समाने च" इति सूत्रेण व्यासाचार्यैरुक्तम्। यथा विधिविशेषाणामग्निहोत्रादिधर्माणां तदेवैकमग्निहोत्रादीति, एकत्र श्रुता धर्माः सर्वत्रोपसंह्रियन्ते, तथा एकशाखास्था उपासनाङ्गधर्मा अन्यत्राप्यनुषक्तव्या अग्निहोत्रादिवदुपासनाख्यकर्मणोऽभेदादित्युक्तम्।

'अन्यथात्वं शब्दादिति चेन्नाविशेषात्' इत्यधिकरणे छान्दोग्यबृहदारण्यकस्थितयोः "ते देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामेति" इति, "तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्यामः" इति च श्रुतयोर्विद्यैक्यं पूर्वपक्षयित्वा, "न वा प्रकरणभेदात्" इत्यनेन निराकृतम्। वाक्यच्छयासाम्यमात्रेण कर्मणोरभेदस्तु न स्वीकार्य इत्यत्राभ्युदयवाक्यं पशुकामवाक्यं च दृष्टान्ततयोपात्तम्। तथाहि "विना एनं·· त्रेधा तण्डुलान् विभजेत्, ये मध्यमाः स्युः, तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्" इत्यभ्युदयवाक्यम्। पशुकामवाक्ये च "यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्, ये स्थविष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुम्" इत्यादि तत्र वाक्यच्छायासाम्येऽपि नैककर्मत्वम्, अपि तु कर्मभेदः। एवं वाक्यच्छायासाम्येऽपि विद्याभेद इति निरधारयत्।

'अध्यानाय प्रयोजनाभावात्' इत्यधिकरणे—

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित्॥

इत्यत्रार्थादीनामिन्द्रियादिभ्यः परत्वे न तात्पर्यम्, किन्तु पुरुषस्य सर्वापेक्षया परत्व एव तदर्थोऽयमर्थवादः सर्वोऽपीत्यस्य साधने जर्तिलयवागून्यायो दृष्टान्ततया प्रदर्श्यते;

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र "जर्तिलयवाग्वा वा जुहुयाद् गवीधुक् यवाग्वा वा" इत्यत्र लिङ्श्रवणेन विधिपरत्वेन भासमानमपि पयसाग्निहोत्रं जुहुयादिति सर्वान्ते श्रुतपयोविधेरर्थवाद इत्युक्तं पूर्वतन्त्रे।

'वेधाद्यर्थभेदात्' इत्यधिकरणे ब्रह्मविद्याप्रकरणे समाम्नातानाम् "सर्वं प्रविध्य हृदयं प्रविध्य" इत्यादिमन्त्राणां प्रवर्ग्यादिकर्मणां च विद्यासु विनियोगः शङ्क्यते सन्निधिसामर्थ्यात्। अन्यथा तेषां स्वाध्यायविध्यापादितप्रयोजनवतामफलत्वे वैयर्थ्यापत्तेः। अन्यतराकाङ्क्षयैव तेषां संबन्धोपपत्तेः। मन्त्राणां 'अविशिष्टस्तु वाक्यार्थः' इति न्यायात् प्रयोगसमवेतार्थस्मारकत्वं वाच्यम्, तच्चोपासनेषु हृदयादिसंबन्धादुपपन्नम्, कर्मणां तु प्रवर्ग्यादीनां ज्योतिष्टोमाद्यङ्गत्वेन विनियुक्तानामपि विद्यासु विनियोग उपपद्यते, 'वाजपेय इव बृहस्पतिसवस्य' इति पूर्वपक्षे प्राप्ते विद्यासूक्तमन्त्रकर्मादीनामसामर्थ्यान्न विनियोग इति प्रसाधितम्। अत्र मीमांसकैः प्रसिद्धबृहस्पतिसवाद् ब्रह्मवर्चसफलाद् वाजपेयाङ्गबृहस्पतिसवोऽन्यः प्रकरणान्तरन्यायादित्युक्तम्। ततश्च बृहस्पतिसवोदाहरणमभ्युपेत्यवादेनेति कल्पतरुकाराः। परिमलकारास्तु मीमांसकैरभ्युपगतं बृहस्पतिसवस्य कर्मान्तरत्वमयुक्तमिति तन्मतखण्डनमेव भाष्यकृतामभिमतमिति वदन्ति।

एवमग्निरहस्यब्राह्मणगतस्य मनश्चिदादेः कर्मप्रकरणस्थस्यापि कर्माङ्गत्वाभावः केवलं पुरुषार्थत्वं च सिद्धन्तितं लिङ्गभूयस्त्वाधिकरणे। तत्र कर्मप्रकरणस्थस्य तत उत्कर्षे सूत्रकारैः 'दृष्टश्च तदुक्तम्' इति मीमांसकसम्मतिः प्रदर्शिता। मीमांसकास्तु राजसूयप्रकरणपठितानामवेष्टीनां 'यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधाय, आहुतिमाहुतिहुत्वाऽभिघारये' इत्यादिवाक्यैर्गदिशब्दप्रयोगाद् राजसूये वर्णत्रयाधिकारः, राजशब्दस्य राज्यकर्तरि प्रयोगाद् वर्णत्रयस्यापि राज्यकर्तृत्वसंभवादिति पूर्वपक्षयित्वा, राज्ञः कर्म राज्यमिति व्युत्पत्तिरान्ध्रप्रयोगानुसारिणी, "गुणवचनब्राह्मणादिभ्यः कर्मणि ष्यञ्" इति पाणिनिस्मृत्युपष्टब्धा चेति तदनुसारेण राजसूयः क्षत्रियाधिकार एव, न वर्णत्रयाधिकारः,। यदि 'ब्राह्मणो यजेत' इत्यादिभिर्विहिता इष्टयः प्रकरणादुद्धृत्य स्वातन्त्र्येण प्रयोक्तव्या इति निर्णीतम्। एवमत्रापि। कर्माङ्गावबद्धानामुपासनानां पर्णमयीत्वादिवत् क्रत्वर्थत्वम्, उत गोदोहनादिवत् पुरुषार्थत्वमिति सन्देहो भवति, क्रत्वर्थत्वे उपासनाऽकरणे क्रतुवैगुण्यं स्यात्। पुरुषार्थत्वपक्षे क्रतुषूपासनाऽकरणेऽपि क्रतोः साद्गुण्यं भवति। उपासनकरणे तु फलविशेषः सिद्धयतीत्युपनिषद्गतानां कर्माङ्गावबद्धानामुद्गीथादीनां विषये संशयमुत्थाप्य "तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्" इति सूत्रकारैरुक्तम्। तत्र तेषामुद्गीथादिगुणयाथात्म्यनिर्धारणानामनियमः, नित्यवत्कर्मप्रयोगेषु नोपनिबन्धनम्, कुतस्तद् दृष्टेः? तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न इति विकल्पदृष्टेः। 'यदेव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति । पृथगेव तत्तदुपासनानां फलश्रवणाच्च कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च इति । गोदोहनादीनां फलविधौ प्रकरणात् प्रणयनाद्याश्रयो लभ्यते, अत्र तूपासनानां क्रतुप्रकरणस्थत्वाभावेऽपि स्वयं क्रियात्मकत्वात् फले विधिः स्वातन्त्र्येण विधातुं शक्यत इति विशेष इत्युक्तम् ।

आवृत्तिरसकृदुपदेशादित्यत्र श्रवणादीनामावृत्तिरावश्यिकी न वेति सन्देहे आवृत्तिः कर्तव्येति निर्णयः कृतः । तत्र भाष्यम्—'दर्शनपर्यवसानानि हि श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति' इति । इदं च भाष्यं दार्शपूर्णमासिकं व्रीहीनवहन्ति' इत्युक्तमवघातं दृष्टान्तीकृत्य सर्वौषधावघातं प्रत्युदाहरणं सूचयति, तथाहि— दार्शपूर्णमासिकावघातो दृष्टार्थः, तण्डुलनिष्पत्त्यर्थत्वात् । अत एव यावद्वारमावृत्तौ दृष्टफलसिद्धिः तावद्वारमावर्तनीयः । सर्वौषधावघातस्तु 'सर्वौषधस्य पूरयित्वाऽवहन्ति अथैतदुपदधाति' इति चयने श्रुतः, तत्रावघातस्यादृष्टार्थत्वात् सकृदवहननेनादृष्टसिद्धेर्नावघातावृत्तिरित्युक्तम् । एवं श्रवणादीनां दर्शनफलकत्वादावृत्तिरावश्यिकीति निर्णीतम् ।

एवं मीमांसान्यायसञ्चारः केषुचिद्वेदान्ताधिकरणेषु प्रदर्शितः । न समग्रतया । यद्यपि व्यवहारे भट्टनय इति प्रामाणिकानां सम्मत्या व्यावहारिकपदार्थनिरूपणे प्रायो भट्टमतमेवानुस्रियते वेदान्तिभिः । तथापि केषुचिद्विषयेषु न्यायेषु च तन्मतं नानुरुध्यते, यथा देवताविग्रहादौ कर्मणः फलदातृत्वं न संभवतीति 'फलमत उपपत्तेः, पूर्वं तु बादरायणो हेतुव्यपदेशात्' इति सूत्राभ्यां सूत्रकारो निश्चिकाय । जैमिनिस्तु 'देवता वा प्रयोजयेदतिथिवत्, भोजनस्य तदर्थत्वात्' इत्यधिकरणे कर्मण एव फलदातृत्वमुक्तवान् । 'न देवा देवतान्तराभावात्', न ऋषीणामार्षेयान्तराभावात्' इत्यनेन देवानामृषीणां च कर्मानधिकार उक्तो जैमिनिना । बादरायणस्तु ब्रह्मविद्यायां देवानामधिकारं 'भावं तु बादरायणः' इति सूत्रेण स्थापयामास, न कर्माधिकारं निराचकार । एवं मीमांसका अध्ययनस्यार्थज्ञानार्थत्वं वदन्ति । वेदान्तिनस्त्वक्षरावाप्त्यर्थत्वमेव, ज्ञानं तु यागादिविध्याक्षिप्तमित्यभिप्रयन्ति, अर्थज्ञानार्थत्व उपनिषदर्थब्रह्मज्ञानस्यापि कर्मानुष्ठानाङ्गतापत्तेः । अक्षरावाप्तिस्तु पारायणादौ विनियोग इति । एवमर्थवादादीनां विध्येकवाक्यत्वेऽपि स्वमुख्यार्थेऽपि तात्पर्यम् । प्रमाणान्तरविरोधाविरोधयोः असतोः, तेषां स्वार्थे तात्पर्यात् । अत एव देवताविग्रहादिसिद्धिः ।

अत्र केचन विशेषाः

इदमपि मीमांसान्यायसञ्चारेऽवश्यमवधेयं यत्—अननुरूपं दृष्टान्तं प्रदर्श्य सिद्धान्तविरुद्धमर्थं ये प्रतिपादयितुमिच्छन्ति तद्वशेन चाद्वैतसिद्धान्तमेव भिन्दन्ति तेषां मीमांसोदाहरणानि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परीक्ष्यैवास्माभिः स्वीकर्तव्यानि, यतो मीमांसकसिद्धान्तमेव सम्यगनवधार्य ते उदाहरेयुः। अत्रापि दृष्टान्ताः प्रदर्श्यन्ते—

उपक्रमोपसंहारयोरेकवाक्यत्वप्रतीतौ उपक्रमविरोधेनोपसंहारे प्रतीयमाने उपक्रमानुरोधेनोपसंहारो नेतव्य इति पूर्वमीमांसायां 'श्रुतेर्जाताधिकारः स्यात्' इत्यधिकरणे निर्णीतम्। यथा "प्रजापतिर्वा इदमेक एवाग्र आसीत्, स तपोऽतप्यत; तस्मात् तेपानात् त्रयो देवा अजायन्त अग्निर्वायुरादित्यः, ते त्रयोऽतप्यन्त। तेभ्यस्तेपानेभ्यस्त्रयो वेदा अजायन्त। अग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः, आदित्यात् सामवेदः" इत्युपक्रम्य श्रूयते तस्माद् 'उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैस्साम्ना' इति। तत्रोपक्रमे संपूर्णो वेदः प्रस्तुत उपसंहारे च ऋगादिमन्त्रेषु स्वरविशेषविधिः,। अत्र विध्यर्थवादरूपेण प्रतीयमानयोरनयोर्विरोधः प्रतीयते। विधिः ऋगादिमन्त्रपरः, अर्थवादस्तु वेदस्तुतिपर इति। अत्रोपक्रमस्यासंजातविरोधित्वेन प्राबल्यात् उपसंहारस्थं ऋगादिपदं तत्तद्वेदपरमिति निर्णीतम्। केचित्तूपसंहारस्यैव प्राबल्यमुपगच्छन्ति। तत्र च ब्रह्ममीमांसागतानि कानिचिदधिकरणान्युदाहरन्ति। तथाहि न संख्योपसंग्रहादित्यधिकरणे- "यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतो मृतम्" इत्यत्र मनुष्येषु रूढस्य पञ्चजनशब्दस्य, 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत' इति वाक्यशेषे- संकीर्तितेषु प्राणादिषु वृत्तिः "प्राणादयो वाक्यशेषात्" इति सूत्रोक्ता उपसंहारप्राबल्यं गमयति। एवं पारिप्लवाधिकरणे 'सर्वाण्युपाख्यानानि पारिप्लवे शंसति' इति विध्यनुसारेण "प्रतर्दनो ह वै दैवोदासिः" "त्रयोहोद्गीथे कुशला बभूवुः" इत्यादीनामपि पारिप्लवे शसनप्राप्तौ "मनुर्वैवस्वतो राजा" इत्यादिवाक्यशेषसंकीर्तिताख्यानविशेषेषु सर्वशब्दस्य संकोच इत्युयगतं विशेषितत्वादिति सूत्रभागेन। दहराधिकरणे "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यम्" इत्यत्र दहराकाशान्तर्वर्तिन एवोपास्यत्वं प्रतीयमानम् वाक्यशेषे "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदयआकाशः" इत्याकाशमहिमवर्णनदर्शनात् तस्यैवान्वेष्टव्यत्वं परब्रह्मरूपता च "दहर उत्तरेभ्यः" इति सूत्रे निर्णीयत इत्युक्तम्। इदमप्युपसंहारप्राबल्यं व्यनक्तीति ब्रुवन्ति, एतदयुक्तम्। यतः—'यस्मिन् पञ्च पञ्चजनाः' इत्युपक्रमस्थपदैः पञ्च मनुष्या ब्रह्मणि सन्तीत्येतावता परब्रह्मणः कस्यचिदुत्कर्षस्याप्रतीतेः पञ्चजनशब्दस्यान्यत्रैव तात्पर्यमिति सामान्यतोऽवगतौ तद्विशेषाकाङ्क्षायां वाक्यशेषात् प्राणादिपरिग्रहः, अक्ताधिकरणन्यायात्। न तु उपक्रमस्यान्यथानयनरूप उपक्रमबाधः। तेन च नोपसंहारप्राबल्यम्।

'सर्वाण्युपाख्यानानि पारिप्लवे' इत्यनेन सकलवेदवर्तिनामुपाख्यानानां ग्रहणस्य मनुष्यमात्रेणाशक्यतयाऽवच्छेदापेक्षायां वाक्यशेषस्थस्य मनुर्वैवस्वतो राजेत्यादेः परिग्रहः, न तु तत्राप्युपसंहारप्राबल्येनोपक्रमबाधः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दहराधिकरणे तु 'विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् स्वधर्मत्वम्' इत्यधिकरणोक्त-भूयोऽनुग्रहन्यायादेव निर्णयः, अत एव 'उत्तरेभ्यः' इत्युक्तम्, अतो न तत्राप्युपसंहारप्राबल्यमिति।

प्रत्यक्षस्य विपक्षबाधकतर्कसचिवमनुमानमपि बाधकमित्युक्ते परे प्रत्यवतिष्ठन्ते। प्रत्यक्षस्यानुमानबाध्यत्वे "औदुंबरीं स्पृष्ट्वा उद्गायेत्" इति श्रुतिः "औदुंबरी सर्वावेष्टितव्या' इति स्मृत्या बाध्यताम्। ऐन्द्रया गार्हपत्यमुपतिष्ठते' इति श्रुतिः लिङ्गेन इन्द्रप्रकाशकत्वरूपेण बाध्यताम, 'शरमयं बर्हिर्भवतीति' श्रुतिः चोदनालिङ्गरूपेण कुशश्रुत्यनुमानेन बाध्यतामिति। अयुक्तमिदम्, यतः प्रत्यक्षविषयभूतश्रुतित्रयस्य लिङ्गबाधकत्वोक्तावपि प्रत्यक्षस्य लिङ्गबाध्यत्वे विरोधाभावात्।

एवं प्रत्यक्षस्यागमबाध्यत्वसिद्धान्ते "तस्माद्धूम एवाग्नेर्दिवा ददृशे" इत्यस्य प्रत्यक्षा-विरोधाय 'गुणवादस्तु' इति सूत्रं न रच्येत जैमिनिना। एवं 'यजमानः प्रस्तरः' इत्यादेरुप-पत्तये तत्सिद्धिजातीत्यादिना गौणीनिमित्तोपपादनमनुपपन्नम्, श्रुतेरेव प्रबलत्वात्।

परीक्षितस्य प्रत्यक्षस्यागमापेक्षया प्रबलत्वात् 'धूम एवाग्नेर्दिवाददृशे" 'यजमानः प्रस्तरः' इत्यादेः परीक्षितप्रत्यक्षविरुद्धत्वात् लक्षणाश्रयणेऽप्यद्वैतश्रुतेः परीक्षितप्रत्यक्षविरोधा-भावेन प्रबलत्वात्। अर्थक्रियासंवादादिभिः प्रत्यक्षस्य व्यावहारिकप्रामाण्यमात्रं हि सिद्धम्, तच्च नाद्वैतागमेन बाध्यत इति।

अपच्छेदन्यायेन प्रत्यक्षस्यागमबाध्यत्वं सिद्धान्तेऽङ्गीक्रियते। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति न्यायः। तत्र 'यद्युद्गाता अपच्छिन्द्यात्, अदक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत, यदि प्रतिहर्त्ता सर्ववेदसं दद्यात्' इति विरुद्धप्रायश्चित्तयोरेकस्मिन् यागेऽसंभवे परनिमित्त-प्रायश्चित्तमेवानुष्ठेयमिति निर्णीतम्, तन्न्यायेन पूर्वप्रवृत्तस्य प्रत्यक्षस्योत्तरप्रवृत्तेनागमेन बाधः। न चात्र पूर्वनिमित्तप्रायश्चित्तस्य न सर्वथा बाधः, विकल्पस्थले पूर्वनिमित्तस्य कदाचित् पाश्चात्त्ये च चरितार्थत्वात् आगमबाध्यत्वे तु प्रत्यक्षस्य निर्विषयत्वमिति शङ्कनीयम्। व्यावहारिकप्रामाण्येन चरितार्थत्वादिति।

एवं पूर्वमीमांसान्यायसञ्चारो वेदान्तेषु भूयान् दृश्यते। आवश्यकश्च, वेदार्थनिर्णयस्य न्यायात्मकतर्कसहायेन कर्तव्यत्वम्—

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते सधर्मं वेद नेतरः॥

इति मनुना प्रोक्तम्। तत्र धर्मपदं वेदार्थमात्रपरं सद् ब्रह्मणोऽप्युपलक्षकमिति संक्षेपः।

—:०:—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दार्थसम्बन्धविमर्शः*

श्रीशिवसागरत्रिपाठी, साहित्याचार्यः, एम्० ए०, साहित्यरत्नम्,
प्राध्यापकः—राजस्थानविश्वविद्यालयः, जयपुरम् ।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥
उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥[1]

एवं या वाग् बृहस्पतिनाङ्गिरसेन संस्तुता भाषापरनाम्नी, सा लोकस्य सर्वश्रेष्ठनिधिः । परब्रह्मणा, प्रकृतेर्विकासशीलसंघर्षेण वा प्रदत्तैषा सृष्टिप्रवाहे मानवं मानवेतरजगतस्तथा पृथक्करोति, यथा स स्वविचारान् भावान् वा प्रस्तूय समाजे प्रेम्णः स्थापयत्येकसूत्रताम् । अक्षि-सङ्कोचादिसङ्केतैः कथमपि स्वाभिप्राय प्रकटयन्तोऽपि मानवाः किमपि साधनमपेक्षन्ते, तत्ते भाषयैव चारु कर्तुं शक्नुवन्ति । अतः 'भाष्यते' इति व्युत्पत्त्या समष्टौ व्यष्टेश्चिन्ताधाराणां मनोभावानाञ्च प्रकटनसाधनीभूतोपायविशेषो हि भाषा, या खलु वैदिकसाहित्ये 'वाक्' शब्देन[2] व्यवहृता, सरस्वती-गिरा-वाणी-भारतीप्रभृतिपदैरभिधीयते[3] सम्प्रति । एतस्याः शब्दः कलेवर-मर्थश्चात्मा । भाषाया अङ्गभूतोऽपि शब्दोऽविच्छेद्यत्वात् कदाचिद् भाषापदेनापि व्यवह्रियते । अतो भाषा शब्दो वा ध्वनियन्त्रैरुत्पन्नो ध्वनिसमूह एव, यः कञ्चन भावं विचारं वा द्योतयति ।

वागेषा प्रारम्भत एव दार्शनिकानां विचारकाणाञ्चाध्ययनस्य विषयभूता । भाषोद्गमः, शब्दतत्त्वम्, तन्नित्यत्वमनित्यत्वं वा, अर्थतत्त्वम्, शब्दार्थयोः सम्बन्धश्च वैयाकरणैः, निरुक्त-

---

*१९६५ ईशवीयवर्षे वाराणसेयसंस्कृतविश्वविद्यालयेनायोजितायां डॉ० सम्पूर्णानन्दनिबन्धप्रतियोगितायां प्रस्तुतेषु निबन्धेषु डॉ० सम्पूर्णानन्दस्वर्णपदकप्रदानेन पुरस्कृतोऽयं निबन्धः—

सम्पादकः ।

१. ऋक् १०।७१।४-५। हिन्दीपद्यानुवादार्थं द्रष्टव्यं लेखकेन सम्पादितायाः 'त्रिविधा' नाम्न्याः पत्रिकायाः प्रथमं पृष्ठम् ।

२. ऋक् १।१६४।४५; ८।१००।११; बृह० उप० १।५।३; जै० उप० २।९।६; श० ब्रा० १।४।४।७, ऐ० आ० २।१।६।

३. अभि० शा० ७।३४; आर्यासप्तशती ३१, काव्यप्रकाशः, १।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कारैः, दार्शनिकैः, मनश्शास्त्रिभिः, साहित्यिकैः, भाषाशास्त्रिभिः पाश्चात्यैः पौरस्त्यैश्च बहु व्यचारि। तत्रापि ध्येयमिदं यद् भाषाविषयकं विमर्शनिदानं सर्वप्रथमं भारते, तदनन्तरञ्च यूनानदेशे कृतम्। अत्रत्येन भाषाशास्त्रेण या वैज्ञानिकी प्रौढता परिपक्वता वापादिता, सा नासादिताऽन्यदेशैः। अत्रत्या नियमाः सार्वदेशिकाः सार्वकालिकाश्च। अतः स्वीकरोति मेक्समूलरभट्टो (Max Muller) जर्मनविद्वान्—

"समस्तविश्वेतिहासे केवलं द्वे राष्ट्रे—यूनानराष्ट्रं भारतराष्ट्रञ्च, याभ्यां पारस्परिकसाहाय्यं विनैव तर्कशास्त्रव्याकरणे नाम्नी द्वे विज्ञाने विवेचिते"[1]। पुनश्च सोऽग्रे स्पष्टीकरोति—

"यूनानदेशीयैकस्य दार्शनिकस्य निर्वचनसम्बन्धिविचारा बाल्यावस्थामेव द्योतयन्ति, यदा तु भारतस्य ब्राह्मणैः केषाञ्चिद् महत्त्वपूर्णप्रश्नानां समाधानं गम्भीरतया कृतम्"।[2]

सन्ति भाषोद्गमविषयेऽपौरुषेयवादानुकरणमूलकतावाद-मनोरागाभिव्यञ्जकतावाद-प्रतीकवाद-एकाक्षरवादप्रभृत्यनेकवादाः; परमस्माकं तु विवेच्यविषयः शब्दार्थमाहात्म्येन सह तयोः पारस्परिकसम्बन्ध एव।

शब्दनिरूपणम्

जगतः समुपलभ्यमानग्रन्थेषु प्राचीनतमानां वेदानामपौरुषेयत्वं स्वीकुर्वत्सु भारतीयसर्वशास्त्रेषु शब्दः (अक्षरतत्त्वं[3] वा) अपौरुषेयत्वेनोपवर्णितः। तस्य च ब्रह्मणा साकमेकत्वमुपपादितम्, यत्खलु वेदान्तदर्शनस्य 'ब्रह्म', योगदर्शनस्य 'ईश्वरः', सांख्यदर्शनस्य 'पुरुषः', वैशेषिकस्य 'विशेषः, न्यायः' वा, बौद्धदर्शनस्य 'ज्ञानम्', जैनदर्शनस्य 'अणुः' (पुद्गलम्), चार्वाकदर्शनस्य 'भूतम्, तत्त्वम्' वा, भौतिकविज्ञानवादिनाञ्च 'द्रव्यम् प्रकृतिः' वा, तदेव वैयाकरणानां साहित्यिकानाञ्च 'शब्दब्रह्म' इति। यद्यपि नागेशेन[4] परब्रह्म-शब्दब्रह्मणोरपि भेदोऽकारि, परमपरेण शब्दशास्त्रिणा भर्तृहरिणा[5] तयोरैक्यं सुष्ठु स्थापितम्। यच्च वैदिकसाहित्यविभिन्नोद्धरणैः पुष्टिं लभते।

---

१. हिस्ट्री आफ संस्कृत लिटरेचर; पृ० १५८।

२. तदेव-पृ० १६३।

३. "ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते॥
(ऋक् ।१।१६४।३९।)

४. लघुमञ्जूषा, पृ० १६८-१७४। ५. वाक्यपदीयम् १।१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथा हि—

सहस्रधा पञ्चदशान्युक्था यावद् द्यावापृथिवी तावदित् तत् ।
सहस्रधा महिमानः सहस्रं यावद् ब्रह्म विष्ठितं तावती वाक्[1] ॥

अपि च—

"वाग् वै ब्रह्म[2]", "वागिति तद् ब्रह्म[3]" अपरश्चैष: शब्दः 'महो देवः' इति कथितः, यत्र तस्याखिलं स्वरूपं स्पष्टीकृतं वामदेवगौतमेन—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो यस्य
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यों आविवेश[4] ॥

यद्यप्यत्र यास्कमतेन वैदिकव्याख्यायां स 'महो देवः' यज्ञपुरुषः[5] एव, परं पतञ्जलिमतेनार्थतत्त्ववर्षणात् सः 'शब्द' एव, यस्य नामाख्यातोपसर्गनिपातमयानि चत्वारि शृङ्गाणि, भूतभविष्यद्वर्तमानास्त्रयः पादाः, नित्यकार्यरूपशब्दमये द्वे शीर्षे, विभक्तिरूपाः सप्त हस्ताः, उरसि कण्ठे शिरसि च त्रिषु स्थानेषु बद्धश्चास्ति[6] । शब्दमिमं सम्यग् ज्ञात्वा मोक्षमाप्नोति पुरुषः । तदुक्तम्—

"शब्दब्रह्मणि निष्णातः परं ब्रह्माधिच्छति ।"

अतो वैयाकरणैर्मुक्तकण्ठैः शब्दतत्त्वस्यैव प्रामाणिकता स्वीकृता—

"शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणमिति[7] ।"

एकेन शब्दज्ञानेनापीष्टसिद्धिर्जायते' इति पतञ्जलिः श्रुतिवचसा प्रमाणं करोति—

"एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति[8] ।"

परमेकेन वर्णेन स्वरेणापि दुष्टोऽसंस्कृतः शब्दः (अपशब्दः) अर्थतत्त्वं विनश्यानिष्टमाचरन्ति—

---

१. ऋक् १०।११४।८।
२. श० ब्रा० २।१।४।१०; ऐ० ब्रा० ६।३।
३. जै० उप० २।९।६। द्र०—गो० पू० २।१०।११; बृह० उप० ४।१।२; तै० ३।९।५।५; ऐत० २।१५; कौ० ब्रा० ६।१९।
४. ऋक् ४।५८।३।
५. नि० १३।७।
६. महाभाष्यम् १।१।१। वाक्य० पुण्य० १।१३२।
७. महाभाष्यम् १।१।१।
८. तदेव ६।१।८४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"दुष्टः शब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्[१] ॥"

एतेन शब्दतत्त्वेनैवार्थतत्त्वस्य पदार्थात्मकजगतो वा सृष्टिर्जाता। यथोक्तं भर्तृहरिणा—

"अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[२] ॥

पुनस्तेन यदुक्तम्—"शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः[३]"; तन्निगमागमोक्तिभिरपि पुष्यते—

"वागेव विश्वा भुवनानि जज्ञे,
वाच इत् सर्वममृतं यच्च मर्त्यम्[४]।"

अपि च—

"तस्य (ब्रह्मणः) वाक् तन्ति(सूचिः)र्नामानि (शब्दाः) दामानि, तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितम्[५]।

शब्दनित्यत्वनिरूपणम्

तदेषस्त्रिलोकव्यापी जगदाधारः शब्दो नित्यः, उतानित्य इत्यत्र बहु विवेचितं विद्वद्भिः। यद्यप्यत्र प्रधानत्वेन त्रयो मता एव—नैयायिकानामनित्यवादः, मीमांसकानां नित्यवादः, वैयाकरणानाञ्च नित्यानित्यवादः, परं शब्दस्य केनापि रूपेण नित्यत्वमेव बहु मानितं भाषाशास्त्रिभिरपि। अतः शब्दार्थसम्बन्धनिरूपणात् पूर्वं विचार्यतेऽत्र समासतः।

श्रीकुमारिलभट्टेन शब्दविषयका अनेके मता उद्धृताः—

"त्रिगुणः पौद्गलो वाऽयमाकाशस्याथवा गुणः।
वर्णादन्योऽथ नादात्मा वायुरूपोऽर्थवाचकः।
पदवाक्यात्मकः स्फोटः सारूप्यान्यनिवर्तने[६] ॥"

---

१. तदेव १।१।१। २. वाक्यपदीयम् १।१।
३. तदेव १।२०। (टीकायामृग्वेदादुद्धृतम्)। ४. तदेव १।१२१।
५. ऐ० आ० २।१।६। (काठकसंहिता १२।५।२७; ताण्ड्य० २०।१४।२; "स भूरिति व्याहरत्, भूमिमसृजत्" तै० आ० २।२।४।२; तथैव ख्रिष्टधर्मपुस्तके 'बाइबिलाभिधाने 'ईश्वरो व्याहरत् 'प्रकाशः' प्रकाशश्चाभवत्' (God said light, and there was light)—ध्व० सि०, पृ० ४६ उद्धृतम्।
६. श्लोक० ३१९–३२०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्थात् सांख्यैरन्तःकरणरूपादहङ्काराच्छब्दजनिमुक्त्वा सत्त्वमोरजःस्वभावात्मक आहङ्कारिकः शब्द इति पर्यालोचि[१]। जैनास्तु परमाणुं (पुद्‌गलम्) सर्वशक्तिमन्तं मत्वा शब्दः 'पौद्‌गल' इति निश्चिन्वन्ति[२]। शब्दस्य गुणत्वमुत्पादिविनाशित्वञ्च मन्यमाना नैयायिका वैशेषिकाश्च शब्द आकाशगुणो[३]ऽनित्यः[४], उच्चरितध्वंसित्वादिति। लौकिकव्यवहारे वर्णादभिन्नो ध्वनिरेव शब्द इति। शिक्षाप्रातिशाख्यकारमतेषु वायुः शब्द[५] इति। वैयाकरणैस्तु पदस्फोटो वाक्यस्फोटो वा शब्दो गृहीतः। केचित् सारूप्यं साहश्यं वा शब्द इति स्वीकुर्वन्ति। बौद्धास्तु शब्दोऽन्यनिवर्तनमपोहो वेति स क्षणिक इति मन्वते[६]।

मीमांसकेषु प्रभाकरगुरुमते 'आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मकः' स च ध्वनिरूपो वर्णरूपश्च। प्रथमस्त्वनित्यः, अपरो नित्यः। कुमारिलभट्टमते तु शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वात्, परं वर्णाभिव्यक्तौ तस्य मतेऽपि शब्दो नित्यः।

'शब्दो नित्यः' इति शाब्दिकाः। उच्चरितप्रध्वंसी यो शब्दो नैयायिकानां मतेऽनित्यः, स तु वर्णजन्यो ध्वनिरेषां मते। स च वाचकत्वशक्त्यभावादनर्थकोऽनित्यश्च। परन्तु शब्दप्रयोगेऽर्थावबोधो भवत्येव, अतोऽस्ति कुत्रापि वाचकत्वशक्तेः सत्ता, सैव स्फुटतयार्थबोधिका स्फोटशक्तिः। सैव "तत्र स्फुटत्यर्थोऽस्मादिति स्फोटः[७]" यो वर्णाभिव्यङ्ग्यो वर्णव्यतिरिक्तो नित्योऽर्थस्तस्य प्रत्यायकः शब्दः। यथोक्तं पतञ्जलिना--

"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः (गौः[८])।

यद्यपि लोके 'ध्वनिः' शब्दः[९] कथ्यते, परमस्ति स्फोटध्वन्योः स्पष्टभेदः। यथा स्फोटः शब्दः, ध्वनिस्तु शब्दगुणः[१०]।

"ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः[११]॥

---

१. सांख्य० ३,२२। २. वा० प० १।११०, १११।

३. आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः—मुक्ता० ४४।

४. आदिमत्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च—न्यायसूत्रम् २।२।१३।

५. वायुः खात् शब्दस्तत-शु० यजु० प्राति० १।६, ७; मारुतस्तूरसि चरन् मन्दं जनयति स्वरम्—पा० शि०; वा० प० १।१०८।

६. महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मक इति बौद्धमतम्—न्यायसूत्रम् २।२।१२।

७. स्फोटवादः—पृ० ५। ८. महाभाष्यम् १।१।१।

९. तदेव। १०. तदेव। ११. तदेव १।१।७०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतावेव यजुर्वेदस्योपनिषदा[1]ञ्च[2] विद्याविद्ये, द्वे अक्षरे वा। अस्मिन् स्फोटाह्वये पदार्थे मीमांसकानामिव द्वितीयादिध्वनीनां पूर्वोच्चरितप्रथमादिवर्णानां वैयर्थ्यं न शङ्कनीयम्, यतोऽभिव्यञ्जकोऽपि प्रथमो ध्वनिरुत्तरोत्तराभिव्यञ्जकक्रमेण स्फुटं स्फुटतरं स्फुटतमं स्फोटमस्फुटमप्यभिव्यनक्ति। यथा भणितम्—

नादैराहितनोजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते[3]॥

अपि च—

पूर्वपूर्वानुभूजन्यभावनासचिवेऽन्तिमे।
चेतसि स्फुरति स्फोटो रत्नतत्त्वमिव स्फुटम्[4]॥

एवमुपर्युक्तविवेचितेषु सर्वेषु मतेषु केवलं नैयायिकमतं शब्दनित्यताविरुद्धम्, यच्च वैयाकरणमीमांसकादिभिः सुष्ठु पर्यालोचितम्। मतमेतद् भाषाशास्त्रनिकषोपलेऽपि न विशुद्धम्। अतो यच्छब्दस्याकाशगुणत्वं स्वाभाविकत्वम्, नित्यत्वं वा पूर्वोक्तविचारकैः प्रतिपादितम्, यच्च भाषाविज्ञानपुष्टम्, तदाधुनिकविज्ञानानुकूलमपि वर्तते। इत्थं भौतिकमहत्ताऽपि तस्य स्पष्टी-भवति। एतद्गुणवशीभूतेनैवाधुनिकभौतिकविज्ञानेन ध्वनिप्रेषक-ध्वनिग्राहक-आकाशवाणी-प्रभृतियन्त्राणि समाविष्कृतानि। किं बहुना, धार्मिके, सांस्कृतिके, सामाजिके, राजनीतिके, शैक्षिके व्यवहारे च विश्वेष्वपि क्षेत्रेषु शब्दज्योतिरखण्डं देदीप्यमानं वर्तते। अन्यथा—

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥[5]

अर्थनिरूपणम्

भाषोत्पत्तिविषयकाः प्रचलिताः सर्वे सिद्धान्ता द्योतयन्तीदमैकमत्येन यदर्थस्पष्टी-करणायैव मानवेषु भाषाप्रवृत्तिर्जाता। वेदेषु, ब्राह्मणेषु, आरण्यकोपनिषत्सु, निरुक्तेषु, प्राति-

---

१. यजु० अ० ४० (ईशोपनिषद्)।

२. द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे।
क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः॥—श्वेता० ५।१।
अक्षरञ्च क्षरञ्चैव द्वैधीभावोऽयमात्मनः।
क्षरः सर्वेषु भूतेषु दिव्यं ह्यमृतमक्षरम्॥
महाभारतम् (पू० सं०) १२।२३१।३१।

३. वाक्य० १।८५।

४. स्फोटतत्त्वनिरूपणम् १३।

५. काव्यादर्शः १।४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शास्त्रेषु, दर्शनग्रन्थेषु, पुराणेषु, साहित्ये च यदेकतत्त्वं व्याख्यातम्, तदर्थ एव।[१] स च सर्वबोधकताशक्तिसम्पन्नः शब्द इव सर्वबोध्यशक्तिसम्पन्नत्वात् सर्वशक्तिमान्। यतोऽर्थरहिता वाग् व्यर्था, अफला, अपुष्पा[२] च। अत एव यास्कस्तु 'अर्थं वाचः पुष्पफलमाह'[3]। शौनकेनापि बृहद्देवतायामर्थप्राधान्यं विशदीकृतम्—

"प्रधानमर्थः शब्दो हि तद्गुणायत्त इष्यते।"[४]

स चायमर्थः किंस्वरूप इति विचारयता महर्षिपतञ्जलिना "सर्वे भावाः स्वेन भावेन भवन्ति, स तेषां भावः" इति कात्यायनोक्तिं स्पष्टीकुर्वता "सर्वे शब्दाः स्वेनार्थेन भवन्ति, स तेषामर्थः[५]" इत्युक्तम्। भर्तृहरिः शब्दोच्चारणेनार्थप्रतीतिरेवार्थं घोषयति—

यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते।
तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्॥[६]

कुमारिलभट्टमतेन "तत्र योऽन्वेति यं शब्दमर्थस्तस्य भवेदसौ"[७] इत्यर्थस्य लक्षणमकारि। श्रीजयन्तेनोद्धृते द्वे लक्षणे न्यायमञ्जर्याम्—

अयमस्य पदस्यार्थ इति केचित् स तेन वा।
योऽर्थः प्रतीयते यस्मात् स तस्यार्थ इति स्मृतिः॥[८]

इति लक्षणैः स्पष्टं प्रतीयते यदर्थशक्तिरेव देवीव चराचरजगतः[९] शब्दजगतश्चाधारभूता। यद्यपि शब्देन शब्दार्थयोर्बोधो भवति, तथापि न शब्दोऽर्थोत्पादकः, अपि तु ज्ञापक एव। शब्दार्थयोरन्तरं विदधता महाभाष्यकारेण स्पष्टत उक्तं शब्दोऽर्थनिमित्तक एव—

"युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यात्, नार्थनिमित्तकेन नाम शब्देन भवितव्यम्। अर्थनिमित्तक एव शब्दः"।[१०]

यास्कोऽप्यर्थसामान्यं बलवन्मनुते, शब्दसामान्यात्। अतः सदैवार्थमनुलक्ष्यैव निर्वचनं कर्तव्यमिति सबलं प्रतिपादयति—

---

१. "अर्थविज्ञान और व्याकरण दर्शन"—पृ० १
२. ऋक् १०।७१।५।
३. निरुक्तम् १।२०।
४. बृह० २।९९।
५. महाभाष्यम् ५।१।११९।
६. वाक्यपदीयम् २।३३०।
७. श्लोकवार्तिकम् १६०।
८. न्यायसूत्रम्, पृ० २९९।
९. "आधारभूता जगतस्त्वमेका"—दुर्गा स० ११।४।
"त्वमीश्वरी देवि! चराचरस्य"—दुर्गा स० ११।३।
१०. महाभाष्यम् १।१।४५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येन"[१] शब्दस्य इवार्थस्यापि विभागः कर्तुं न शक्यते ।[२]

वस्तुतस्तु व्यापकतार्थस्य शब्दादप्यधिका। अर्थबोधनायैव शब्दा प्रयुज्यन्ते। यथा पतञ्जलिना—"अर्थगत्यर्थः शब्दप्रयोगः, अर्थं सम्प्रत्ययिष्यामीति शब्दः प्रयुज्यते"[३] कुमारिलभट्टेन "सर्वो हि शब्दोऽर्थप्रत्यायनार्थं प्रयुज्यते"[४]; निरुक्तकारेणापि च "अर्थो हि प्रधानं तद्गुणभूतः शब्दः[५]" स्वीकृतम्। अथ च ते शब्दा लोकव्यवहारनिमित्तभूता एव। यथोक्तं भर्तृहरिणा—"शब्दा लोकनिबन्धनाः"[६] इति। अपि च महाभाष्यकारेण—"लोकेऽर्थकृतं प्राधान्यम्"[७(क)] इति। अन्यच्च काशिकायाम्—"लोकत एवार्थगतेः"[७(ख)] इति।

तथ्यं त्विदं यदर्थस्य न शुद्धरूपेण वाचकः शब्दः। तत्र न सा शक्तिर्याऽर्थंशक्तिं पूर्णतः स्पर्शने समर्था। यथा भर्तृहरिः—

वस्तूपलक्षणं शब्दो नोपकारस्य वाचकः।
न स्वशक्तिः पदार्थानां संस्प्रष्टुं तेन शक्यते ॥[८]

अत्र पुण्यराजोऽपि—

"अनेकशक्तिरपि ह्यर्थो न शब्दैः साकल्येन स्पृश्यते, नियतविषयत्वात् शब्दशक्तीनाम्"।[९]

अत एव यान् भावान् कदाचन व्यक्तीकर्तुं शब्दा यदा अशक्ता भवन्ति, तदा अभीष्टार्थं स्पष्टीकर्तुमिङ्गितादिसाधनानि अपेक्ष्यन्तेऽपराणि[१०]। अथ च ललितकलासु केवलं काव्य एव शब्दा अर्थवाचकाः, अन्याः कलाः स्वभावाद् मूकरूपेणैव द्योतयन्ति। वयञ्च वास्तुकलाया उत्कृष्टताभिः, मूर्तिकलायाः सजीविताभिः, चित्रकलाया लालित्यैः, सङ्गीतकलायाश्च स्वरलहरीभिः, प्रकृतेश्च रमणीयताभिर्भावविमुग्धा भवामः। परब्रह्मणः सर्गे न किमपि वस्त्वर्थतत्त्वव्यतिरिक्तम्। चराचरजगदर्थसूत्रेणैवानुस्यूतम्।

---

१. निरुक्तम् २।१।३।

२. शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति।
विभागैः प्रक्रियाभेदमविद्वान् प्रतिपद्यते ॥ (वा० प० २।१३)

३. महाभाष्यम् १।१।४३। ४. मीमां० सू० (टीका) १।३।८। ५. निरुक्तम् (दुर्गा०) २।१।

६. वाक्यपदीयम् २।२२९। ७ (क) ३।१।१। ७ (ख) काशिका अष्टा० १।२।५६।

८. वाक्यपदीयम् २।४४२। ९. तदेव (पुण्यराजटीका)। १०. "अन्तरेण खल्वपि शब्दप्रयोगं बहवोऽर्था गम्यन्ते। अक्षिनिकोचैः पाणिविहारैश्च" महाभाष्यम् २।१।१; "अभिनया अपि व्याप्तिमन्तः पाणिविहाराक्षिनिकोचादयः"—नि० दु० १।२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दार्थसम्बन्धनिरूपणम्

उपर्युक्तशब्दार्थनिरूपणेनेदं सहजतयानुमीयते यन्नित्यशब्दस्य नित्यार्थस्य च सम्बन्धोऽपि नित्यः स्वाभाविकश्च भविष्यति, तथाप्यत्र विचार्यते। एषः पारस्परिकसम्बन्धोऽनयोः खलु सभ्यताया उषःकालादेव पौरस्त्यपाश्चात्यदार्शनिकसाहित्यिकमनःशास्त्रीयभाषाशास्त्रीयचिन्ताधाराया विवेच्यो विषयः। यथा भर्तृहरिरनेकप्रवादान् सङ्केतयति—

तस्यार्थवादरूपाणि निश्चित्य स्वविकल्पजाः।
एकत्विनां द्वैतिनाञ्च प्रवादा बहुधा मताः॥[१]

यथा चोक्तं पाश्चात्यविदुषा पोस्टगेटेन यन्मानवजातेः समस्तेतिहासे शब्दार्थसम्बन्धविषयकप्रश्ना एव सर्वाधिकं गवेषणामतवैभिन्न्योत्पादका बभूवुः।[२] यद्यपि सर्वे मताः प्रवादा वापाततो भिन्नाः, परं विचारप्रह्वितेन चक्षुषावलोकनेन ते निष्कर्षत्वेनाभिन्नाः प्रतीयन्ते।

आचार्यः पाणिनिः संक्षिप्ततया परमतिस्पष्टतया शब्दार्थयोर्नित्यसम्बन्धं व्यनक्ति--"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति[3]। कात्यायनस्य "सिद्धे शब्दार्थसम्बन्धे"[४] इति वार्त्तिकं स्पष्टीकुर्वन् भाष्यकारः पतञ्जलिः पाणिनिसम्मतं तयोः स्वाभाविकं सम्बन्धं स्वीकरोति—

"किं स्वाभाविकं शब्दैरर्थाभिधानम्, आहोस्विद् वाचनिकम्? स्वाभाविकमित्याह[५]।"

भर्तृहरिरपि प्रतिपादयति यच्छब्दार्थावभिन्नौ, तत्र न कोऽपि वास्तविको भेदः—

"एकस्यैवात्मनो भेदौ शब्दार्थावपृथक् स्थितौ"[६]। अपरञ्चोपर्युक्तोद्धरणेऽपि[७] सोऽनेकप्रवादोल्लेखैः सह स्वयमेकत्ववादी वाद्वैतवादीति घोषयति।

सम्भवतः शब्दार्थसम्बन्धं नित्यमेव मन्यमानेन वैयाकरणेन व्याडिना पूर्वमेवोक्तम्—

सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः।
शब्दैरेव हि शब्दानां सम्बन्धः स्यात् कृतः कथम्॥

---

१. वाक्यपदीयम् १।८।

२. "Through out the whole history of human race, there have been no questions which have caused more heart. Searchings, tumults and devastations of the correspondence of words to facts-- 'The meaning of meaning"—P. 17.

३. अष्टा० १।२।४५।

४. महाभाष्यम् १।१।१।

५. तदेव २।१।१।

६ वाक्यपदीयम् २।३१

७. वा०० प० १।८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतः "नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः[1]" इति महाभाष्यवचोऽव्यभिचारि। यथा वाक्यपदीय उद्धृता श्रुतिः[2] "स हि सर्वशब्दार्थप्रकृतिः" इति, भर्तृहरेश्च स्पष्टोक्तिः—

अपृथक्त्वेन सम्बन्धस्तयोर्जीवात्मनोरिव।
नित्या शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः[3] ॥"

इति शब्दार्थसम्बन्धमभिव्यङ्क्तः। तथैव तट्टीकाकारो हेलाराजः[4], मञ्जूषायाञ्च नागेशः शब्दतत्त्वस्य सूक्ष्मत्वम् अर्थतत्त्वस्य च तदभिन्नत्वं प्रतिपादयतः।

एवमेव पतञ्जलि-भर्तृहरि-भट्टोजिदीक्षित-कौण्डभट्ट-नागेशप्रभृतिवैयाकरणानाम्, शङ्कराचार्य-मण्डनमिश्रादिदार्शनिकानां स्फोटसिद्धान्तेनापि प्राप्नोत्यर्थनित्यतैव पुष्टिम्। तेषामेव मते प्रतिभातत्त्वे शब्दार्थावनुस्यूतौ। यथोल्लिखितं वाक्यपदीये यत् प्रतिभात्मनो नेत्रे शब्दार्थाविति[5]।

वैयाकरणानां मतमेतन्न भाषाशास्त्रविरुद्धम्, यथा शङ्क्यते कैश्चित्। यथा भषाशास्त्रेऽर्थविस्तारार्थसङ्कोचोत्कर्षापकर्षादिभिरर्थपरिवर्तनं स्वीक्रियते, तथैव पतञ्जलिरपि "तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते। किं पुनस्तत्त्वम्? तस्य भावस्तत्त्वम्।" इति कथयित्वा नित्यसम्बन्धेऽस्मिन् मूलतत्त्वं न विनश्यति स्वर्णकटकादिवदिति प्रत्यभिप्रैति। एष भावः कैयटनागेशव्याख्यासु सुस्पष्टीकृतः, तत्रैव द्रष्टव्यः। भर्तृहरिर्हेलाराजश्च तत्र प्रवाहनित्यतामेव स्वीकुरुतः। अन्यच्च भर्तृहरेः—

प्रयोक्तैवाभिसन्धत्ते साध्यसाधनरूपताम्।
अर्थस्य वाभिसम्बन्धः कल्पनां प्रसमीहते[6] ॥

एतदुक्तौ न कापि विप्रतिपत्तिः। वक्तुस्तात्कालिकेच्छामभिलक्ष्य सम्बन्धमवास्तविकं कथितम्। ये च खपुष्प-प्रज्ञाचक्षुष्-बन्ध्यासुतादिकतिपयशब्दाः ते तु व्यवहारोपयोगितार्थं निर्मिताः। वैयाकरणानां वैज्ञानिकं दार्शनिकञ्च दृष्टिकोणं केवलं व्यावहारिकं मत्वा नापलपितुं शक्यते। तेनैवान्यत्र स्पष्टीकृतम्—

तस्मात्प्रत्यक्षमप्यर्थं विद्वानीक्षेत यत्नतः।
न दर्शनस्य प्रामाण्याद् दृश्यमर्थं प्रकल्पयेत्[7] ॥

---

१. महाभाष्यम् १।१।१।
२. वाक्यपदीयम् १।१०।
३. तदेव।
४. तदेव १।१।
५. तदेव १।११९।
६. वाक्यपदीयम् २।४३५।
७. तदेव २।१४३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ च स शब्दस्वरूपमेवार्थं मन्यते—

"शब्दो वाऽभिजन्यत्वमागतो याति वाच्यताम्[१] ।"

एवमेव द्वयोरभिन्नत्वं प्राधान्यञ्च विषयभेदात् स्वीकृते तेन—

"शब्दार्थयोरेकात्मत्वेऽप्यर्थांशस्यैव प्राधान्यमुपयोगवशात्[२] ॥"

आधुनिक-योरोपीयविद्वांसोऽपि शब्दार्थौ एकस्यैव वस्तुनो द्वौ पक्षौ मन्वते । अत एव जर्मनभाषा-शास्त्रिणा हम्बोल्टमहाभागेन शब्दस्याभ्यन्तरो बाह्यश्च द्वौ भेदौ प्रतिपादितौ । प्रकारान्तरेणैतन्मते तयोरभिन्नत्वम्[३] ।

दार्शनिकैरपि तयोर्नित्यसम्बन्धः स्वीक्रियते । यथा हि सांख्यमते—

"शब्दानां विशिष्टाविशिष्टाभिधेयनिबन्धनत्वम्" इति तयोस्तादात्म्यबन्धनमुपन्यस्तम् ।

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वाद्[४]" इति जैमिनिना औत्पत्तिकः, अर्थान्नित्यः सम्बन्धोऽङ्गीकृतः ।

शब्दमेवानित्यं स्वीकुर्वतां नैयायिकानां मते तु तयोः सम्बन्धोऽपि सामयिकः, साङ्केतिको वा गृहीतः, सोऽपीश्वरजनितः । यथा हि गौतमन्यायसूत्रे वात्स्यायनो मुनिर्भणति—"सामयिकः शब्दार्थसम्प्रत्ययः[५] ।" परन्तु वैज्ञानिकदृष्ट्या त्रुटिपूर्णोऽयं विचारः । अत्र योगे व्यासभाष्यस्य समीक्षा पर्याप्ता—

"किमस्य सङ्केतकृतं वाच्यवाचकत्वम्, अथ प्रदीपप्रकाशवदवस्थितम् । स्थितोऽस्य वाच्यस्य वाचकेन सह सम्बन्धः । सङ्केतस्त्वीश्वरस्य स्थितमेवार्थमभिनयति । यथावस्थितः पितापुत्रयोः सम्बन्धः सङ्केतेनावद्योत्यते—अयमस्य पिता, अयमस्य पुत्र इति[६] ।"

मीमांसकमतमेतदाधुनिकशब्दार्थविज्ञानस्य (Semantics) निकटतमम् । परन्तु 'सेमेण्टिक्स'नामके ग्रन्थे फ्रेञ्च-विदुषा (Breal) ब्रेआलमहोदयेन यः साङ्केतिकः सम्बन्धः प्रदर्शितः, स तु लक्षणायाः प्रकारान्तरेण वर्णनपरिणामः । यद्यप्येतस्याध्ययनं भाषाशास्त्रीयं मनोवैज्ञानिकञ्च, तथापि यथा प्रो० जे० आर० फर्थमहाशय आक्षिपति

---

१. तदेव २।१२९ ।
२. तदेव २।१३० ।
३. तु० तदेव १।४४ ।
४. जैमिनिसूत्रम् १।१।५; तत्र भाष्यञ्च ।
५. न्यायसूत्रम् २।१।५६ ।
६. योग० १।२७ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद् भाषायाः शब्दार्थमीमांसायां शब्दस्य समाजशास्त्रीयं रूपमपि ग्राह्यं यत्तेनोपेक्षितम्, तथापि तन्मते स्वाभाविकः सम्बन्ध इति प्रतीयते[१]।

ये तु केचिदेतयोः सम्बन्धं न नित्यम्, "शब्दानामुत्पन्नप्रध्वंसित्वात्", नापि च स्वाभाविकम् "पूरणदाहपाटनानुपपत्तेः[२]" स्वीकुर्वन्ति, तेषां मतं न समीचीनम्; शब्दस्तु शून्ये, मानवमस्तिष्के वा सदैव वर्तमानो ध्वनिभिरावश्यकतानुसारं प्रकटीभवति। जनिते ध्वनौ शब्दविकारेऽर्थविकारे वाऽस्पष्टतारोपो व्यर्थ एव। शब्दार्थः परिवर्ततां नाम, परमर्थ-विहीनः शब्दः कदापि न[३]। एवं तयोर्नित्यसम्बन्धः सिद्धः। तयोर्नोत्पाद्योत्पादकसम्बन्धः, अपि तु ज्ञाप्यज्ञापकः, प्रकाश्यप्रकाशको वा सम्बन्धः। यथा नागेशेन महाभाष्ये स्पष्टीकृतः[४]। कैयटेनापि लिखितम्—

"सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः, सर्वशब्दप्रत्यायनशक्तियुक्तश्चार्थ इति व्यवहाराय नियमः क्रियते[५]।"

यथा च योरपीयदार्शनिको डॉ० बाऊसः कथयति यत् समस्तवाणी भावानां वाहिका भवति[६]।

तन्त्रग्रन्थेष्वपि शब्दार्थयोरद्वैतत्वं (अभिन्नसम्बन्धः) वर्णितम्। तथा हि शिवतत्त्वे सङ्गता परा शक्तिः समस्तवाङ्मयजगत उपादानभूता। यतः शिवशक्तिमयमव्यक्तं ब्रह्म (बिन्दुः) कालक्रमेण शक्तिप्राधान्यं प्राप्य शब्दमयजगतः, तथा चैतन्यप्राधान्यं लब्ध्वा रूपमय-(अर्थमय)जगत उपादानकारणं भवति। अतः शिवः (ईश्वरः, सदाशिवः) अर्थाधिष्ठाता देवः, पार्वती च (शक्तिः, कुण्डलिनी, परा) शब्दाधिष्ठात्री देवी[७]। यथोक्तं शास्त्रकारैः—

---

१. "ध्वनिसम्प्रदाय और उसके सिद्धान्त"—पृ० ८

२. न्यायसूत्रम् २।२।५२।

३. यथा वदति रूसदेशीयो विद्वान् मेश्चानिनोवः "Each word has its own meaning and there is no word without meaning" ध्व० सि० श्री भोलाशङ्करव्यास-विरचितादुद्धृतम्, पृ० २१।

४. सर्वे सर्वार्थवाचकाः; महाभाष्यम् (प्रदीपः) २।१।४५।

५. तदेव १।१।६७।

६. "All speech is intended to serve for the communication of ideas" "ध्व० सि०" श्रीभोलाशङ्करव्यासविरचितादुद्धृतम्, पृ० ५४।

७. तु० वाक्यपदीयम् २।३१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दरूपशेषं तु धत्ते शङ्करवल्लभा ।
अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः ॥

अत एव पार्वतीपरमेश्वरौ स्तुवता कविकुलगुरुणा कालिदासेन शब्दार्थयोरविच्छिन्नः सम्बन्धः स्वीकृतः—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ[१] ॥

एवमेव महाकविमाघेनापि भणितम्—"शब्दादर्थमिवाभिन्नम्"[२] ।

तथैव हिन्दीभाषायाः कविभूषणेन गोस्वामिना तुलसीदासेनायमेव सम्बन्धो व्यक्तः—

वर्णानामर्थसङ्घानां रसानां छन्दसामपि ।
मङ्गलानां च कर्तारौ वन्दे वाणीविनायकौ ॥[3]

अपि च—

"गिरा-अरथ जल-वीचि सम कहियत भिन्न न भिन्न ।
बन्दहु सीता-राम पद जिन्हहि परम प्रिय खिन्न ॥"[४]

एवं भारतीयपरम्परायां वैयाकरणैर्दार्शनिकैः साहित्यिकैरपि शब्दार्थयोः सम्बन्ध एव स्वीकृतः । यथा क्षराक्षरयोः, पुरुषप्रकृत्योर्न परस्परभेदः, तथैव स्फोटध्वन्योः, शब्दार्थयोरप्यभेदः ।

'शब्दार्थसम्बन्धो वास्तविकः, प्रतीकात्मको वा !' इत्यत्र पाश्चात्त्यभाषाविदस्तयोः सम्बन्धं प्रतीकात्मकमेव मन्यते प्रायः । तत्र डॉ० शिलरः स्ट्रोंगश्च "अर्थो वैयक्तिकः" इति, डॉ० रसलः "अर्थः सम्बन्धविशेषः, यो न केवलं शब्दे, अर्थेऽपि भवति" इति, डॉ० पार्सन्सः "अर्थ आन्तरिकभावनानामिच्छानां वा सक्रियप्रतीकरूपः" इति मन्वते[५] । वक्ताभीष्टार्थस्य कृते विशिष्टशब्दं प्रतीकरूपेण प्रयुङ्क्ते । यथा घटे कम्बुग्रीवादिमत्त्वबोधनस्य न क्षमता, परं लौकिकव्यवहारार्थं घट एव प्रतीकत्वेन गृहीतो भवतीति तेषां मतं प्रतीयते । परन्तु प्रतीकाः (शब्दाः) भाव-(अर्थ) द्योतका एव, यथा स्वीकृतं फ्रेञ्चविदुषा देमेंस्तेतेन "यच्छब्दा भावप्रतीकाः" इति, अतः शब्दार्थसम्बन्धे न कापि विप्रतिपत्तिः ।

---

१. रघु० १।१ ।
२. शिशुपालवधम् । ३. रामचरितमानसे मङ्गलाचरणम् । ४. रामचरित० बा० १८ ।
५. "ध्वनि-सम्प्रदाय और उसके सिद्धान्त" ४-९ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दार्थसम्बन्धे मनःशास्त्रीयमहत्त्वं प्रतिपादयता आग्डन-रिचर्ड्स-नामकाङ्ग्ललेखक-द्वयेन[1] यदर्थो मानसिकतत्त्वरूपो घटनाक्रम शब्दप्रयोगयोश्च सम्बन्धभूतो घोषितः, स यद्यपि शब्दार्थाद्वैततां मन्यमानेन प्रो० फर्थेन[2] न स्वीकृतः, तथापि "यत्र धीरा मनसा वाचमक्रत"[3] इति श्रुतिवचसा मनसः समुद्भूता मुखाद् विनिःसृता वाणी (शब्दसंहतिः) मनसो विभिन्न-प्रक्रियानामभिव्यञ्जिका इति कृत्वा तयोः सम्बन्धः स्वीकार्य एव ।

शब्दलक्षणं कुर्वता ग्रेमहोदयेन एष ध्वनीनां संघातो लोकसम्मतार्थसंयुतो वर्णितः । एवमेव विश्वस्यानेकभाषासु पदार्थस्यैकस्यैव भिन्नानि नामानि दृष्ट्वा तुलनात्मकतया तानि निरीक्ष्य च शब्दार्थयोः स्वाभाविकसम्बन्धममन्यमानः पाश्चात्यो भाषावित् 'स्टुर्टिवण्टः'[4] शब्दस्यार्थं लोकसम्मतफलं स्वीकरोति । यथा—

(i) सूर्यः (सं० Sun (अं०) Sol (लै०) Sonne (ज०) Soleil (फ्रे०) ।

(ii) मातर् (सं०) Mother (अं०) Meter (ग्री०) Mater (लै०) Mate (लिथु०) Mutter (ज०) ।

(iii) बभ्रु (सं०) Brown (अं०) Fiber (लै०) Bebras (लिथु०) Biber (ज०) Bobru (रू०) प्रभृतिशब्दाः न स्वाभाविकरूपेण संज्ञिताः । सत्यम्, परमिदमपि तथ्यं यदेते शब्दा लोकसम्मत्याऽपि (By convention) न संज्ञिताः, अपि तु कस्यापि मूलभाषायाः पर्यायेभ्योऽपभ्रष्टाः शब्दाः[5], प्रश्नस्तु मूलभाषायाः शब्दार्थ-सम्बन्धविषयकः, नापशब्दविषयकः । अतः स्वाभाविकसम्बन्धस्तयोर्दुर्निवार एव ।

भाषोत्पत्तिविषयकसर्वसिद्धान्तैरपि शब्दार्थयोः सम्बन्धस्य परिपुष्टिर्भवति । परस्परा-भिप्रायप्रकटनसाधनीभूतः शब्दसमूहो भाषेत्युक्तं प्राक् । सम्बन्धविषयकपौरस्त्यपाश्चात्यानेक-मतान्यपि पर्यालोचितानि । परमिदं स्पष्टं यत् प्रारम्भादेवार्थमभिलक्ष्यैव शब्दानां प्रयोगो जातः ।

---

१. "द मीनिङ्ग आफ मीनिङ्ग" नामके ग्रन्थे ।
२. "भारतीयाफ्रिकनविद्याकेन्द्रस्य लन्दनस्थस्य प्राचार्यः ज० र० फर्थमहाशयः ।
३. ऋक् १०।७१।२ ।
४. "एन इण्ट्रोडक्शन टु लिंग्विस्टिक साइन्स" नामके ग्रन्थे ।
५. "भाषा का इतिहास" भगवद्दत्तकृतः, पृ० ९४ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेषां व्यवहर्ताऽपौरुषेयवादमते 'ईश्वरः'[१] एव, यः साक्षादथवा प्रयोजकवृद्ध-प्रयोज्यवृद्धरूपेणाविर्भूय स्वकीयेन व्यवहारेण सर्वं शिक्षयति। भाषासिद्धौ यदनुकरणमूलक-मनोरागाभिव्यञ्जक-प्रतीकलोकसम्मतिप्रभृत्यनेकसिद्धान्तपरिपुष्टं विकासवादिमतं बौद्धिकयुगसम्मतमपि नित्यसम्बन्धमेव तयोः प्रकाशते।

आदिमानवमज्ञानसम्पन्नमसभ्यञ्च मन्यमानानां डार्विनस्यानुपदं गम्यमानानां विकासवादिविदुषां कथनं न लेखकसम्मतम्। एतस्या विकासः समाजे सहजप्रवाहेणाभवत्। शिशोः स्वाभिप्रायप्रकटने याश्चेष्टा अस्फुटध्वनयो वा दृश्यन्ते, अथवा तस्यैकाक्षरपदानि, द्व्यक्षरपदानि वा श्रूयन्ते, इति भाषायाः प्रारम्भिकावस्थायाः सहजानुमानं कर्तुं शक्यते। जेस्पर्सनस्य योरोपीयविदुषो भाषोत्पत्तिविषये निगमनपद्धति-(Inbuctive method)रियमेव। अत्र भवति मनोयोगः[२], अतो न मनःशास्त्रविरोधः।

श्रुतावपि "एकाक्षरा वै वाक्[३]" यद्वा "अकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इत्याद्युक्तिभिः सर्वप्रथमं तु भाषा 'एकाक्षरा' आसीत् ततो द्व्यक्षरा[४] बह्वक्षरा वा जातेति प्रतीयते।

'वैदिकभाषाया उत्पत्तिर्जातैकाक्षराया भाषायाः' इति यन्मतम्[५], तेनापि पुष्टिर्भवति। वस्तुतः 'अकार' एव मुखस्य सर्वेषु स्थानेषु तत्तद्रूपतां भजते, विभिन्नवर्णादीन् चोत्पादयति। [६]प्रथमं त्वेतान्यक्षराणि (वर्णाः) एवैकैकभावस्य प्रयोक्तुर्वाचकानि। यथा पतञ्जलिः स्पष्टीकरोति—

"अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्"[७]

यथा चाद्यापि चीनीप्रभृत्येकाक्षरपरिवारभाषासु लक्ष्यते। ततः शब्दास्तदनन्तरञ्च वाक्यानि प्रादुर्भूतनि प्रयुक्तानि च। अत्राथर्ववेदोक्तिरियं ध्येया—

"गौरिन्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्याः समुद्रा अधिविक्षरन्ति"[८]॥

---

१. देवीं वाचमजनयन्त देवाः—ऋक् ८।१००।११। २. मनसा वा इषिता वाग् वदति।
३. ता० ब्रा० ४।३।३। ४. स भूरिति व्याहरत्, भूमिमसृजत—तै० आ० २।२।४।२। ५. गङ्गानाथझाशोधपत्रिकायां प्रकाशितः सु० कु० गुप्तमहाशयस्य लेखः "मोनोसिलैबिक आरिजिन आफ द वैदिक लैंगुएज" (नव० १९६२–अगस्त १९६३)। ६. अनेकवैदिकसाहित्यनिर्वचनेषु, निरुक्तस्य निर्वचनप्रणाल्याम्, आगमशास्त्रनिर्वचनप्रकारे च एकाक्षराया महत्ता दृश्यते।
७. महाभाष्यम्।
८. अथर्व० ९।१०।२१; तु० ऋक् १।१६४।४२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं या समाजसापेक्षा भाषोत्पत्तिर्जाता, तस्याः सर्वेषु स्तरेष्वर्थावबोधः स्वाभाविकः, यस्तयोः शब्दार्थयोः सम्बन्धं द्योतयति ।

इदमपि ध्येयं यदेतस्या भाषायाः पवित्रताऽविच्छिन्ना भवति, तथापि परिवर्तनमस्याः प्रकृत्या[1] येऽसंस्कृता अंशा दृश्यन्ते, ते वैयाकरणैः कविभिर्विद्वद्भिश्च यथाशक्ति यथावसरञ्च दूरीक्रियन्ते—

"सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः"[2] ।

अत एवादिशति भरतमुनिः—"नापशब्दं पठेत् तज्ज्ञः"[3] इदमपि प्रकटीकरोति यदर्थावबोधने भावावबोधने वा शब्दसन्ततेरावश्यकता, शब्दास्तु भाववाहका एवेति विवेचितं प्राक् । यथा चोक्तं महाभारते श्वेतकेतुविदुषा—

"व्यत्ययेन च वर्णानां परितापकृतो हि यः ।
स शब्द इति विज्ञेयस्तन्निपातोऽर्थ उच्यते ॥"[4]

अतः स्पष्टं यद् भाषा परम्परागतार्जिता सम्पत्तिः, न पैतृका । भवेन्नाम पैतृका, तर्हि तथैवाविकला गृहीता भवेत्, परं तन्न कुत्रापि दृश्यते । स्वाभिप्रायानुकूलमेव शब्दयोजनाया आवश्यकता परिलक्ष्यतेऽनुभूयते वा । अथर्ववेदेऽपि भाषा 'कामदुहिता वर्णिता—

सा ते कामदुहिता धेनुरुच्यत,
यामाहुर्वाचं कवयो विराजम् ।"[5]

अस्यामेव परम्परायां ये टी० बरो–जेस्पर्सन–बैरिडेल-मैक्समूलर-कीथ-गुणेप्रभृतिविद्वांसः क्रमिकोत्तरोत्तरभाषाविकासं मन्वते, तेऽपि शब्दार्थसम्बन्धं नित्यमेव स्वीकुर्वन्ति ।

अतोऽत्र न कापि शङ्का यद् वेदेभ्य आरभ्याद्यावधि भारते, यूनानदेशीयहिरैक्लिटस-नामक-दार्शनिकादारभ्याद्यावधि पाश्चात्यजगति च सर्वत्र शब्दार्थयोर्नित्यसम्बन्धतत्त्वं जाज्वल्यमानं लक्ष्यते । यच्च तार्किकप्रणालीमाश्रित्य भारतीयैरेकतः प्रतिपादितम्, अपरतस्तु तर्कप्रधानां मनःशास्त्रीयाञ्च पद्धतिमवलम्ब्य पाश्चात्यविद्वद्भिः सुप्रतिष्ठितम् । यद्यपि सर्वेषु मतेषु वैभिन्यं वर्तते, तथापि ते सर्वेऽन्ततस्तयोः सम्बन्धं स्वीकुर्वन्त्येवेति निश्प्रचम् ।

---

१. "दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः"—वाक्य० ।
२. ऋक् ९।७३।७ ।
३. नाट्यशास्त्रम् १७।१४६ ।
४. महाभारतम्–शान्ति० २२४।६८ ।
५. अथर्व० ९।२।५ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अक्षरब्रह्मणो वाचः शब्दतत्त्वस्य वा महत्ताऽनिर्वचनीया, अर्थतत्त्वमपि तत्रैवानूस्यूतं जगतश्च कारणम्। यद्यपि शब्दः स्वयमेव स्फटिकवत्, हिमालयवत् क्षीरसागरवच्च स्वयम्प्रकाशः, स्वयमुन्नतः, स्वयमेव गम्भीरोऽक्षयश्च; तथापि पुरुषोत्तमस्य चैतन्यतां ज्ञानतां (अर्थताम्) वोपलभ्यातिबुद्धो ज्योतिर्मयश्च जायतेतराम्। अतः शब्दार्थौ न भिन्नौ। यः शब्दः स एवार्थः, ज्ञानं वा। शब्दादभिन्नोऽर्थः, ज्ञानं वा क्व ? ज्ञानाभिव्यञ्जनायामेव शब्दा निमित्तभूताः प्रयुज्यन्ते। यथोक्तं यूनानदार्शनिकेन यत् सर्वं शब्दचक्षुषैव दृश्यते[1]।

अपरञ्च ध्वनिः शब्दस्य कलेवरम्, अर्थस्तु प्राणा एव। एतन्महत्त्वं निरीक्ष्यैव पाश्चात्त्यजगति माइकेल-ब्रेआल-महाभागैः 'अर्थविज्ञानम्' (Semantics or Semasiology) प्रारब्धम्, यत्र शब्दार्थानां विकास-ह्रास-लोप-पुनरुद्धाराद्यध्ययनं क्रियते[2], यन्महर्षियास्केन निरुक्ते पूर्वमेवोपन्यस्तमासीत्, यच्च शब्दार्थयोरुक्तसम्बन्धमेव स्वीकृत्य सम्भाव्यम्। भवति हि शब्दार्थे निमित्तद्वयम्—प्रवृत्तिर्व्युत्पत्तिश्च। तयोश्चाभिन्नत्वं विदितं विपश्चिताम्। एतयोः प्रवृत्तिनिमित्तत्वमेव प्रधानम्, व्युत्पत्तितत्त्वं साहाय्यमवश्यमेव विदधाति तदर्थबोधने। यथा कुशल-प्रवीण-शालीन-कौपीन-निभृत-गौप्रभृतिशब्दानां स्पष्टाववोधोऽर्थविज्ञानस्य पदार्थविकासस्य चार्व्या शैल्यैव द्योत्यते[3]।

व्यतिरिक्तमेतद् भाषा-विज्ञानस्य सर्वाः शाखाः ध्वनि-विज्ञानम् (phonology), रूपविज्ञानम् (Morphology), अर्थविज्ञानम् (Semantics), वाक्यविज्ञानम् (Syntax), निर्वचनशास्त्रञ्च (Etymology) शब्दार्थसम्बन्धमधिकृत्यैव विद्यन्ते, एतैश्च स सम्बन्धः सुविशदीभवति।

अपि च शब्दविशेषसम्बद्धार्थैः कस्यापि देशस्य जातेर्वा संस्कृति-सभ्यता-इतिहास-भूगोल-समाजशास्त्रप्रभृतिविषयकं ज्ञानं सरलतया सुस्पष्टतया प्रमाणपुष्टशैल्या च परिज्ञातुं शक्यते।

---

१. "All things are seen through the vision of words."

२. ब्रेमहाशयेन "सेमेण्टिक्स" अर्थविज्ञानं वेत्थं स्पष्टीकृतम्—Semantics, deals with the evolution of the meanings of words and with the reasons for their survival, decay, disappearance, and sometimes, revival, as well as with the causes of creation of new words.

३. कतिपयशब्दानामेतादृगध्ययनं द्रष्टव्यम्—"एसेज आन इण्डालाजी" नामके डॉ० सत्यव्रतविरचिते ग्रन्थे 'सेमेण्टिक्स' निबन्धे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्र शिलालेख-ताम्रपत्रलेख-प्राचीनभवन-प्राक्तनमुद्राप्रभृतीन्यैतिहासिकसाधनानि पुरातत्त्वसाधनानि प्रमाणानि चापि मूकानि भवन्ति, तत्र शब्दानां सम्यगध्ययनेनैव प्रागैतिहासिकानुसन्धाने पूर्णसाफल्यं प्राप्नोति। ईदृगध्ययनं सर्वप्रथमं जर्मनविदुषा मोक्षमूलरभट्टेन[1] प्रारब्धम्। एषा भाषा वैज्ञानिकी शिलाजातविद्या[2] जर्मनभाषायाम् "Urgeschichte", आंग्लभाषायाम् Linguistic palaeontology" इति कथ्यते।

इत्थञ्चात्र शब्दार्थविमर्शः कृतोऽस्माभिः, स तु नित्यः स्वाभाविकश्चेत्यस्माकं मतम्। शब्दतत्त्वस्य रक्षार्थमर्थतत्त्वम्, अर्थतत्त्वस्य रक्षार्थञ्च शब्दतत्त्वम्, उभयोरपि समन्वयः परब्रह्मणः सर्वोच्चसमादर इति शब्दब्रह्मणे नमः।

अत्रास्मिन्निबन्धनिष्पत्तौ येषामृषीणां पौरस्त्यपाश्चात्यविदुषां भाषावैज्ञानिकानाञ्च परम्परातः साक्षाद् वा यत् साहाय्यं समुपलब्धम्, तदर्थं तेषां सर्वेषां कृतज्ञोऽयं जन इति शम्।

---

१. नामैतत्स्वयम् (Max Muller) मैक्समूलरमहाभागेनैव दत्तं स्वलिखितवेदभाष्यस्य पुष्पिकायाम्—

शार्मण्यदेशजातेन श्रीगोतीर्थनिवासिना।
मोक्षमूलरभट्टेन भाष्यमेतद्विलेखितम्॥

२. सविशेषं तु केन्द्रीय-हिन्दी-निदेशालयस्य 'भाषा' नामिकायां पत्रिकायां प्रकाशितः "शब्दसंस्कृतिः" नाम लेखो द्रष्टव्यो लेखकस्य।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मधुरभक्तिपरम्परापर्यालोचनम्

डॉ० श्रीकृष्णमणित्रिपाठी, व्याख्याता

पुराणेतिहासविभागः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी

विविधकण्टकाकीर्णं सङ्कीर्णं वर्त्म विहाय परिष्कृतेन घण्टापथेन सञ्चरिष्णूनां रसविदां विपश्चितां मतेन "रसो वै सः, रसं लब्ध्वा ह्यानन्दीभवति" इति श्रुत्यनुसारं स्वरूपतटस्थ-लक्षणलक्षितो ब्रह्म-परमात्मेत्यादिपर्यायो भगवानेवास्ति रसः, तमेव साक्षात्कृत्य स्वल्पानन्दो जीवः प्रशस्तानन्दो भवतीति परमपुरुषार्थप्रापकतया भगवत्प्राप्तये भक्तिमार्गोऽस्त्यति-सुगमो मार्गः—

नायं सुखापो भगवान् देहिनां गोपिकासुतः।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ।।

(श्रीमद्भाग० १०।९।२१)

नित्यकर्मानुष्ठानाद् विशुद्धेऽन्तःकरणे श्रवणकीर्तनादिना भवति भगवति प्रेमोद्भव इत्याभिलक्ष्य विपश्चिदग्रेसरा यतिवर्याः श्रीमधुसूदनसरस्वतीमहोदया भक्तिरसायने सपरिकरं सोपपत्तिकं च भक्तिरसं व्यवतिष्ठपन्। विद्वद्भिश्च भक्तिः ज्ञान-कर्म-योगेभ्यः श्रेष्ठतमा स्वीकृतास्ति।

यथा समुद्रजलं वाष्पमेघवर्षादिक्रमेण परिणतं सत् पुनर्नदनदीद्वारा समुद्रमेवोप-गच्छति, तथैव रसस्वरूपात् प्रेमस्रोतसो भगवतः प्रेमधारा निःसृत्य भक्तानां मनांसि सिञ्चन्ती भूयः प्रेमस्रोतःस्वरूपं परमात्मानमेवोपतिष्ठते।

भारतीयप्रेमपद्धतौ प्रेम अनेकेषु रूपेष्वभिव्यक्तं भवति गुरु-शिष्ययोः श्रद्धास्पदं पर-स्परं प्रेम, पति-पत्न्योरन्योन्यमनुरागाभिधं प्रेम, पितापुत्रयोश्चेतरेतराश्रयं स्नेहाख्यं प्रेम, प्रेमप्रेरितः पित्रादिर्यथा स्वसन्ततिं पालयति, पोषयति, अभिरक्षति च सर्वाभ्यो बाधाभ्यः, तथैवेश्वरोऽपि भक्तप्रेमाभिभूतो भक्तान् पालयति, तेषां हितं विधत्ते, निरन्तरं तदर्थं चिन्तयति।

यथा पर्वतीयोच्चावचप्रदेशेषु मेघात् पतितं पानीयं शिलाखण्डैः संहन्यमानमित-स्तत उपढौकमानं यावत् समतलभूमौ नोपतिष्ठते तावद् निर्मलं स्थिरं वा न भवति,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथैव सृष्टिसमये जीवोऽपि प्रभुपादपद्मतः पृथग्भूय विभिन्नासु योनिषु संभ्रम्यमाणोऽनेकान् क्लेशांश्च सहमानो विविधां यातनामनुभवन् यावत् प्रभुपादपद्मं नोपतिष्ठते, तावत् तस्य पापतापयोः शान्तिर्न जायते। अतो जीव आनन्दधामानं परमात्मानमुपस्थायैव परमानन्दमनुभवितुमर्हति, नान्यथा; तदर्थं जगदाधारे भगवति परमप्रेमरूपा, परमात्मनि पराकाष्ठाया अनुरक्तिरेव वा भक्तिरस्ति सरलं साधनम्।

तत्राप्यनादिकालतो विविधविषयासक्तस्य जीवस्यानायासेन भगवत्पदप्राप्तये मधुरभक्तिः परमतमं साधनं समवस्थीयते। अतो मधुरभक्तिमीमांसायां मामकीनं मनो निमग्नम्।

यद्यपि मध्ययुगो ह्रासस्य युगः कथ्यते, अथापि भक्तिसाधनसाहित्यदृष्ट्याऽयमुत्कर्षस्य युगः स्वीक्रियत तज्ज्ञैः। अस्मिन् युगे प्रायो भारतस्य सर्वेषु भागेषु तत्त्वज्ञानिनो दार्शनिकाः, मननशीलाः गभीरविचारकाः, उच्चकोटिकाः साधकाः, वीतरागा महात्मानो भगवद्भक्ताः सन्तश्च प्रादुरभवन्। न केवलं शास्त्रवेत्तारो विद्वांस एव, अपि त्वनधीतशास्त्रा अपरिचिताक्षरा अप्यनुभविनः साधवः सन्तो महान्तश्च भगवद्भक्तिविषये शास्त्रसम्मतान् स्वानुभूतिनिर्भरान् स्वतन्त्रान् विचारान् चोपस्थापितवन्तः। फलतस्तदानीं योगतन्त्रसाधनोपासनार्चनादयो विविधा मार्गा दृष्टिगोचरतामागताः।

वृहद्धारीतस्मृतौ सूक्ष्मतया त्रिविधायाः श्रौतस्मार्तागमोपासनापद्धतेः समुपलब्धावपि संहिताग्रन्थेष्वाराधनाप्रक्रियायाः सविस्तरो विचारो विहितः। अभिसंहितानुसारं समाराधनाया द्वे प्रक्रिये स्तः। एकाऽमूर्तोपासना, द्वितीया समूर्तोपासना। तत्राग्नावाहुतिप्रक्षेपमाध्यमेन क्रियमाणोपासनाऽमूर्तोपासना, प्रतिमादिपूजनञ्च समूर्तोपासना कथ्यते।

मध्यकालीनवैष्णवसम्प्रदाये मधुरभक्तेः प्रथममुदयो जातः। दाम्पत्यप्रेमवर्णनं माधुर्यभावस्य मूलं स्रोतः। ऋग्वेदीयमधुविधाया अथर्ववेदीयमधुलतायाश्च प्रतिपाद्या मधुरोपासनेति केषाञ्चिदस्ति मतम्।

वैष्णवभक्तो माधुर्योपासनाभावस्य मूलान्वेषणे क्रियमाणे तेष्वेव स्रोतस्सु अवगाहनं समीचीनं प्रतीयते, येषु मधुराया भक्तेस्तत्त्वं स्पष्टतो लक्ष्यते। पाञ्चरात्रसंहितासु ज्ञानपाद-योगपाद-क्रियापाद-चर्यापादाख्याश्चत्वारः पादा विद्यन्ते। तत्राद्ये ज्ञानपादे ब्रह्म-जीव-जगत्-सम्बन्धिनां सिद्धान्तानां निरूपणं विद्यते। द्वितीये योगपादे यौगिकप्रक्रियाया विवेचनं वर्तते। तृतीये क्रियापादे मूर्तिमन्दिरनिर्माणस्थापनपूजनादिविधीनां समावेशः। चतुर्थे च चर्यापदे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सगुणोपासनायाः प्रामुख्यं दृश्यते। जयाख्यसंहितायां समूर्तार्चनस्य विस्तारो विहितः। अहिर्बुध्न्यसंहितायां वर्णिताः षड्विधा शरणागतिर्मधुरभक्तेः पूर्वस्थितौ प्रपत्तेः पुष्टेर्वा परिचयं प्रददाति—

आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।
(अ० बु० सं० २।५१)

ज्ञानामृतसंहितायां प्रभोः सेवायाः षड् विधयो वर्णिताः सन्ति। ते यथा—स्मरणम्, कीर्तनम्, प्रणतिः, पादवन्दनम्, अर्चनं समर्पणं च। तत्र भगवतः श्रीकृष्णस्य तत्प्रियगोपीनाञ्च प्रचुरं प्रेम वर्णितमस्ति।

मध्ययुगस्योत्तरभागे पाञ्चरात्रसंहिता अनुसरन्त्यो नृसिंहतापिनी-रामतापिनी-गोपाल-तापिनीत्यादिनाम्ना अनेका उपनिषदो दृष्टिगोचरतामागताः।

भगवत्पूज्यपादश्रीस्वामिशङ्कराचार्य-अप्ययदीक्षिताभ्यां पाञ्चरात्रसंहितानां वर्ण्यविषयं विविच्य तासामवैदिकत्वमुद्घोष्य तत्प्रतिपादितपद्धतेरुपेक्षत्वं प्रतिपादितम्। परिणामतः श्रीशङ्कराचार्यस्य विरोधे विशिष्टाद्वैतमतप्रवर्तकेन श्रीरामानुजाचार्येण पाञ्चरात्रसिद्धान्तस्य वेदवत् प्रामाण्यमङ्गीकृत्य साटोपं तत्समर्थनं कृतम्।

पाञ्चरात्रमते क्रियाचर्यातिरिक्ता प्रेममाधुर्ययोरप्य त्यक्षरूपेण स्वीकृतिरस्ति। मध्ययुगे शैवशाक्तमतयोरपि प्रभावश्चरममुत्कर्षमुपगत आसीत्। शासकवर्गेऽपि वैष्णवमतापेक्षया शैवमतानुयायिनोऽधिका आसन्। शैवागमशाक्ततन्त्रशासनपद्धतेरांशिकः प्रभावोऽपि मधुरभक्तेः राधातत्त्वे बहुभिर्विद्वद्भिः प्रदर्शितः।

शैवेषु भक्तेषु शिवभक्तेर्यादृशी कल्पनास्ति, शाक्तेषु च त्रिपुरसुन्दर्या यद्रूपमुपवर्णितम्, तादृगेव वर्णनं राधाभावेन गोपीभावेन च बहुत्रोपलभ्यते। युगलतत्त्वस्य मूलबीजमपि शैव-साधनासरणिषु लक्ष्यते। तन्त्रे भगवान् श्रीकृष्णः कामबीजात्मकः, राधादेवी च रतिबीजात्मिका प्रोक्तास्ति। बौद्धतान्त्रिकसमाराधनाया अपि मधुरभक्तिविकासेऽप्रत्यक्षो योग आसीत्। दक्षिण-भारतीयालवारभक्तानां मनो मुग्धकारिषु गीतेषु मधुरभक्तेः सुन्दरं रूपं दरीदृश्यते। सूफीमत-साधकेष्वपि मधुरभक्तेश्चमत्कारो विपुलो विलोक्यते। साहित्यस्य शृंगाररस एव भक्ति-सम्प्रदाये मधुरभक्तिरस्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राष्ट्रभाषाया हिन्द्या मध्यकालीननिर्गुणधारायां सन्तकवीनामभिव्यक्तिष्वपि माधुर्य-भावस्य प्राचुर्यं विलोक्यते। दाम्पत्यसम्बन्धरूपकेषु बाहुल्यं तु दादू-कबीर-नानकादीनां रचनासु समुपलभ्यते। निर्गुणोपासकानां सन्तकवीनां माधुर्यभावस्य मर्यादारूपे दृढो विश्वास आसीत्। सन्तकबीरस्त्वात्मानं श्रीरामस्य वधूं मत्वा अमन्दमानन्दमनुभवति स्म। एवं सत्यपि उच्छृंखलं प्रेम अनैतिकाचरणवर्णनञ्चैतेषां सन्तकवीनां रचनासु न दृश्यते। कौलकापालिक-पाशुपतादिमतेषु साधनावर्णनप्रसङ्गे नारीपुरुषमाध्यमेन मधुरभावस्याभिव्यक्तिर्जाता। परिवर्तिनि सहजियासम्प्रदाये तु मधुरभावः परकीयाभावमाध्यमेन चरमं विकाससीमानमुपगतं दृश्यते।

इत्थं पाञ्चरात्रसंहितात आरभ्य सहजियासम्प्रदायसाधनपद्धतिपर्यन्तं मधुरभक्तेरुप-करणचयनमुपलभ्यते।

मधुरभक्तेः शास्त्रीयरूपस्य विकासस्तु चैतन्यमतानुयायिनां वृन्दावननिवासिनां षड्गोस्वा-मिनां ग्रन्थैरेव जातः। तेषां ग्रन्थप्रणयनमूलप्रेरकः स्वयं चैतन्यमहाप्रभुरेवासीत्। तेन तु स्वय-महर्निशं श्रीकृष्णलीलायां निम्नगतेव स्वीकृतासीत्, किन्तु तद्भक्तानां कृते शास्त्रीयसुदृढाधारेण मधुरभक्तेः शास्त्रीयं पक्षं प्रतिपाद्य भक्तेः समुज्ज्वलं रूपं समुपस्थापयितुं गोस्वामिवर्याः प्रेरिता महाप्रभुणा।

तत्प्रेरणामवाप्य तैश्चैतन्यमतानुयायिभिः पण्डितैर्न केवलं मधुरभक्ते रूपरेखैव प्रस्तुता, प्रत्युत तस्या बाह्याभ्यन्तरं रूपमपि सर्वाङ्गपूर्णं परिकल्पितम्। एकतस्तैस्तस्यै शास्त्रीयं रूपं प्रद-त्तम्, अन्यत्र च तत्सिद्धये शास्त्रतो दर्शनतश्च प्रचुराणि प्रमाणान्युपस्थाय सुदृढांश्च तर्कान् संगृह्य स्वस्वग्रन्थेषु साहित्यिकाधारेण भक्तिरसरूपे प्रतिष्ठापिता मधुरभक्तिः, यत्र श्रीमद्भागवतादि-पुराण–महाभारत–नारदभक्तिसूत्र–शाण्डिल्यभक्तिसूत्रादीनामपि पर्याप्तं योगदानं दरीदृश्यते।

भक्तेराचार्यैर्गोपीनां भगवति श्रीकृष्णेऽपूर्वा भक्तिः, आदर्शभक्तिरभिमता। तथा हि नारदभक्तिसूत्रे—यथा व्रजगोपिकानाम् (२१), शाण्डिल्यभक्तिसूत्रे च—अत एव तद्भावाद् वल्लवीनाम् (१।२।५)।

वस्तुतो गोपीनां भगवति वासुदेवे आदर्शमयस्य प्रेम्णस्तुलना विश्वप्रेमपरम्परायां न क्वचिद् भवितुमर्हति। साधनामार्गे यावती प्रेममात्रा अधिका भवति, तावत्येव श्रेष्ठतमा भवति भक्तिः।

गोपिकानां प्रेम्णः केन्द्रबिन्दुः षोडशकलश्चन्द्र इव पूर्णकलो भगवान् श्रीकृष्णचन्द्र एवासीत्, यस्मिन् ताभिः सकलाः शारीरिक्यश्चेष्टा मानसानि सुखानि दुःखानि च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समर्पितान्यासन्। क्षणमात्रमपि श्रीकृष्णविरहे तासां जीवनं जलविहीनो मीन इव व्याकुलमासीत्। केवलं तत्प्राप्तिलालसायामेव ताभिः प्राणधारणं कृतम्। तदुक्तं स्वयमेव भगवता श्रीकृष्णेनोद्धवं प्रति व्रजे स्वसन्देशं प्रहिण्वता—

गच्छोद्धव! व्रजं सौम्य! पित्रोर्नौ प्रीतिमावह।
गोपीनां मद्वियोगाधिं मत्सन्देशैर्विमोचय॥
ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः।
ये त्यक्तलोकधर्मांश्च मदर्थे तान् बिभर्म्यहम्॥
मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः।
स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः॥
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन।
प्रत्यागमनसन्देशैर्वल्लव्यो मे मदात्मिकाः॥

(श्रीमद्भाग० १०।४६।३-६)

इदमेव विशुद्धस्य प्रेम्णः सत्यं स्वरूपम्, यतो हि तत्र न लौकिकरागजन्यबन्धनस्य विषयवासनाया वा सत्ता तिष्ठति। अत एव भक्तिसम्प्रदाये विशुद्धस्य प्रेम्णोऽपूर्वं स्थानमङ्गीकृतमस्ति। विशुद्धं प्रेमैवास्ति भक्तिभूमिकाया आधारस्तम्भः। समस्तानि साधनानीदमेव लक्ष्यीकृत्य भक्तेरैकान्तिकावस्थापर्यन्तमुपस्थापयितुं मार्गं प्रशस्तं कुर्वन्ति। भगवत्यनन्यं प्रेमैव भक्तिमार्गस्यास्ति प्राणः, यद् विना भक्तिर्भवति निष्प्राणा आडम्बरमात्रं वा। महत्त्वमेतदेव स्वीकुर्वता देवर्षिणा नारदेनात्मीये भक्तिलक्षणेऽस्य निवेशः स्वीकृतः।

अत एव च भगवति श्रीकृष्णे गोपीनामपूर्वं भक्त्यात्मकं प्रेम पर्यालोच्य ज्ञानिनाप्युद्धवेन तासां चरणरेणुस्पर्शस्पृहया वृन्दावनस्थेषु तृणतरुगुल्मलतादिषु किमपि जन्म वाञ्छता आत्मनः सौभाग्यवैभवं सूचितम्—

आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्॥

(श्रीमद्भाग० १०।४७।६१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

योगिराजस्यारविन्दस्य मतेनापि भगवत्प्राप्तिमार्गे प्रचुरं प्रेमैवैकं पाथेयमस्ति, येन निश्चप्रचं प्रभुः प्राप्तुं शक्यते। अनिर्वचनीयं प्रेमस्वरूपम् (५१) इति सूत्रयता भगवता नारदेन प्रेमस्वरूपस्यानिर्वचनीयत्वमुपस्थाप्य प्रोक्तम्, यदस्यामवस्थायां भक्तो भगवत्स्वरूपामृतमास्वादयन्नपि न वाणीद्वारा स्वानुभवं विशदीकर्तुं प्रभवति तत् प्राप्य तदेवावलोकयति, तदेव शृणोति, तदेव चिन्तयति च (५५)।

भक्तो यदाऽऽत्मानमसहायं मत्वा प्रेममयस्य परमात्मनश्चरणकमलयोरात्मनं समर्प्य तदिच्छानुसारो जायते, तदा स एव तस्य योगक्षेमं निर्वहति। इयमेवास्ति गीतोक्ता मुख्या शरणागतिः, इयमेव च संसारसागरसन्तरणाय सुगमं साधनं सर्वाश्रयाश्रये परमात्मनि सच्चिदानन्दस्वरूपे तल्लीनतासम्पादनाय च श्रेयस्करः पन्थाः।

वस्तुतो रूपगोस्वामि-सनातनगोस्वामिनोः प्रगल्भया प्रतिभया चैतन्यमतस्य धार्मिकं दार्शनिकं साहित्यिकं च स्वरूपं प्रकाशे समागतम्। भक्तिरसनिरूपणे गोस्वामिवर्याणां योगदानं सर्वाभ्यर्हितं महत्त्वपूर्णं चास्ति। भक्तिरसामृतसिन्धौ रूपगोस्वामिना तर्कसम्मतया शास्त्रीयपद्धत्या सप्रमाणं भक्ते रसरूपता प्रसाधिता। उज्ज्वलनीलमणौ च मधुरभक्तेः शास्त्रीयं निरूपणं कुर्वता राधाकृष्णयोः परस्परं प्रेमपर्यालोचनप्रसङ्गे तेन विभावानुभावसञ्चारीभावानां साङ्गोपाङ्गविवेचनपूर्वकं भक्तिरसो रसपदे प्रतिष्ठापितः। दानकेलिकौमुद्यां श्रीकृष्णविषयिणी भक्तिः प्रतिपादिता। भक्तिरत्नाकरस्तु अन्वर्थनामैवास्ते, यत्र च साङ्गोपाङ्गाः सर्वे भक्तिविषयाः सविस्तरं समुपस्थापिताः सन्ति। जीवगोस्वामिनस्तु भक्तिरसामृतसिन्धावन्वर्थनाम्नीं दुर्गसङ्गमनीं टीकां कृत्वा वस्तुतो दुर्गमानि मूलस्थलानि समजीगमन्।

एवं वेदोद्भूता उपनिषद्भ्यश्च स्पष्टमग्रेसरन्ती, भगवद्गुणलीलाधामचरितानि चर्चयन्ती तदर्चनादिविधानं बोधयन्ती, निराकारं च ब्रह्मभक्तानां पुरः साकाररूपेण स्थापयन्ती पौराणिकी भगवद्भक्तिविचारधारा मध्यकालीनानां महात्मनां सतां विद्वद्धौरेयाणां च बुद्धिषु विशदतया अभिनवरूपेण परिणता सती शैवशाक्तवैष्णवादिधारासु प्रसृता। अनन्तरं भक्तकवीनां हृदयपटलेषु काव्यप्रवृत्त्या सह भक्तप्रवृत्तिर्जागृता, या शनैः शनैः संस्कृतप्रणयिभिः, हिन्दीप्रेमिभिः, अन्यभाषाविज्ञैश्च विद्वद्भिरग्रेसारिता प्रसार्यते च निरन्तरम्।

मानवयोनौ समुन्नतजीवनमभिलक्ष्य भक्तिभावनाया विषये बहुभिर्विपश्चिद्भिर्विवेकपूर्णो विपुलो विचारः प्रस्तुतः, येन भव्या भक्तिस्रोतस्विनी भारती यं लोकमानसमनन्तकालत एव भगवदुन्मुखं विदधाना संस्कृत-प्राकृत-पालि-अपभ्रंश-हिन्द्यादिभाषाद्वारा प्रस्फुटिता जाता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काव्यानन्द-ब्रह्मानन्दयोः सहोदरत्वरूपस्य चारितार्थ्यं भक्तिसाहित्येऽप्यवलोक्यते। साधकैरनुभूते-यस्मिन्नुच्चशिखरे ब्रह्मानन्दस्योपलब्धिः कृता, तत्रैवानिर्वचनीयानन्दस्याभिव्यक्तिर्भक्तकवीनां रचनास्वप्युपलभ्यते।

यद्यपि भक्तिसम्बन्धिनी रचना प्राचीनसाहित्येऽपि प्रचुरमात्रायां प्राप्यते, किन्तु मध्य-कालीनभक्तकवीनां कृतिषु यया निपुणतया, तल्लीनतया, एकात्मतया च भक्तिभावनाया यादृशं विविधं मनोरम रूपं व्यक्तीभवति, न तादृशमन्यत्रोपलभ्यते।

युगेऽस्मिन् प्रधानतया हिन्दीसाहित्यक्षेत्रे भक्तिविकासाय निर्गुणकबीर-सूफी-जायसी-कृष्णभक्तसूरदास–रामभक्तगोस्वामितुलसीदासप्रभृतीनां सन्तकवीनां महत्त्वपूर्णं योगदानं जातम्। अत एव हिन्दीसाहित्यस्यायं कालो भक्तिकाल इति नाम्ना व्यवह्रियते। भक्ति-कालोऽयमादौ द्वयोर्धारयोर्विभक्तः, यत्रैका निर्गुणधारा, द्वितीया च सगुणधारा कथ्यते। इमे द्वे अपि धारे पुनर्द्वयोर्द्वयोः शाखयोर्विभक्ते, तथा च निर्गुणधाराया ज्ञानाश्रयी प्रेमाश्रयी चेति द्वे शाखे जाते। सगुणधाराया रामभक्तिः कृष्णभक्तिः श्चेति नाम्नी अपि द्वे शाखे अभूताम्। तत्र ज्ञानाश्रयीशाखायाः प्रमुखप्रतिनिधिकविः कबीरोऽस्ति प्रेमाश्रयीशाखायाश्च मुख्यो मलिकमुहम्मदजायसी। यत्र कृष्णभक्तिकाव्यस्य प्रातिनिध्यं कविवरः सूरदासः करोति, तत्र रामभक्तिकाव्यस्य च गोस्वामी तुलसीदासः। एवं पारसीकबौद्ध-जैन-ईसाई-इस्लाम-धर्मेष्वपि भक्तिप्रणालीनां प्रचुरा चर्चाऽस्ति।

वस्तुतः स्वेष्टदेवताराधनं विना न कैश्चिदपि सम्प्रदायैः, न वा कैश्चित् पुरुषैरुत्कर्ष-मवाप्तुं शक्यते। अत एव विश्वे सर्वेषु सम्प्रदायेषु स्व-स्वविश्वासानुसारं विभिन्ना भक्ति-सम्बन्धिनो विशेषा दरीदृश्यन्ते।

भगवन्नामगुणादिश्रवणं भक्तेरस्त्यारम्भिकं सोपानम्, यद्धि यदा कीर्तनस्मरणादि-सोपानानन्तरेऽनयदात्मनिवेदनद्वारा साधकं भगवत्पादपद्मप्रासादे प्रापयति, तदा स कृतकृत्यो भूत्वा लोकातीतं पूर्णं सुखमनुभवति।

मधुरभक्तेरस्ति महत्त्वपूर्णमेकं वैशिष्ट्यम्। मधुरभक्तिर्मार्गो हि न लौकिकं जीवन-मुपेक्षते, अपि तु लोकवासनां स्वीकृत्य तस्या मार्जनं संशोधनमुन्नयनं वा प्रक्रिययाऽनया क्रियते। अस्याः प्रधानं लक्ष्यं सांसारिकव्यवहारस्वीकृतिपूर्वकं मानवमनस्यनुबुद्धानन्दोद्बोधनमेवास्ति। यथा उच्चतमसाधकवर्गं इन्द्रियदमनेनान्ते भगवत्प्रेमैव प्राप्यते, तथैव माधुर्यभावस्य साधकोऽपि तदेवाभिलक्ष्य तत्र प्रवर्तते। क्रियमाणेऽप्यनेके प्रयासे मानवोऽनादिकालतोऽनुस्यूतां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मनसि स्थितां कामवासनां न सर्वथा समुच्छेत्तुं पारयति। अतस्तां साधनं विधाय तस्या उन्नयने संशोधने च प्रवर्तते। अत एव शाक्तैः, तान्त्रिकैः, बौद्धैः, ईसाई-सूफीमतानुयायिभिर्विभिन्नैः साधकैरपि काममतिरस्कृत्य भक्त्या तं दिव्यप्रेम्ण उदात्तभूमौ शनैः शनैः प्रतिष्ठाप्य तस्य संशोधनाय उन्नयनाय च महान् प्रयासो विधीयते।

मधुरभक्तौ यस्योदात्ततमस्य प्रेम्णः कल्पनास्ति, न तद् यौनेन सम्बन्धेन समुद्भूतं कामेच्छापरकं प्रेम अभिमतमस्ति। यतो हि कामजन्ये प्रेम्णे स्वसुखस्य प्राधान्यं तिष्ठति, न तत्र प्रियतमस्य सुखेन सुखित्वमपेक्षितं भवति, किन्तु भगवति प्रेम स्वसुखविवर्जितम्, तत् सुखप्रधानमेव भवति। तत्र न जायते स्वसुखसुखित्वस्य लेशोऽपि अपि त्वात्मविस्मृतिपूर्वकं परमात्मनः सुखसुखित्वस्यैवोत्कृष्टा कामनैव जागर्ति।

लोके दाम्पत्यभावसंश्लिष्टः शृङ्गारात्मको भावो निम्नकोटिको मन्यते, तदुन्नतो वात्सल्यभावः, ततः सख्यस्याऽस्ति स्थानम्, तदुपरि दास्यभावः, तदनन्तरं निर्वेदपोषकः शान्तभावो मान्यो भवति, किन्तु माधुर्यभावे क्रमस्याऽस्य पूर्णतया विपर्ययो दृष्टिगोचरीभवति। अयं शान्त-दास्य-सख्य-वात्सल्य-दाम्पत्यभावक्रम उत्तरोत्तरोत्कर्षदृष्ट्या ग्राह्यो भवति। दाम्पत्य-भावः कान्तभावः, शृङ्गारभावश्चैकस्यैव भावस्य सन्ति द्योतकाः, मधुरभावो वा अस्यैवास्ति परिचायकः।

मधुरभक्तेरियमेकाऽस्त्यपरा विशेषता—अस्यां विधिनिषेधयोर्बाह्यप्रपञ्चाज्जायते विमुक्तिः। विधिनिषेधयोः प्रपञ्चो हि भवति सदैव बाह्याडम्बरे पर्यवसितः। अतो यदि तं परिहाय भक्तिपथं प्रशस्तं क्रियेत, तर्हि स निश्चप्रचं सर्वजनसुलभ आकर्षकश्च भवितुमर्हेत्।

गृहस्थाश्रमे स्थितानां पुंसां भक्तिपथे समारोढुमनया मधुरभक्त्या संभवति सुखदं साहाय्यम्। समाराध्ययो राधाकृष्णयोर्दाम्पत्यभावं स्वीयलौकिकजीवनस्य दाम्पत्यभावेन सह मेलयित्वा शनैः शनैः कामवासनासमुन्नयनपूर्वकं भक्तिमार्गेऽग्रेसर्तुं शक्यते। मार्गस्यास्य रहस्यं सम्यगनवबुध्य यदि सामान्यलौकिककामवासनारूपे ग्रहणं क्रियेत, तर्हि मन्ये समस्तं माधुर्यतत्त्वं कामकेलिकर्दमकलुषितं सद् यौनभावनातृप्तिपर्यन्तमेव सीमितं स्यात्। दशायामस्यां न शृङ्गारस्योन्नयनं मार्जनं संशोधनं वा सम्भवति, नापि साधकस्याभ्युदयो भवितुमर्हति। अत उच्चकोटिकाः साधकाः सर्वथा स्वसुखमुपेक्ष्य भगवत्सुखाय तत्रात्मानं समर्प्य मधुरभक्तेरादर्शमुपस्थापयन्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तन्मयताद्वारा पृथक सत्ताया अभावाद् भक्तहृदयेषु पूर्णं सुखं जायते। वैषयिकसुखे न पूर्णता प्रत्युत पूर्णं सुखमस्ति आनन्दखनिः सच्चिदानन्दस्वरूपः साक्षाद् भगवानेव। यतो विषयानन्दो न ब्रह्मानन्दः, स हि ब्रह्मानन्दाभासस्वरूपः।

साधको यथा यथा विषयानन्दं परित्यजन् ब्रह्मानन्दाभिमुखमग्रेसरति, तथा तथा यथार्थ-सुखस्याधिकारितां लभते, अन्ते च स्वीयां पृथक् सत्तामपहाय पूर्णानन्दमधिगच्छति। एवञ्च भगवद्भावपरिपूर्णे साधकस्यान्तःकरणे विषयसुखनिवृत्तौ सत्यां विषयानन्दस्य समूलनाशे ब्रह्मानन्दस्य समुदये न काचिदस्ति विप्रतिपत्तिः।

भक्तः सदैव भगवद्भावे निमज्जति उन्मज्जति च। अतस्तस्य भोजनं पानमुपवेशन-मुत्थानं परिभ्रमणादिकं च सर्वमपि कर्म भगवद्भावयुक्तं सम्पद्यते। अतो भक्तस्य विषयानुभवे भावशुद्धया विषयानन्दो ब्रह्मानन्दप्रदो भवति। भगवद्भावभावनया विषयानन्दस्य विस्मृतौ स्वरूपानन्दस्योदये न कापि संशीतिः।

गोपिकानां सर्वा अपि क्रिया भगवतः कृष्णस्य सुखार्थमेवासीत्। अतस्तासां भगवति श्रीकृष्णे उत्कृष्टं प्रेम आदर्शभूतं गण्यते भक्तसमाजे। तत्र स्वसुखसुखित्वस्य प्राधान्यं नासीत्, अपि तु भगवत्सुखार्थमेव तासां सर्वाश्चेष्टा अजायन्त। अतस्तत्प्रेम्णः प्रत्युपकारं कर्तुमशक्नुवन् भगवान् श्रीकृष्ण. स्वमुखेनाह गोपिका उद्दिश्य—

न पारयेऽहं निरवद्य संयुजां स्वसाधुकृत्यं विबुधायुषापि वः।
या माभजन् दुर्जरगेहश्रृंखलाः संवृश्च्य तद् वः प्रतियातु साधुना॥
(श्रीमद्भाग० १०।३२।२२)

भक्तेर्विकासेन सह परमात्मानं प्रत्यनुरागस्याभिव्यक्तेः क्रमिकविकासस्यानुशीलनेन स्पष्टं प्रतीयते यत् पाञ्चरात्रसम्प्रदाये साधकैरीश्वरभक्तेर्यद्रूपमङ्गीकृतं तत्र प्रेमानुरागयोर्विशिष्टं स्थानमासीत्। महाभारतकाले भक्तानां मनःसु अनुरागस्य प्रेम्णो वा भावः पूर्णतया समाविष्टः पुराणकाले च नवधाभक्तिमूले भावस्यास्य प्राधान्यं प्रचुरता वा दरीदृश्यते, चैतन्यमते त्वस्य भावस्यांशः सर्वाधिकया मात्रया विकसितो जातः, यत्र पञ्चमपुरुषार्थस्य स्वतन्त्रस्य भक्ति-रसस्य साङ्गोपाङ्गं निरूपणं विधाय मधुरभक्तेः विकासश्चरमं सीमानमुपगत इत्यलं च पल्लवितेन।

—०—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आधुनिकविज्ञानदृष्ट्या परायाः वाचस्तत्त्वम्

श्रीरामनारायणदासः
अनुसन्धाता, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी ।

[अस्मिन् निबन्धे रसायनशास्त्रम् (chemistry) भौतिकविज्ञानं च (physics) समाश्रित्य व्याकरणदर्शने, अपि च तन्त्रादिषु परायाः वाचो यत् स्वरूपं व्याख्यातम्, तद्विषये युक्तायुक्तत्वविचारो विशदरूपेण समुपस्थापितः । अपि च "इयं परा वाक् कथं सर्वत्र व्याप्ता, कथं च विश्वप्रसूः" इत्ययमपि विषयो रसायनशास्त्रदृष्ट्या विशदीकृतः ।]

[1]ध्वनिः कम्पनात् प्रादुर्भवति, अतः "यत्र यत्र परिस्पन्दनं चाञ्चल्यं वा, तत्र तत्र नादः, यथा कण्ठे घण्टायां वा" इत्येवं वैज्ञानिकैर्मन्यते । यद्वा "यत्र यत्र शब्दस्तत्र तत्र परिस्पन्दनम्" इत्येवमपि वक्तुं शक्यते । घण्टायां यदा यस्मिन् स्थाने आघातः क्रियते, तत्र प्रथमम् आघाताव्यवहितोत्तरं ध्वनिः समुत्पद्यते, तदव्यवहितोत्तरं च घण्टायां यत्राघातः पूर्वं कृतस्तत्र तत्संश्लिष्टेषु च परमाणुपुञ्जेषूत्तरोत्तरं परिस्पन्दनं प्रादुर्भवति । अतः पूर्वं शब्दस्ततः परमाणुषु परिस्पन्दनमिति सर्वत्र स्पन्दनं शब्दपूर्वकमेव समुत्पद्यते ।

कुत्रचित् तु परिस्पन्दनमनुभूयते, किन्तु शब्दश्रुतिर्न जायते इत्येतावता तत्र ध्वनिर्न समुदेतीति तु न मन्तव्यम् । किन्तु तत्राऽपि परमसूक्ष्मो ध्वनिर्भवत्येव । यतो ह्येवमपि ध्वनि-

---

१. यह बात हम अपने सामान्य ज्ञान से जानते हैं कि ध्वनि पिण्डों के कम्पन करने से उत्पन्न होती है । बजती हुई घण्टी या थाली को छूने से हमें झनझनाहट मालूम होती है । बजते हुए सितार के तार को छूने पर उसके कम्पन का हमें स्पष्ट अनुभव होता है । इसी प्रकार जब हम बोलते हैं तो हमारे फेफड़ों से निकलती हुई वायु द्वारा हमारे गले में स्थिर स्वर-यन्त्र (Vocal chard) की झिल्लियों में कम्पन होने लगते हैं । वस्तुतः प्रत्येक प्रकार की ध्वनि ध्वनि-उत्पादक पिण्डों के कम्पन करने से उत्पन्न होती है । तुम स्वयं अनेक प्रयोगों की रूपरेखा खींच सकते हो । नीचे हम इस प्रकार के तीन प्रयोगों का वर्णन करेंगे ।

(१) किसी प्याले को पानी से आधा भरो और एक कमान (Bow) को उसके किनारे पर चलाओ । तुम देखोगे कि ध्वनि के साथ साथ पानी में लहरें भी उठ रही हैं—इत्यादि । (डा० बी० एस० दुबे, एम० एस० सी०, पी० एच० डी० कृत माध्यमिक भौतिक विज्ञान पृ० सं ३५६)

सूचना—अत्र सर्वे प्रयोगाः विस्तरभयान्न प्रदर्शिताः । केवलं प्रथमस्यैव प्रयोगस्योल्लेखः कृतः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

र्जायते यं वयं श्रोतुमक्षमाः, किन्त्वपरे प्राणिनः शृण्वन्ति यथा श्वानादयाः। अतो मानवीय-श्रोत्रेन्द्रियातीता अपि ध्वनयो भवन्तीति निश्चयेन स्वीकर्तव्यम्। अस्माकं देहेषु रक्तसंवाहिकासु नाडीषु यत् किमपि परिस्पन्दनमनुभूयते तत्राऽपि श्रोत्रेन्द्रियातीतो ध्वनिर्निःसरति। यदा हस्तेन हस्तं काष्ठादिफलकं वा स्पृशामः, यद्वा हस्तेन रज्जुं सूत्रं वा गृहीत्वा कम्पयामस्तदा तत्राप्यव्यक्तात्मको रवः (ध्वनिः) समुत्तिष्ठति। परिस्पन्दनं विना क्वापि केनचिदपि कस्य-चिदपि उत्तरदेशेन संयोगो न सम्भाव्यते। केनचित् सह समयनाय शरीरे पादयोर्वा परिस्पन्दने सति श्रोत्रेन्द्रियातिशायी शब्दोऽवश्यमेव प्रादुर्भवतीति "यत्र यत्र परिस्पन्दश्चाञ्चल्यं वा तत्र तत्र ध्वनिः, यथा घण्टायां कण्ठे वा," इति प्रत्यक्षानुभवजन्यप्रामाण्येन प्रमाणीकृतानुमानेन वक्तुं सर्वथा सत्यम्।

अतः कस्याञ्चिद् विवक्षायां प्राणिनां हृद्देशे स्थिते जीवात्मनि बुद्धया सह समेतुं यदैव परिस्पन्दनं चाञ्चल्यं वा जायते, तस्मिन्नेव क्षणे बुद्धया सह संयोगात् पूर्वं सूक्ष्माति-सूक्ष्मो रवः स्फूर्तिरूपेण प्रस्फुटति। बुद्धया सह संयोगात् पूर्वम् आत्मनिष्ठस्पन्दनेन यो ध्वनिः प्रस्फुटति, स एव रवः, आत्मनो बुद्धयादिभिः परम्परया संयोगानन्तरं कण्ठादिस्थानतोऽकारा-दिरूपेण बहिरभिव्यज्यते। न च निष्कले आत्मनि स्पन्दनमयुक्तमिति वाच्यम्, तस्यापि चञ्चल-रूपत्वात्। "अणोरणीयान् महतो महीयान्" इति श्रुतौ ब्रह्मणो यद्रूपम्, तत्तु नटराजवच्च-ञ्चलं स्पन्दनमयमेव विद्यते। यत्कालावच्छेदेन तद् ब्रह्म महतो महीयस्तत्कालावच्छेदेन अणो-रणीय इति महतो महीयस्त्वम् अणोरणीयस्त्वं चैककालावच्छेदेन भवतः।

किञ्च "एकोऽहं बहु स्याम्" इत्यादिभिस्तस्मिन्नपि स्पन्दनं विज्ञायते, एकस्य बहुत्व-भवनं स्पन्दनेन विना न सम्भाव्यते। "यत्र यत्र परिस्पन्दस्तत्र तत्र रवस्य (नादस्य) स्फुर-णम्" इत्येवं पूर्वोक्तप्रत्यक्षानुमानप्रमाणाभ्यामयमेव विश्वासः सुदृढः सञ्जायते यदेकस्मिन् ब्रह्मणि यदा बहुत्वभवनेच्छारूपं स्पन्दनं समजनि, तदव्यवहितोत्तरमेव नादः प्रास्फुटत्।

अत्र नागेशकृतवैयकरणलघुसिद्धान्तमञ्जूषायां शक्त्याश्रयनिरूपणावसरे, यद्वा काशीखण्डे सृष्टिप्रक्रियायां यो नादाभिव्यक्तिक्रमो दृश्यते, तद्भिन्न एव क्रमः। तथा च मञ्जूषायाम्—

"ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबु-द्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः। ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य बिन्दोरचिदंशो बीजम् । चिदचिन्मिश्रोंऽशो नादः । चिदंशो बिन्दुरिति । अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते ।

अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यावस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव रवपरा आदिशब्दैर्व्यवह्रियते" इति प्रोक्तम् ।

"अबुद्धिपूर्विका" इति नागेशोक्तघटकस्य अबुद्धिपदस्य "परमेश्वरस्य स्वभावः, लीला च" इति पर्यायौ । स्वभावः कीदृग् इति चेद् बहुत्वभवनरूपः परिस्पन्दः । यद्वा रन्तुमिच्छारूपः । तदुक्तं काशीखण्डे —

"यदेकलो न शक्नोसि रन्तुं स्वैरश्वरप्रभो ।
तदिच्छा तव योत्पन्ना सैषा शक्तिरभूत्तव ॥ इति ।

"अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयम्"—इति पूर्वोद्धृतनागेशवाक्ये "अस्माद् बिन्दोः" इत्यनेन त्रिगुणात्मकबिन्दोर्ग्रहणम्, न तु चिदंशो बिन्दुरित्यस्य । अत्र प्रक्रियायां "पूर्वं रन्तुमिच्छा, ततस्त्रिगुणात्मको बिन्दुः, ततश्चेतनमिश्रो नादः" इत्येवं क्रमः । रन्तुमिच्छारूपपरिस्पन्दजन्यत्रिगुणात्मकबिन्दोरभिव्यक्त्युत्तरं नादः समजनि ।

परन्तु पूर्वोक्तेन प्रत्यक्षप्रमाणीकृतानुमानेनेदं पराया वाचो जनित्वं विश्वासं नैव समारोहति । ब्रह्मणि "एकोऽहं बहु स्याम्" इत्येवं यदा परिस्पन्दः समजनि, तदव्यवहितोत्तरमेव शब्दः सञ्जातः । यद्वा अपरिपक्वप्राणिकर्मणां फलप्रदानाय लीलापूर्विका यदेच्छा, यद्वा परिस्पन्दः क्षोभो वा सञ्जातः, तदव्यवहितोत्तरमेव नादः प्रादुर्भूतः, न तु पूर्वं रन्तुमिच्छा, ततः स्रष्टुमिच्छा, ततश्च त्रिगुणात्मको बिन्दुरिति । ब्रह्मणि परिस्पन्दे सति यो नादोऽभूत् स एव तस्मिन् सिसृक्षात्मिकां मायावृत्तिम् अथ च त्रिगुणात्मकं बिन्दुमजनयत् । यतो हि या काचिद् इच्छा ज्ञानं वा समुदेति तत्सर्वं शब्दपूर्वकमेव सञ्जायते । तथा चोक्तं भर्तृहरिकृतवाक्यपदीयस्य ब्रह्मकाण्डे—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते (वा० प० ब्र० का० १२३) इति ।

किञ्च निखिलप्रपञ्चस्य सृष्टिरपि शब्दपूर्विका सञ्जायते । एतच्च परिपाच्यमानेषु तण्डुलादिषु सर्वत्र नित्यमनुभूयते । अतो ब्रह्मणि पूर्वं सिसृक्षात्मिका मायावृत्तिः, ततश्च त्रिगुणात्मकस्य बिन्दोरभिव्यक्तिः, तत्सर्वं शब्दपूर्वकमेव समजनीति वक्तुं पार्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मनिष्ठपरिस्पन्दस्फुटितो यो नादः, स निखिलब्रह्माण्डस्य जनयिता, संसारस्य च प्रत्येकं परमाणुं व्याप्नुवन् परिस्पन्दयंश्च विराजते। एलवर्ट आइष्टीन-(Albert einstein) आदि वैज्ञानिकानां मतानुसारेण परमाणुषु सततं परिस्पन्दनस्य सत्त्वात् तत्रापि शब्दः सञ्जायते। यच्चलति गच्छति वा तज्जगद् उच्यते। परमाणवोऽपि परितश्चलन्ति, अतस्तेऽपि जगत्पदवाच्याः। यथा[1] ध्रुवलोके ध्रुवमभितो नक्षत्रमण्डलानि, यथा वा सूर्यमभितो ग्रहोपग्रहगणा भ्राम्यन्ति, तथैव परमाणुपुञ्जनिर्मितानां पृथ्वीजलतेजोवाय्वादीनां प्रत्येकं परमाणूनामाभ्यन्तरे स्थितं नाभिकं (Nucleus) अभित ऋणविद्युताऽऽविष्टा इलेक्ट्राननामका ग्रहकणा भ्राम्यन्ति।

प्रत्येकं परमाणोराभ्यन्तरे यन्नाभिकं तत्त्वं विद्यते, तस्मिन् "स्थितिजा, गतिजा" इत्याख्ये द्वे[2] शक्ती विद्येते। स्थितिजशक्त्या "इलेक्ट्रान-नामका ग्रहकणाः परिमितक्षेत्र एव केन्द्रमभितो भ्राम्यन्तु, न तु परिमितक्षेत्राद् बहिः" इत्येवं कम्पनगतेर्नियन्त्रणं क्रियते। स्थितिजशक्त्या परमाणूनां परिभ्रमणस्य नियन्त्रणादेव कोऽपि पदार्थश्छिन्नो भिन्नो वा न

---

१. प्रोट्रान और न्यूट्रान से निर्मित नाभिक के चारों ओर इलेक्ट्रान नामक ग्रह-कण परिक्रमा लगाते हैं।

(पृ० सं० २४)

नाभिक के चारों ओर इलेक्ट्रानों के परिक्रमा लगाने की क्रिया बहुत कुछ पृथ्वीद्वारा सूर्य की परिक्रमा के समान है।

(पृ सं० २५)

लेखक—डोनाल्डवार, अनुवादक-श्रीरामचन्द्रतिवारी, केन्द्रीय हिन्दी निदेशालय, शिक्षामन्त्रालय, भारतसरकार के सहयोग से प्रकाशित "परमाणु-शक्ति (क्यों और कैसे सचित्र विज्ञान)"

२. परमाणूनाम् आभ्यान्तरे स्थितं यन्नाभिकं तत प्रोट्रान (protrano) न्यूट्रान (Neutran) इति तत्त्वद्वयेन निर्मितम्, नाभिकस्य वाह्यग्रहकणाश्च इलेक्ट्राननाम्ना प्रोच्यन्ते। विजातीयविद्युतोः सान्निध्ये सति तयोः परस्परमाकर्षणं जायते। नाभिकस्य इलेक्ट्राननामका ग्रहकणा ऋणविद्युता, प्रोट्रान-तत्त्वानि च धनविद्युताऽऽविष्टा भवन्ति। अतस्तयोः (प्रोट्रान-तत्त्वनिष्ठधनविद्युतः, इलेक्ट्रान-ग्रहकणनिष्ठ-ऋणविद्युतश्च परस्परमाकर्षणं जायते। धनविद्युत्संश्लिष्टप्रोट्रानतत्त्वानाम्, ऋणविद्युद्भिव्याप्तानामिलेक्ट्रानग्रहकणानाञ्च एकादश २ संख्या भवन्ति। अतो द्वयोः समत्वादेव इलेक्ट्रानग्रहकणा नियतकक्षे एव परितो भ्राम्यन्ति। एतत्सर्वं पूर्वोद्धृतायां 'परमाणुशक्तिः' इति पत्रिकायां पञ्चविंशे षड्विंशे च पृष्ठे सम्यक्तया प्रतिपादितम्। तद् यथा—

"नाभिक का आकर्षण इलेक्ट्रानों को उसी प्रकार कक्षा में रखता है, जिस प्रकार आपकी भुजा बाल्टी को कक्षा में रखती है—इत्यादि। (पृ० सं० २६)

एतत्सर्वं मनसि निधाय मया मूले "प्रत्येकं परमाणुषु यन्नाभिकं तत्त्वम्, तस्मिन् स्थितिजा गतिजेति द्वे शक्ती विद्येते"। इत्येवं प्रकारान्तरेण प्रोक्तम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जायते। अन्यथा इलेक्ट्रान-नामकग्रहकणानां परिभ्रमणस्य नियन्त्रणाभावे कस्यचित् पदार्थस्य सत्ता न सम्भाव्यते। गतिजशक्त्या इलेक्ट्रानतत्त्वं स्वकेन्द्रमभितः स्पन्दितं क्रियते। परमाणुष्वियं परिस्पन्दनक्रिया स्वैरञ्चरे ब्रह्मणि स्न्तं यत् स्फुरणं जायते, सा तत एव; यया लेखन्याऽयं निबन्धो लिख्यते, तस्याः प्रत्येकं परमाणवः परिस्पन्दमया विद्यन्ते। लेखन्याः प्रत्येकं कणेषु सततं स्पन्दनस्य सत्त्वाच्छब्दोऽपि सततं तत्र भवति। श्रोतुर्वक्तुश्च शरीरस्य सूर्यरश्मीनाञ्च कणाः, वाय्वादीनां प्रत्येकं परमाणवः, वयं सर्वे यस्मिन् गृहे निवसामस्तस्य च सर्वे कणाः परिस्पन्दमयाः। किं बहुना, परमाणूनामाभ्यन्तरेऽपि सततं स्पन्दनं जायते। अतः सर्वमिदं जगत् किञ्चाद्वितीयं ब्रह्माऽपि स्पन्दनमयमेव विद्यते।

स्थावरनामा न कोऽपि पदार्थः। निरतिशयरूपेण स्थिरताया न कुत्राऽपि लाभः। अतः सर्वत्र निखिल-पदार्थजातस्य परमाणुषु स्पन्दनस्य सत्त्वात् तत्र श्रोत्रेन्द्रियातीतो मनसाऽपि ग्रहीतुमक्षमो ध्वनिः सततं प्रस्फुटति। सर्वत्र व्याप्तश्च स ध्वनिरधोक्ष[1]जत्वात् परेति नाम्नाऽपि व्यपदेष्टुं शक्यते। [2]परमाणुषु स्पन्दनस्य सततं सत्त्वादियं परा वाक् सर्वत्र व्याप्ता। रसायनशास्त्रदृष्ट्या भौतिकविज्ञानदृष्ट्या च पराया वाचो व्याप्तिमत्त्वं प्रत्यक्षानुमानाभ्यामित्थमेव व्याख्यातुं शक्यते।

सा परा वागेव विश्वभाषाया जनयित्री, अपि च सर्वेषामर्थानां निर्मात्री। तथा चोक्तम्—

"वागेव विश्वा भुवनानि जज्ञे" इति।

इयं श्रुतिः रसायनशास्त्रस्य यद्वा भौतिकशास्त्रस्य पद्धत्या व्याख्यातुं शक्यते। "ध्वनिद्वारा पदार्था निर्मातुं शक्यते" इत्याधुनिकध्वनिशास्त्रेषु पुष्कलरूपेण प्रक्रियात्मकं व्याख्यानं दृश्यते। पराश्रव्यध्वनीनां [3]रासायनिकोपयोगेऽतिशयं महत्त्वं प्रोक्तम्।

पराश्रव्यध्वनिद्वारा बृहदणुः परमाणुरूपेण परिवर्तते। एवं वाचो विश्वप्रसूत्वं रासायनिकदृष्ट्या विश्वसनीयं जायते। पराया वाचो विश्वव्याप्तित्वं विश्वप्रसूत्वञ्च भाषाविज्ञानदृष्ट्या व्याख्यातुं न शक्यते। यतो हि [1]भाषाविज्ञानं खलु भाषायाः सामान्यरूपमेव व्याचष्टे

---

१. अधः कृतम् अक्षजम् इन्द्रियजन्यज्ञानं येन यस्य वेति, स अधोक्षज उच्यते।

२. पराश्रव्य तरङ्ग की क्षमता—
पराश्रव्य ध्वनि की क्षमता श्रव्यध्वनि की अपेक्षा बहुत अधिक होती है जिससे अनेक प्रकार की रासायनिक, जैविक, यान्त्रिक आदि क्रियाएँ सम्पन्न होती हैं। श्रीललितकिशोरसिंह एम० एस० सी० कृत "ध्वनिविज्ञान" पृ० सं० २३१। अयं ग्रन्थः काशी-हिन्दूविश्वविद्यालयः, वाराणसी-द्वारा प्रकाशितः।

३. रासायनिक-पोटैशियम आयोडाइड (KI) के घोल में या हाइड्रोजन सल्फाइड(H_2S) में

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नूतनपदार्थानां निर्माता रासायनिक इव भाषां तदर्थं वा निर्मातुं न शक्नोति ।

यदि परा वाक् सर्वत्र व्याप्ता, तर्हि "प्रत्येकं पदार्थस्य सर्वेषु परमाणुषु सततं परिस्पन्दनं जायते" इत्याधुनिक मतं भारतीयैर्दार्शनिकैः सहृदयैः स्वीकर्तव्यम् । यतो हि यत्र परिस्पन्दनं तत्र ध्वनिः, यद्वा यत्र ध्वनिस्तत्र परिस्पन्दनमवश्यमेव जायते, ध्वनिस्पन्दनयोः साहचर्यस्य नित्यत्वात् । अथ च यद्याधुनिकैः पराश्रव्यध्वनीनां रासायनिकोपयोगः स्वीक्रियते, पराश्रव्य-ध्वनिना च विभिन्नपदार्थानां निर्माणं क्रियते, तर्हि 'वागेव विश्वा भुवनानि जज्ञे" इतीदं परमप्राचीनं भारतीयं मतं तैरपि वैज्ञानिकसहृदयैः स्वीकरणीयं विश्वसनीयञ्च ।

तथा च—

"भूरिति व्याहरत भूमिमसृजत"

इत्यादि वचनं मृषा, अस्मदुच्चरितभूशब्दात् पृथ्व्युत्पत्त्यदर्शनात्, इत्येवं प्रत्यक्ष-प्रमाणीकृतानुमानेन शब्दद्वारा जगत्स्रष्टा अविश्वासो नार्हः । "यदा तानसेनो दीपकरागमगायत्, तदाऽग्नेः प्रज्वलनं जातम् । अस्माभिरपि सैव गीतिर्गीयते । किन्तु तथा न दृश्यते" इत्यादिस्थलेषु पूर्वोक्तपदार्थनिर्माणानुमानस्य बाधो न चिन्त्यः । यतः साधनद्वारा शब्दं तन्निष्ठां शक्तिञ्च साधुतया ये समुपासितवन्तः, तेष्वेव शब्दद्वारा सृष्टिकर्तुः प्रजापतेरंशः प्रचुर-रूपेण विद्यते । यमर्थं प्रवदन्ति, सोऽर्थस्तद्वचनमनुसरति । तथा चोक्तमुत्तररामचरिते भवभूतिना "ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति" इति ।

—:०:—

पराश्रव्य-ध्वनि का सञ्चार होने से इन यौगिकों में से १ और S अलग हो जाते हैं । यह प्रक्रिया आक्सीकरण की है । पराश्रव्य ध्वनि से उल्टी क्रिया भी होती है । जिसे लघुकरण रिडक्सन कहते हैं, जैसे मर्क्यूरिक क्लोराइड (Mercuric chloride) का मर्क्यूरस क्लोराइड (Mercurous chloride) में बदल जाना । (श्री ललितकिशोर सिंह, एम० एस० सी० कृत "ध्वनिविज्ञान" पृ० सं० २३२)

The linguistic can simply define linguistic forms and their opproscimate meaning. But he can not do the work of the chemist, physicist, anthropologist. Rabert A Hall J. R.—linguistic and your language P. N 133 ।)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ग्रन्थसमालोचनम्

भारतीयं वृत्तम्[1]

अयं ग्रन्थः ए. ए. मेक्डोनलकृतस्य 'इण्डियास् पास्ट' इत्यस्य संस्कृतानुवादरूपः। इह नवस्वध्यायेषु १. विषयप्रस्तावः, २. वैदिककालः, ३. वेदकालस्योत्तरभागः—गृह्यकर्ममतं च, ४. वेदकालसमनन्तरः प्राचीनकालो नव्यं युगम्, ५. पश्चात्तनसंस्कृतकालः, इतिहासः, लौकिकसंस्कृतसाहित्यानि च, ६. कथा, अद्भुतकथाः, पशुपक्षिकथाश्च, ७. शास्त्रग्रन्थाः, ८. भारतदेशीयभाषान्—तत्साहित्यानि च, ९. भारतीयवृत्तस्य पुनरुपलम्भः (पुरालेखविद्या, नाणकविज्ञानकम्,)विषया वर्णिताः। ग्रन्थस्यैतस्यायमनुवादः संस्कृतज्ञानां महते लाभाय कल्पते। संस्कृतग्रन्थेतिहासचिन्तासमकालमेव विटर्निट्स्, मेक्डानल्, कीथ् इत्येते त्रयो ग्रन्थकाराश्चिरं प्रामाणिकत्वेन परिगृहीताः। इदानीमप्येतेषां ग्रन्था विश्वविद्यालयेष्वाचार्यैश्छात्रैश्च समं परिशील्यन्ते। तैः कृता निश्चयाः केषाञ्चिद् अद्यानभिमता भवेयुर्नाम, नानुपयोगिनः। एभिस्त्रिभिरपि कृतेषु ग्रन्थेष्वेष ग्रन्थो भारतीयवृत्ताख्यः सर्वतः पश्चिमो भवति (१९२७ खीस्ताब्दे रचितः)। अयं ग्रन्थकारो भारतीयनाटकानां यवन-नाटकमूलत्वमन्यैरुक्तं प्रत्यादिशति। तिरुवनन्तपुरनाटकानामभासीयत्वमपि सयुक्तिकं स्वमतत्वेन वर्णयति। मेकडोनल्-महोदयस्य भूमिकाया दर्शनेन विज्ञायते ग्रन्थस्य मुख्यमुद्देश्यं किमिति। न केवलं संस्कृतसाहित्यस्य, अपि तु भारतीयमत-भाषा-पुरावशेष-नाणकतन्त्राणामपि पर्यालोचनं विधाय भारतीयेतिहासः कथमुपलब्धव्य इति, प्रथमे पाश्चात्यविद्वांसः केऽत्र पर्यश्रमन् इति, उत्तरत्र चेतिहासोपलब्धये कथं परिश्रमो विधेय इति चेह निर्दिश्यते ग्रन्थे। प्राचीनरीत्या नवीनपद्धत्या वा प्रवर्त्यमानासु संस्कृतमहाकलाशालासु सुखमेष पाठ्यग्रन्थतया कल्पयितुं शक्यः। ग्रन्थस्य कोऽपि संक्षेप इह प्रस्तूयते सारस्वत्याः सुषमायाः पाठकानामुपकाराय—

परमप्राचीनकाले युद्धाभिरुचयः काश्चन जनजातयो भारतदेशमाक्रम्यादिवासिनो जनान् स्वाधीनांश्चक्रुरिति। भारतावरोधकानामेषां कवयः पुरोहिता भारते प्रवेशानन्तरमेव भाषायां सूक्तानि कवयितुमुपचक्रमिरे। इयं च भाषा पारसीक-ग्रीक्-लातिन-ट्यूटानिक्-केल्टिक्-

---

१—अनुवादकः—वे० श्री० वेङ्कटाचार्यः, एम० ए०, बि० ओ० एल०, बि० टि०, शिरोमणिः। प्रकाशकः—केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति। पृष्ठसंख्या ४०३, आकारः डबल=क्राउन, मूल्यम्—-१९·००

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्लावोनिक्-भाषाभिः सुदृढं संबद्धेतीदं तत्त्वं गतैकशताब्द्याः प्राक्तनकालपर्यन्तमविदितमासीत्। प्राचीनार्यभाषा साहित्यं च भारतनागरिकेतेतिहासविषये; पाश्चात्यैः क्रियमाणस्य परिशीलनस्य विषयभूतानां चतसृणां विद्याशाखानामुद्भावनेऽभिवर्द्धने च मुख्यं स्थानं प्रापतुः। एतावुभावाकरौ पाश्चात्यदेशेऽनुसन्धानविषयत्वेन १. तुलनात्मकभाषाविज्ञानम्, २. तुलनात्मकदेवताविज्ञानम्, ३. तुलनात्मकधर्मविज्ञानम्, ४. तुलनात्मकसाहित्यपरिशीलनं चोद्भावयामासतुः।

वेदविज्ञानविहीनेन मनुजेन भारतीयं बौद्धमतं न सम्यगधिगन्तुं शक्यम्, यतो बाइबिल-ग्रन्थपूर्वोत्तरभागयोर्यादृशः संबन्धो वर्तते तादृश एव संबन्धो वैदिकबौद्धमतयोरस्ति। क्रिस्तुयुगादत्यन्तं प्राक्तने कालेऽपि प्राकृतभाषायामाघातस्वर आसीदित्यत्रास्ति प्रमाणम्। वैदिकभाषाविज्ञानशास्त्रप्रतिष्ठापको रोठमहाशयः, सायणः स्वकीये भाष्य एकस्यामेवर्चि एकस्यैव पदस्यासंगतानि बहूनि व्याख्यानानि ददातीति, तस्यैव पदस्यान्यत्र क्रियमाणमपि व्याख्यानमसंगतं वर्तत इति च प्रादर्शयत्। अत्यन्तदुरवगाहे मन्त्रेऽपि वेद एव स्वयं व्याख्याता भवेदिति तस्याशयः। इदानीं सर्वेऽपि वेदविद्वांस ऋग्वेदव्याख्यायां विज्ञानानुगुणायां रोठमहोदयस्य प्रणालीरेवाद्रियन्ते।

वेदेष्वग्नेर्भौमं जन्म, दिव्यं जन्म, आन्तरिक्षं च जन्मेति त्रयोऽसाधारणा धर्मा असकृन्निर्दिष्टा वर्तन्ते। इदं च वैदिकं त्रित्वं पश्चात्तनस्य ब्रह्म-विष्णु-शिवात्मकत्रित्वस्योत्पादकमासीदित्यैतिहासिकदृष्ट्याऽवगन्तुं शक्यम्। ऋग्वेदकालस्यान्तिमे भागे वेदकवीनां मतिर्मूर्तविषयादमूर्तं प्रति गमने प्रवणतां दर्शयति। इयमेव प्रवणता मनुजानां मनस्सु स्थितानां केषाञ्चन भावानामपि देवतात्वं कल्पयति स्म। श्रद्धा-मन्युप्रभृतयो देवता ऋग्वेदस्यान्तिमे मण्डल उपलभ्यमाना एतादृश्य एव। प्राच्यभारतेऽसाधारणतयोपलभ्यमानो वटवृक्षो व्रीहिश्चर्ग्वेदमहर्षिभिरविदितौ। सिंहस्तु ज्ञातः। व्याघ्रस्तु नैव निर्दिष्टः सूक्तेषु। 'मृगहस्ती' इति (हस्तयुक्तोमृगः) कल्पितं गजस्य नामैव व्याख्याति यद् गजो नूतनतया तदा दृष्ट इति वेदेष्वादिवासिनां नगराणामैश्वर्यस्य च निर्देशः कृतो वर्तते। भाषाविज्ञानदृष्ट्या विचार्यमाणे त्विदं स्पष्टं यदथर्ववेद ऋग्वेदादर्वाचीनोऽपि ब्राह्मणग्रन्थेभ्यः प्राक्तन इति।

ब्राह्मणानि भारत-यूरोपीयगद्यसन्दर्भस्य प्रथमोदाहरणानि। आत्मशब्द ऋग्वेदे प्राणार्थकः[1]। लोकान्तरे कर्मफलमनुभवति जीव इत्ययं भावः स्वरूपेण प्रथमं शतपथब्राह्मणे दृश्यते। अयं सिद्धान्त उपनिषत्सु प्राप्तपूर्णविकासस्तत्रैव विस्तरेण वर्णितो विलोक्यते।

१—तुल० जर्मनभाषायां प्राणार्थिका क्रिया atmen इति वागीशः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संसृतिसिद्धान्तश्चायं बौद्धमतोत्पत्तिकाल एव (क्रि० पू० ५००) रूढमूलो जातः। अत्रेदं चित्रं भाति यद् बुद्ध आत्मास्तित्वं निराकुर्वन्नपि कर्मानुगुणं देहधारणं निरूपयन्तं तमिमं संसृति-सिद्धान्तं स्वीचकारेति। जन्मनो जन्मप्राप्त्यर्थमवश्यापेक्षितस्यात्मनोऽसत्तायामपि कर्म स्वफलं ददातीति स्वयं तर्कयति स्म बुद्धः।

भारते लेखनपद्धतिर्वेदकालावसानावधि नैव विदितासीत्। इयं लिपिः क्रि० पू० ८०० वर्षे वणिग्भिर्भारते कृतप्रवेशा भवेत्।

सूत्रग्रन्थास्त्रेधा विभक्तुं शक्याः—१. श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि च। अस्य कालस्योपक्रमे (क्रि० पू० ५००) संस्कृतभाषा स्वकीयमन्तिमं विकासं प्राप्तवती। अस्मिन् कृत्स्नेऽपि काले वेदभाषातो जाता बुद्धमतस्यावर्दयित्री प्राकृताभिधाना काचन देशभाषा संस्कृतेन सहैव भारते आसीत्। बौद्धमतग्रन्थो न कोऽपि बुद्धायुष्काले विरचितः। बौद्धमतस्य चरमाक्षयदशा त्वसभ्य (Darbarous) संस्कृतभाषालिखितेषु तदीयतान्त्रिकग्रन्थेषु द्रष्टव्या। क्रि० प० प्रथमशताब्दीतः पूर्वं कुत्रापि बुद्धस्य शिलामयी मूर्तिः कृताऽभूदिति नैव वक्तुं शक्यम्। बुद्धमतवत् साङ्ख्यमतवच्च जैनमतमपि परमेश्वरस्य सत्तां नाङ्गीकरोति। बौद्धमतं तु परिवर्तनं प्राप्य स्वजन्मभूमेरपि तिरोबभूव। तस्यावशिष्टा अंशाश्च मुसलमाननिरोधेन क्रि० प० १२०० वर्षेष्वात्यन्तिकनिष्कासनं प्रापुः।

ब्राह्मणानां पुराणेभ्यः कृष्णकथां भागीरथ्यवतरणवृत्तान्तम्, सगरस्य षष्टिसहस्रपुत्राणां विनाशकथाम्, अन्याश्च तादृशीर्बह्वीः कथा जैनाः स्वीचक्रुः। पश्चात्तनजैनमतकाले स्वमतप्रतिपादनाय संस्कृतं प्रथमं दिगम्बरा उपायुञ्जत।

क्रिस्तोः पश्चात्तनकालादारभ्य स्थिते वर्षसहस्रावधिके काले भारतीयनागरिकता तावत् तदसाधारणभूते व्यवस्थाविषये संसृतिसिद्धान्ते च पूर्वसम्प्रदायानुवृत्तिं केवलमकार्षीत्। वैदिककालादयं कालोऽत्यन्तं विभिन्नो जातः। देवतागणे ब्रह्मविष्णुमहेशानां प्राधान्यम्। वेदे प्रतिपादिता महान्तोऽपि देवा इह निम्नां दशां प्रापुः। इयमेव भावना विष्णोरवताराणां वर्णने प्रायशो मूलमभूत्। बुद्धमतं यद्यपि परमप्राचीनाद् ब्राह्मणमतादुत्पन्नः प्ररोह एव। अथापि बौद्धा एव शिलाभिर्देवगृहं निर्मितवन्तः, शिलासूत्करणमपि त एव चक्रुः। इदमुभयं पूर्वमेव निर्दिष्टं वर्तते। बौद्धैः कृतेषु स्मारकचिह्नेष्वेव क्रि० पू० द्वितीयशताब्दीत आरभ्य हिन्दूदेवतानामिन्द्रलक्ष्मीप्रभृतीनामाकाराः प्राचीनतयोपलभ्यन्ते। उपर्युक्ता विषयाः 'बुद्धमतकलात एव हिन्दूमतकला लब्धाः' इत्यमुं भावं स्थिरीकुर्वन्ति। देवा ऋग्वेदे उत्सर्गत एकशिरसो द्विबाहवश्च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वर्णिताः । अथापि तदा तदा पुष्पिताभिर्वाग्भिर्बहुशिरस्कत्वेन बहुबाहुकत्वेन च देवा निर्दिष्टाः । ततश्चाग्निस्त्रिमूर्धा भवति, यतस्त्रिषु स्थानेष्वग्निर्यागे ज्वलति ।

वस्तुतो भारतसाहित्ये महाभारतं सच्चरितोपदेशविषये विश्वकोशस्य स्थानमाददाति । विष्णोरवतारभूतः कृष्णस्तत्सारथिर्भूत्वा मोक्षप्राप्त्यै ब्रह्मनिदिध्यासनस्योपायत्वेऽपि लोके स्वधर्माचरणरूपं कर्मावश्यं कर्तव्यमित्युपदिश्य तच्छङ्कां निराकरोति । कदायं वृत्तान्तो भारते केन प्रक्षिप्त इत्यत्र नास्ति सूचकं किमपि प्रमाणम् । प्रतिपाद्येषु प्रधानांशेषु महाभारतेन संबद्धाः प्राचीनकथावर्णनपरा ग्रन्थाः 'पुराणानि' इति व्यपदिश्यन्ते । तानि चाष्टादश । प्रतिपाद्यविषयं महाभारताद् गृहीतवत्स्वेतेषु परमप्राचीनमपि पुराणं क्रि० पू० षष्ठशताब्दीतः प्राक्तनं नैव भवेत् ।

वाल्मीकिकृतरामायणकथा बहूनां नाटकानां वर्णनीये कथावस्तुनि बाहुल्येनोपयुज्यते स्म । इदमितिहासकाव्यं बह्वीषु भारतभाषास्वनूदितम् । एषु च मध्यकालिकेन (१५३२-१६२३) भारतीयकविना तुलसीदासेन कृतो हिन्द्यनुवादः[१] परमप्रधानः ।

भारतीयः सुप्रसिद्धः कविकालिदासः क्रि० पू० पञ्चमशताब्द्याः पूर्वार्द्धे न्यवसदित्यत्र विद्यत एव समीचीनं प्रमाणम् । अनैसर्गिकमन्यन्महाकाव्यं भट्टिकाव्यम् । संस्कृते नृत्-धातोः प्राकृतरूपाद् नटधातोरुत्पन्नं नट इति नाटकमिति च प्राकृतरूपं पदद्वयम् । भारतीय-नाटकस्य पूर्णो विकासो भारतीयपूर्वकालिकस्थितित एव जात इति निराबाधं निरूपयितुं शक्यत एव । यदि संस्कृतनाटकं विदेशीयनाटकमूलं स्यात्, तर्हि कृत्स्नमपि नाटकं रङ्गस्थानं यावन-मिति दत्तनाम स्यात् (न तु पटमात्रम्) । अवदानशतकाख्यो बौद्धसंस्कृतग्रन्थः क्रि० पू० तृतीयशताब्द्यां चीनभाषायामनूदितः । इदमवदानशतकं शोभावतीराजस्य पुरस्ताद् दक्षिण-देशीयैर्नटैः प्रयुक्तं किमपि बौद्धनाटकं निर्दिशति । ततश्चैवं प्रत्येतुं शक्यं यत् क्रि० पू० द्वितीय-शताब्द्यां संस्कृतनाटकं पूर्णविकासं प्राप्नोदिति । अत्युत्तमनाटककविः कालिदासः क्रि० पू० चतुर्थशताब्दीतः प्राक्तनो न संभाव्यते । कालिदासो भवभूतिश्चात्युत्तमौ नाटककारौ । नाटका-पेक्षितानाम् ऊर्ज-जीवकला-क्रियादीनां (action) विशिष्टगुणानां पात्रगुणचित्रणकौशलस्य च सत्त्वाद् मृच्छकटिकं भारतीयनाटकेष्वत्युत्तमं चकास्ति ।

१इयं मैकडॉनलमहोदयस्य भ्रान्तिः । रामचरितमानसं वाल्मीकीयरामायणस्यानुवादो नास्ति । प्रारम्भ एव 'नानापुराणनिगमागमसंमतं यद्रामायणे निगदितं क्वचिदन्यतोऽपि' इति तदीयसंस्कृत-पद्यदर्शनेनापि स्पष्टीभवति—वागीशः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राजशेखरोऽपूर्वाणि बहूनि पदानि प्रान्तीयानि चोपयुङ्क्ते। आभाणकतुल्यपदजातानां (proverbial phrases) प्रयोगेऽस्यास्यासक्तिरधिका। तस्य कर्पूरमञ्जरी भारतसाहित्येष्वतिश्लाघ्यं सुखान्तनाटकं भवति। समुचितपदविन्यासवित्त्यै, संस्कृतप्राकृतपद्ययोः श्लक्ष्णताज्ञानाय, लोकोक्तिपरिज्ञानाय तात्कालिकाचारव्यवहारादिपरिचयाय च राजशेखरकाव्यान्यध्येयानि।

लोककथासाहित्यविभागः, परिपूर्णकल्पनाशक्तिसमृद्धः, जटिलाभिरद्भुतकथाभिर्निचितः, गभीरस्य, हास्ययुक्तस्य च सन्दर्भस्य कल्पने नैर्भर्यंयुक्तः, कथायां मनोरञ्जनाख्यायिकायां च नवनवस्य वस्तुनः संदृब्धौ प्रदर्शितप्रभूतकल्पनाशक्तिश्च वर्तते। तन्त्राख्यायिका तु पञ्चतन्त्रस्य मौलिकं रूपं सुष्ठु प्रदर्शयति। तन्त्राख्यायिकायाः पाठद्वयं काश्मीरे सुरक्षितं वर्तते। भारतीया नीतिकथा अद्भुतकथाश्च भारतात् प्रस्थाय केन मार्गेण कृत्स्नेऽपि जगति प्रविष्टा इति गमनमार्गोऽस्माभिरवगन्तुं शक्यः। एतादृशग्रन्थेषु सर्वथा प्रधानं पञ्चतन्त्रं भवति। बाइबिलग्रन्थाद् ऋते नान्यः कोऽपि ग्रन्थ एवं बह्वीषु भाषास्वनूदितः। मतासंबद्धं पुस्तकं न किमप्येवमनूदितमिति सुदृढं वक्तुं शक्यम्। दशकुमारचरितस्य कथाकथनं तथा जटिलं यथा महता क्लेशेनैव प्रधानकथातन्तुरवगन्तुं शक्यो भवेत्। कृत्स्नोऽपि सप्तमोच्छ्वास ओष्ठ्याक्षररहितः कवेः किमपि शैलीचातुर्यं प्रदर्शयति।

आकाशे चरतां ज्योतिषां दर्शनमपेक्षमाणं वैदिककर्मानुष्ठानं ज्योतिश्शास्त्रस्योपक्रमं जनयामास। यागार्थवेदिनिर्माणे मानादीनामवश्यकर्तव्यतां जनयित्वा ज्यामितिशास्त्रमाविर्भावयामास। अथर्ववेदमन्त्रा बहवो भैषज्यतन्त्रस्य मूलभूतानि बीजानि दधति। यागादीनां नियमाः कल्पसूत्रं जनयामासुः। कल्पसूत्रं चेदं प्रयोजनवशाद् वैदिकशास्त्रस्य शाखा जाता।

लौकिकसंस्कृतापेक्षया ब्राह्मणेषूपनिषत्सु सूत्रेषु च दृष्टः शब्दप्रयोग एव पाणिनिव्याकरणस्य मूलं भवति। तत्सूत्राणि बीजगणितवदतिसंग्रहरूपाणि। तदीयमन्तिमं सूत्रम् 'अ अ' इतीदमत्रोदाहरणं भवितुमर्हति। पतञ्जलिकृतं महाभाष्यं च पाणिनिसूत्रमधिकृत्य न विचारयति, किन्तु कात्यायनवार्त्तिकानि। वस्तुतस्तु कात्यायनो प्रद्वेषरहितः सन्नेभिर्वार्त्तिकैः क्वचित् पाणिनिसूत्राणां शोधनम्, क्वचिदपेक्षितांशपूरणं च कुर्वन् मध्यस्थदृष्ट्या विचारयति।

वैदिकधर्मेण संबद्धे द्वे दर्शने भवतः—पूर्वमीमांसा, उत्तरमीमांसा चेति। भारतीयदर्शनेषु विज्ञानग्रन्थेषु च समादृताया विचारप्रणाल्याः स्वरूपमत्र शास्त्रे निरूपितं वर्तत इत्यस्य शास्त्रस्य प्राधान्यम्। पूर्वमीमांसा तु कर्ममोक्षसाधनं निर्दिशति, उत्तरमीमांसा च ज्ञानम्। वेदान्त-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूत्रेषु व्याख्यासाहाय्यं विना दुर्ज्ञेयानि व्यञ्जकपदान्येव वर्तन्ते। बादरायणस्य शङ्कराचार्यस्य च मध्येऽविच्छिन्नसंप्रदायस्यासत्त्वात् 'बादरायणस्य सिद्धान्तः कः' इति तत्त्वतो नास्माभिर्ज्ञातुं शक्यते। पश्चात्तनवेदान्तसिद्धान्तेषु प्रधानभूतो जगन्मिथ्यात्वनिरूपको यो मायावादो वर्तते स वेदान्तसूत्रेषु नैवोपचितिं प्राप्तो दृश्यत इतीदं परं सुनिश्चितं ऽत्येतुं शक्यम्। वेदान्तग्रन्थेषु प्राचीनतमे सूत्रानन्तरकालिके गौडपादिकारिकाग्रन्थेऽयं मायावादः प्रथममुपलभ्यते। शङ्कराचार्यस्य गीताभाष्यं व्याख्यानलक्षणानुगतं न भवति, किन्तु मततत्त्वविचारपरः स्वतन्त्रग्रन्थ इति व्यपदेष्टुं शक्यते। सुविदितः सर्वादृतः शोभनश्चाद्वैतप्रकरणग्रन्थो वेदान्तसाराभिधः सदानन्देन विरचितः। इहाद्वैतसिद्धान्तस्य बाह्याकारे बहवः साङ्ख्यसिद्धान्ताः संमिश्रिता दृश्यन्ते।

तत्त्वमधिकृत्य पूर्वकाले जाता भावाः प्रथमं वेदेषु दृष्टाः। आत्मानं ब्रह्म चाधिकृत्य प्रवृत्ताः सिद्धान्तास्तदनन्तरमुपनिषत्सु दृष्टा वर्तन्ते। शास्त्ररीत्या परिष्कृतं सर्वप्रथमं दर्शनं तु साङ्ख्यमेव। योगः साधनाविषये सर्वैरपि दर्शनैः संबद्धो भवितुमर्हति। भारतीयतापसेषु, अवैदिकेषु बौद्धजैनसाधुषु च योगो येन केनापि रूपेण वर्तत एव। प्रकृतेः पृथक्कृत्याऽऽत्मनोऽवस्थापनं कैवल्यम्।

न्यायदर्शनं वैशेषिकदर्शनं च पश्चादेकशास्त्रत्वं प्रापतुः। मतसंबद्धं विश्वासमपहाय स्वतन्त्रतया प्रवृत्ते इमे दर्शने 'विज्ञानानुसारिणि हेतुतन्त्रे (Logic) ज्ञानतन्त्रे (Theory of Knowledge) च' इति यथार्थं व्यपदेशमर्हतः। सर्वमिदं वैदिकं न्यायदर्शनम्—सूत्रम्, तद्भाष्यम्, तद्व्याख्या, व्याख्याव्याख्या, तस्या अपि व्याख्या इति पञ्चग्रन्थात्मकं वर्तते। वैशेषिकसूत्राणां प्राचीनं व्याख्यानं नैव रक्षितं दृश्यते। पदार्थधर्मसंग्रहाख्यं प्रशस्तपादकृतं भाष्यं तु प्रायशः क्रि० प० सप्तमशताब्दीयं स्यात्। वस्तुतोऽयं ग्रन्थो न व्याख्यारूपः, किन्तु स्वतन्त्रो ग्रन्थः। इह वैशेषिकशास्त्रविषया यथाक्रमं प्रतिपादिता वर्तन्ते। नैयायिका वैशेषिकाश्चामुं ग्रन्थमधुना स्वावश्याध्येयं मन्वते।

वैदिकदर्शनेभ्यो बहिर्भूतं लोकायतदर्शनम्। लोकायतसिद्धान्तश्च बृहस्पतिकृतसूत्रेषु, पतञ्जलिना महाभाष्ये निर्दिष्टे भागुरिनामके लोकायतशास्त्रव्याख्यानरूपे ग्रन्थे च प्रतिपादित आसीदित्यस्माभिरिदानीमगवम्यते। ग्रीसदेशीयं तत्त्वशास्त्रं भारतीयं तत्त्वशास्त्रं च किं येन केनापि प्रकारेण परस्परं संबद्धे भवत इत्ययं विषयोऽसकृत् पण्डितानामवधानं प्राप्नोति स्म। सेनाफानिसस्य पारमीनिडीसस्य च यः सिद्धान्तो वर्तते 'इलियीयः' (Eleatic) इति ख्यात-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्तस्य भारतीयवेदान्तस्य च यत् सादृश्यं विलोक्यते, तदुभयत्रापि देशयोः सिद्धान्तस्य समविकासमूलकं स्यात्, न त्वादानमूलकम्। पितागोरस् (pythagoras) विषये केचन विद्वांसो भारतीयोपस्कारस्य सत्तां निःसंशयमङ्गीकुर्वन्ति, केचित् तु न्यायवैशेषिकविषये ग्रीक्-उपस्कारं मन्यन्ते, परन्त्विदं न निरूपितं प्रमाणसाहाय्येन। एम्पेडोक्लीसस्य (Empedocles) परमाणुसिद्धान्तोऽपि भारतदेश एव स्वातन्त्र्येणोत्पन्नं परमाणुसिद्धान्तं पश्चादुपस्कृतवान् भवेत्।

यद्यपि धर्मशास्त्राणां कालो न सुनिश्चितः, अथापि वेदशाखाभिः संबद्धानि धर्मसूत्राणि प्रायशः क्रि० पू० अष्टम-तृतीयशताब्द्योर्मध्ये विलिखितानि भवेयुरित्यभ्युपगमः कार्यो भवति। मनोः कीर्तिः बर्मा-स्याम्-जावा-बालिद्वीपेष्वपि प्रससार। तस्मात् तद्देशानां न्याया अपि मनोर्धर्मशास्त्रेणोपस्कृता अभवन्। इयं स्मृतिः क्रि० पू० तृतीयशताब्दीतः प्राक्तनी न भवतीत्यत्र सन्त्येव बहूनि सूचनानि।

अर्थमधिकृत्यार्थशास्त्राभिधं ग्रन्थजातं व्यावहारिककौशलम्, आर्थिकव्यवस्थां, राज्यानुशासनम्, राजनीतिं च विषयीकुर्वत् प्रवृत्तमभिवृद्धं च दृश्यते। महाभारतस्य द्वादशं पर्व चास्य सत्तां निवेदयति। बौद्धास्त्वर्थशास्त्रोपदिष्टान् उपायान् नाङ्गीकुर्वन्ति। सच्चरित्रप्रहाणेनाप्यार्थिकलाभः प्राप्तव्य इत्यमुमाशय निराकुर्वन्ति। कौटलीयमर्थशास्त्रमेतादृशग्रन्थेष्वतितरां प्रधानं भवति। प्राचीनभारतीयां राज्यशासनस्थितिमार्थिकस्थितिं चाधिकृत्य परिपूर्णं वृत्तान्तं नान्यः कोऽपि भारतीयग्रन्थस्तथाऽऽवेदयति, यथायं ग्रन्थः। भारतीय-माकिवलिः (Machivelli) इति कौटल्यो व्यपदिश्यते। दशमशताब्द्यां जैनविद्वान् सोमदेवसूरिर्नीतिवाक्यमृताख्यं ग्रन्थं काश्मीरे विरचितवान्। अयं जैनोऽपि ब्राह्मणमतिः सन् चातुर्वर्ण्यसिद्धान्तमूरीकरोति।

रूपनिर्माणकला-(plastic Art) वाचकोऽपि शिल्पशास्त्रशब्दो वास्तुविद्यापरनामकं गृहनिर्माणशास्त्रमप्यभिधत्ते। गानं वाद्यगानं चाधिकृत्य विलिखिताः संगीतशास्त्रग्रन्था अपि वर्तन्ते। काश्मीरदेशीयेन शार्ङ्गदेवेन कृतः संगीतरत्नाकराख्यो ग्रन्थ एतादृशेष्वन्यतमः प्राचीनश्च। महाभारते चौर्यकलापि निर्दिष्टा वर्तते। चौर्यमधिकृत्य कोऽपि ग्रन्थोऽधुनापि सुरक्षितो विद्यते। अस्य नाम षण्मुखकल्प इति।

कामशास्त्रे प्रतिपादिता विषयाः पाश्चात्यानां दृष्टौ भूयसाऽश्लीला भायुः, परं नेदं विस्मर्तव्यं यत् पाश्चात्यापेक्षया भारतीया लैङ्गिकविषयेऽधिकतरं स्पष्टभाषिण इति। मल्लनागवात्स्यायनकृतं कामसूत्रं प्राचीनतममत्र विषये। कवयः कामशास्त्रमधयेतुं नियुक्ता वर्तन्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अलङ्कारशास्त्रेषु च सन्ति केचन भागा ये कामशास्त्रोक्तान् विषयानधिकृत्य भाषन्ते। सुबन्धुर्भवभूतिश्च कामशास्त्रपण्डितौ।

भैषज्यतन्त्रस्योपक्रमोऽतिप्राचीने वेदकाल एव दृश्यते। वेदभागेषु शरीरविज्ञानस्य, भ्रूणविज्ञानस्य, स्वास्थ्यविज्ञानस्य चोपक्रमो द्रष्टुं शक्यः। अथर्ववेदः शतपथब्राह्मणं च मनुजशरीरे स्थितानामस्थिखण्डानां संख्यां याथार्थ्येन निर्दिशतः। 'अष्टौ तन्त्राण्यायुर्वेदे' इति संप्रदायविदः। अतिप्राचीना भैषज्यग्रन्था बौद्धकृताः। एते सर्वेऽपि ग्रन्थाः श्लोकबद्धाः। प्राकृतसंमिश्रिता संस्कृतभाषात्रोपयुक्ता वर्तते। चरकसंहिता विदुषाऽग्निवेशेन कृतं ग्रन्थमुपजीव्य प्रवृत्तेति तद्वाक्यादेव ज्ञायते। चरको न केवलं भिषग् भवति, किन्तु तत्त्वदर्शक उपदेशपरश्चापि। मतसंबद्धान् नीतिसंबद्धांश्च बहूनुपदेशान्, करोति। आत्मानमधिकृत्य वर्णयन्नेष साङ्ख्यसिद्धान्तस्य, न्यायानुमानप्रक्रियाया वैशेषिकपदार्थानां च परिचयमात्मनः प्रकटयति।

यद्यपि भारतीयं भैषज्यतन्त्रं भारतदेश एवोत्पन्नमित्यत्र नास्ति संशयः, अथापि भारतीयं तन्त्रं बहुष्वंशेषु ग्रीसदेशीयतन्त्रेण सादृश्यं वहति। चिकित्सायामहिफेनस्य पारदस्य चोपयोगे, रोगनिदानज्ञाने नाडीपरीक्षणे च भारतीयं तन्त्रं पारसीकेभ्योऽरवीयेभ्यश्चाधमर्ण्यं धारयति।

खगोलीय ज्योतिःशास्त्रं भारते नियमेन तदीयावैज्ञानिकविभागेन फलाङ्गज्योतिषेण संपृक्तमेव वर्तते। य एव खगोलग्रन्थकारास्त एव फलाङ्गज्योतिषमधिकृत्यापि प्रायशो ग्रन्थान् व्यलिखन्। भारतीयज्योतिषशास्त्रस्योपक्रमो जगत्सृष्टिं देवताश्चाधिकृत्य कृतेषूत्प्रेक्षावत्सु ब्राह्मणग्रन्थभागेषु वेदसूक्तेषु च द्रष्टव्यः। पञ्चसिद्धान्तिकया प्रदर्शितैः प्रमाणै रोमकसिद्धान्ते यवनोपस्कारसत्तासूचकानि चिह्नानि सुस्पष्टं प्रकटीकृतानि वर्तन्ते। प्राचीनरोमकसिद्धान्ते प्रतिपादिताः सर्वेऽपि विषया ग्रीकदेशीया एव। अथापि मुख्येषु विषयेषु ग्रीसदेशीयसिद्धान्तेभ्यो भेदो दृश्यत एव। फलितज्योतिषग्रन्थे बृहत्संहितायामेकः श्लोको भारतीयज्यौतिषस्य यवनसिद्धान्ताधीनत्वमभ्युपगच्छन्नुपलभ्यते—

म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत् तेऽपि पूज्यन्ते किं पुनर्दैवविद् द्विजः॥

प्राचीनभारते गणितज्ञानं ज्योतिषशास्त्रं चेति द्वयं खगोलविज्ञानसंबद्धमेवाधीतमासीत्। एवं चाङ्कगणितं बीजगणितं चार्यभटब्रह्मगुप्त-भास्कराचार्यकृतेषु खगोलग्रन्थेष्वङ्गभूते आस्ताम्। पाश्चात्यानां दशांशतन्त्रमपि भारतादधिगतमित्ययमाशयोऽद्यापि प्रमाणभूत एव वरीवर्ति। अमुमाशयमधिकृत्य क्रियमाण आक्षेपस्तु पुनरपि नूतनतया विचार्यो वर्तते। ज्यामितेरुपक्रमो भारतेऽत्यन्तप्राचीनकाले जातः। परिगणनीयो ज्यामितिविषयः कल्पसूत्राङ्गभूत-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शुल्वसूत्रेष्वभिव्यक्तो वर्तते। एतानि सूत्राणि यागभूमिनिर्माणे, वेदिकरणे, महायागाना-मनुष्ठानायापेक्षितसंविधानकरणे च विधीन् प्रदर्शयन्ति। सम्राड् जगन्नाथाख्यः कश्चिद् अष्टा-दशशताब्द्याम् अरबिभाषातो यूक्लिडीयमूलतत्त्वानि संस्कृतेऽनूवाद।

अयं पुस्तकसंक्षेपो भारतीयवृत्तस्य सप्तमाध्यायपर्यन्तः। अष्टमेऽध्याये लेखकेन द्रविड-तमिलादिभाषालिखितसाहित्यस्य कबीरनानकादिशिष्याणामादिग्रन्थस्य, तुकाराम-मीराबाई-बिहारीलाल-तुलसीदास-लल्लावाक्य-जैनसाहित्य-मुकुन्दरामकविकङ्कण-चैतन्य-रामप्रसाद-राम-मोहनराय-माइकेलमधुसूदन-रवीन्द्रनाथठाकुरतत्कृतसाहित्यादीनां वर्णनं कृतम्। भारतीयवृत्तस्य पुनरुपलम्भ इति शीर्षके नवमेऽध्याये लेखकेन यूरोपदेशे भारतवर्षे च जातानां साहित्यभाषा-विज्ञानपुरालेखनाणकविज्ञानाद्यनुसन्धानानां विषये भूयान् प्रकाशो निपातितः स चानुसन्धान-प्रियैरवश्यं पर्यालोडनीयः।

ग्रन्थस्यास्य संस्कृतानुवादः

'स्वतन्त्रलेखनादप्यनुवादलेखनमतिश्रमदमिति जानन्त्येवाभिज्ञाः' इत्यनुवादकवाक्यं तत्कृतानुवादपरिश्रमं लक्षयति। वस्तुत इहानुवादकेन भूयान् परिश्रमोऽनुष्ठित इति नास्ति मनागपि संशीतिलेशः। अनुवादसंस्कृतभाषा प्रवाहयुक्ता सरला चेति मूलग्रन्थ इवाभाति। तत्र केचन परामर्शा दीयन्ते—

१. 'अनुरद् वर्तते' (११६ पृ०), आददानं वर्तते (११७ पृ०), कुर्वद् वर्तते (१२७ पृ०), शृण्वद् वर्तते (१२७ पृ०), वर्तमानो भवति (१३६ पृ०), कुर्वन्तोऽ-वर्तन्त (१५४ पृ०), अनुसरन् वर्तते (१५८ पृ०), धरन् वर्तते (१६२ पृ०)। एवमेव (६; ६; ३५; ८०; ८५; ८७; १०२; १०४; २६८; २७२; २७३;) पृष्ठेषु कृता प्रयोगा न शिष्टानुमोदिताः। कस्याश्चिदपि भाषाया भाषान्तरे तस्या वाक्यशैल्यपि ग्राह्येति नावश्यकम्।

२. संपूर्णेऽनुवादे यत्र यत्र 'पाश्चात्य'-प्रयोगस्तत्र तत्र सर्वत्र नास्ति तकारद्वयम्, अनावश्यकस्थले तु तकारद्वयं प्रयुक्तम्। यथा—'अतिप्राचीनत्वेन' (पृ० २१२) इति। इति संस्करणान्तरे तथा विधेयम्।

३. क्वचित् क्वचिदाङ्गलभाषाप्रभावेण संस्कृतव्याकरणमनादृतम्—'दक्षिणगिरिश्रेणी-द्वारा निर्गतेयं नदी (५ पृ०)। एवमेव—'कालीघट्टस्य प्राच्यां दिशि' इत्यादावपि 'अन्या-रादितरर्ते' इत्यादि विस्मारितम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४. यद्यपि संपूर्णे ग्रन्थे सन्धिनियमा न परिपालितास्तथापि तत्रैकरूप्यमवश्यमास्थेयम्। यदि सन्धिर्नादर्तव्यस्तर्हि सर्वत्रैव तथा निर्वाह्यम्। 'द्योतकं उपलभामहे' (११ पृ०), केवलं आपादिताः (२२ पृ०), संस्कृतभाषायां ऋग्वेदस्य (२६ पृ०), श्वेताम्बरीयं इति (८६ पृ०) परं अपूर्णः (११० पृ०)—प्रभृतयः प्रकृतयो नोत्तमाः। एवमेव द्र० १३२; १४५; १५२; १५३; १५७; १६०; १६२; १८४; २५७; २५६; २६०; २६२; २६४; २६५; २६६; २६७; २६८; २७० पृष्ठेषु। क्वचित् तु विरूपा अपि कृताः सन्धयः, यथा—'बहवो आशयाः' (१३८ पृ०) 'तदिच्छाप्रतीपं' (१४६ पृ०), द्रौपदीविवाहं, (१४७ पृ०)। विरामादौ सन्धिरकरणीयः। स तत्रापि कृतो विलोक्यते—

५. पूर्वतनशब्दस्य बाहुल्येन प्रयोगः। नायं व्याकरणसंमतः, कालवाचकेभ्योऽव्ययेभ्य एव ट्युट्युलौतुट्प्रत्ययानां विधेयत्वात् (द्र० पृ० २६; १७४; १८६; १६५; २१३ २१५; २१८; २२८;२३६; २६२; २८३)। ऐन्द्रियिक (२१० पृ०)—प्रयोगो नादर्तव्यः। परमोद्देश्यो भवति (पृ० २१०) इत्यत्र नपुंसकलिङ्गेन भाव्यम्। सार्वजनीन (२६७ पृ०) इति प्रयोगो न संमतः, सर्वजनाट्ठञ् खश्चेति वार्त्तिकात्।

६. भौगोलिकस्थानपरिचयाभावादनुवादकेन तत्तत्स्थानानां विकृतोच्चारणात्मिका वर्तनी समाश्रिता। यथा—'अवध' इत्यस्य स्थाने 'औध' (२६१ पृ०) इति। 'मेरठ' इत्यस्य स्थाने 'मीरत्' (पृ० २६६) इति वर्तनी खल्वाङ्ग्लवर्तनीमनुकुरुते। 'बीकानेर' इत्यस्य स्थाने 'बीकानीर' (२७१ पृ०) इति, 'जूनागढ़' इत्यस्य स्थाने 'जुनगड' (३४० पृ०) इति; 'बघेलखण्ड' इत्यस्य स्थाने च 'भाग्लखण्ड' इत्याद्युच्चारणानि परम वैपरीत्यं दर्शयन्ति।

७. स्थानानां संस्कृतीकरणप्रयासेऽपि स्खलतयः। 'लद्दाख' इत्यस्य कृते 'लडक'—शब्दप्रयोगोऽभिमतः। यद्यप्यनुवादकेनाङ्ग्लभाषायाः Ladakh) इति वर्तनीं दृष्ट्वैव तथा प्रयुक्तम्, तथापि "लडका मडकाश्चैव तङ्गणाः परतङ्गणाः" इति महाभारते प्रयोगोपलब्धिरिति घुणाक्षरन्यायेन साधीयस्त्वम्। अनुवादकस्तु लेखकदर्शितां वर्तनीमाश्रित्यैवोच्चारणानि निर्धारयतीति स्पष्टम्। यथा—Pathan इत्यस्यानुवादेऽनुवादकः 'पथानाः' इति लिखति। वेदेषु 'पक्थन्' शब्दो लभ्यते। संप्रत्यपि पक्थूनिस्ताने पक्थूनाः सन्त्येव।

मुद्रणदोषाणां प्रायशोऽभावः। ग्रन्थस्यास्यानुवादेऽनुवादकः साधुवादार्हः। महिष्ठे कार्ये केषाञ्चन दोषाणां नगण्यता, अग्रिमे संस्करणे तेषामपाकरणार्हत्वात्।

वागीशः शास्त्री

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका ।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति ।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति ।

४. अस्यां वाराणसेयसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां मौलिकविचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते ।

५. लेखकेन प्रकाशितस्य निबन्धस्य पञ्चविंशतिः प्रतिमुद्रणान्युपलब्धानि स्युः ।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्गलग्रन्थानां समालोचनाः प्रकाश्यन्ते । तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रती प्रेषयितव्ये ।

७. अस्या वार्षिकं मूल्यं सप्त रूप्यकाणि, प्रत्यङ्कं च रूप्यकद्वयं वर्तते ।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, वाराणसेय-संस्कृत-विश्वविद्यालय, वाराणसी—२" इति सङ्केतेन विधेयः ।

प्रकाशक—सञ्चालक, अनुसन्धान संस्थान, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी ।
मुद्रक—श्री घनश्याम उपाध्याय, वाराणसेय संस्कृत विश्वविद्यालय मुद्रणालय, वाराणसी ।
मु० सं०–१६२/७०

CC-0. Sampurnanand University Collection. Digitized by eGangotri